ADVAITARASAMANJARI

॥ अद्वैतरसमञ्जरी ॥

OF

SADASIVA BRAHMENDRA

BY

Vidyaratna P. N. Menon, B.A., B.L.

Publishers:

The Educational Supplies Depot,

PALGHAT—1.

॥ अद्वैतरसमञ्जरी ॥

ADVAITARASAMANJARI

OF

SADASIVA BRAHMENDRA

Text in Sanskrit

with

The Sanskrit Commentary

of

SRI KRISHNANANDASRAMI

and

English Translation with copious Notes

BY

Vidyaratna P. N. Menon, B.A., B.L.

Publishers :

The Educational Supplies Depot,

PALGHAT—1.

[Price Rs. 2-50.

First Edition 1965.

PRINTED AT
VANI VILAS PRESS,
PALGHAT.

PREFACE

Whenever Dharma is at a low ebb God comes down to the world to wean out unrighteousness and establish righteousness. His incarnations are myriad but the aim is the same. Sankara Bhagavadpada was one such incarnation. He came down when the spiritual atmosphere in Bharata had deteriorated as never before He regenerated Hinduism with his Shanmatha Sthapanam and established the superiority of Advaitism. Since his times many Yativaryas have come among us to continue the good work of Sri Sankara. Paramahamsa Parivrachakacharya Sadasiva Brahmendra, himself a Jeevanmuktha, enriched both Karnatic Music and Advaita Philosophy by his compositions and treatises.

His Advaitharasamanjari is a lucid composition in Sanskrit verse which explains to the layman in the very short span of but 44 slokas the Advaita Philosophy. It is a treat even to the uninitiated.

The Editor while on a mission to gather material for 'The Indian Classics' accidently came by a rare Sanskrit commentary on

Advaitarasamanjari by Paramahamsa Krishnanandasrami. The temptation was so strong that he set to work on the English translation with copious notes thereon almost immediately. That is the genesis of this publication. We have very great pleasure in presenting it to the public.

Publishers.

श्री गणेशाय नमः ॥

श्री गुरुभ्यो नमः ॥

॥ अद्वैतरसमञ्जरी ॥

अखण्डसत्यज्ञानानन्दामृतस्यात्मतत्व-
स्तवादिकं कथं कुर्यां करणागोचरत्वतः ॥ १

स्वभक्तलोकानुजिघृक्षयैवया समस्तलोकानुगता विराजते ।
अकादिरूपेण शुकादिवन्दितां नमामि तं श्रीललितां स्वदेवताम् ॥ २

गजमुखमुपरिष्टान्मानवाङ्गं त्वधस्ता-
नरपरपरमैक्यज्ञापनायभ्युपेत्य ।
परिलसतिपरस्तान्मोहजालान्महोय-
त्तदिह मम पुरस्तादस्तु वस्तुप्रशस्तम् ॥ ३

वटतरुनिकटे श्रीदक्षिणामूर्तिरूपं
यदधिवसति सच्चिन्मुद्रया भद्रयार्थम् ।
परमममृतमन्तेवासिनां संप्रदातुं
तदिहवरदमेकं भावये भावशून्यम् ॥ ४

यतीन्द्रमण्डलं ध्यायन्नखण्डरसमण्डलम् ।
अद्वैतरसमञ्जर्याः कुर्वेऽयं सुविकासिनीम् ॥ ५

अबद्धाऽपि सुबद्धैषा सता बद्धसुदृष्टिना ।
भवेत्सन्तं षवन्तो हि सन्तस्सन्ति समेक्षणाः ॥ ६

पादशून्यपतगायितस्य मे खेचरत्वमतिदुर्लभं खलु ।
तद्विदोऽपि तदवाप्तुमिच्छतस्साहसं सहतु सौहृदीजनः ॥ ७

इह खलु भगवानखिलजगद्गुरुरखिलकारुणिकाग्रगण्यः परमात्मा कलिकालकरालमहामोहहालाहलमोहितनिखिलजनसन्तापमवलोक्याश्रितानामुपात्तसमस्तप्रशस्तसाधनानां दुःखरूपदुष्टनिग्रह सुखरूपशिष्टपरिपालनाय श्रीशङ्कराचार्यादिरूपेणावतीर्णस्सूत्रभाष्यादि निर्माणाद्यनेकग्रन्थं कृतवानिति सर्वत्र प्रसिद्धमेव खलु। तेषु शङ्कराचार्यप्रभृतिषु कश्चिद्यतिकुलतिलको भगवान् सदाशिवब्रह्माख्यः परमकृपालुराचार्यः केवलं तीव्रतरमुमुक्षूणामनेकशास्त्रावलोकनेष्वलसानामतिविस्तारात्स्वल्पभीरूणामत्युत्तमाधिकारिणामत्यन्तोपकाराय तदुभयरहितमतिरहस्यमुत्तमोत्तममेतत्समस्तवेदान्तसारसंग्रहमद्वैतरसमञ्जर्याख्यं प्रकरणं चिकीर्षुरादौ निर्विघ्नेन ग्रन्थपरिसमाप्तिप्रचयगमनादिलक्षणफलकं शिष्टाचारानुमितश्रुतिबोधितकर्तव्यताकमिष्टदेवतानुसन्धानात्मकं मङ्गलं शिष्यशिक्षार्थं ग्रन्थतो निबबन्ध ॥

अद्वैतमेव परमार्थतया विवेक्तु-
मङ्गीकृतद्विपनराकृतिसन्निवेशः ।
अद्वैतगोचरमशेषविशेषमन्त-
राविष्करोतु वरदो मम विघ्नराजः ॥ १

अद्वैतमिति । विघ्नराजो विनायक इत्यभिधानात् विघ्नानामन्तरायाणामिह परसुखविरोधिलक्षणानां राजा विघ्नराजः विघ्नेश्वरो गणपतिः मम भगवद्भक्तानां पारमार्थिकभवत्स्वरूपबोधग्रन्थचिकीर्षोरन्तरन्तःकरणेभवध्यानतत्परे सम्यगाविष्करोतु प्रत्यक्षीभवतु ध्यानगोचरो भवत्वित्यर्थ । कीदृशोऽयं विघ्नराज इत्याकांक्षायामाह । अङ्गीकृतद्विपनराकृतिसन्निवेश इति । अङ्गीकृता

स्वीकृता द्विपनरयोर्गजमनुजयोराकृतिराकारस्सैव सन्निवेशस्संस्थानं यस्य सः स्वेच्छाकल्पित नरगात्र गजवक्त्ररूप इत्यर्थः। किमर्थं करिनरोभयमिश्रीकृताकाराङ्गीकार इत्याकांक्षायामाह—अद्वैतमित्यादिना परमार्थतया वस्तुतस्त्वद्वैतमेव वस्तु न द्वैतमिति विवेक्तुं सम्यग्विविच्याश्रितान् बोधयितुमित्यर्थः। अतस्तस्याद्वितीय वस्तुनः प्राप्तं दृश्यत्वं निरस्यति अद्वैतगोचरमिति। अद्वैतस्य केवलस्य स्वस्यैव गोचरं विषयभूतं न तु द्वैतस्य स्वविलक्षणस्येत्यर्थः। ननु लोके मृष्टान्नभोजनस्रक् चन्दनवनितालापवीणावेणुमृदङ्गादयोऽनेकविशेषाः सुखकरास्सन्ति। अद्वैते तु न कोऽपि सुखविशेषलेशः। ततोऽत्र जिज्ञासुप्रवृत्त्यभावस्ततो भगवत्प्रवृत्ते द्विपनराकृतिधारणरूपायाः वैयर्थ्यं च स्यादित्याशङ्कां परिहरति अशेषविशेषमिति। अशेषेभ्यः स्वेष्टमृष्टान्नादि विशिष्टाग्निष्टोमादिभ्योऽप्यैहिकामुष्मिकसुखसाधनविशेषेभ्यो विशेषं श्रेष्ठं सुखसाधनमन्येषां सातिशयत्वात्तुच्छत्वादनित्यत्वादस्य निरतिशयत्वात् पूर्णत्वान्नित्यत्वाच्चेदिभावः। एतादृशमद्वैतमेव विवेक्तुमिति संबन्धः। नन्वद्वैतज्ञानमेव भगवतो लभ्यते नान्यत् किमपि भक्तानामित्याशङ्कां परिहरति वरद इति। भक्तानां वरमिष्टमस्य पुत्रमित्रकलत्रक्षेत्रधनधान्यादिकं परत्राप्सरोवनिताऽमृतादिभोगं चित्तशुद्धिद्वारा मोक्षसुखं वा ददाति तत्तद्भावनानुरूपेण प्रयच्छतीति वरदः। यो यो यां यां तनुं भक्तः श्रद्धयार्चितुमिच्छति। तस्य तस्याचलां श्रद्धां तामेव विदधाम्यहमिति भगवद्वचनात्। यादृशी भावना यत्र सिद्धिर्भवति तादृशीति पुराणवचनाच्च। एतादृशो विघ्नराजो ममान्तराविष्करोत्विति संबन्धः। यद्वा आत्मा वै जायते पुत्र इत्यादिश्रुतिन्यायेन विघ्नराजपदेन तत्पिता साम्बपरमेश्वरो लक्ष्यते। विघ्नराजः साम्बपरमेश्वर इत्यर्थः। यद्वा विघ्नानामात्मबोधविरोधिनामज्ञानतत्कार्यरूपाणां समष्टिव्यष्टिरूपेण प्रतीयमानानां राजाऽधीश्वरः कूटस्थासङ्गचिद्रूपः परमात्मा। यद्वा विघ्नमज्ञानविरोधिवृत्तिज्ञानं तेन राजते स्वाज्ञानविनाशद्वारा प्रकाशत इति विघ्नराजः प्रत्यक्चैतन्यरूपः परमात्मा। यद्वा आत्मचैतन्यमेव वृत्तिप्रवेशद्वाराऽज्ञानविरोधित्वाद्विघ्नः। तदेवाऽज्ञाननिवृत्त्या स्वयमेव राजमानत्वात् राजा च विघ्नश्चासौ राजा चेति विघ्नराजः प्रत्यगभिन्नः परमात्मा सत्यज्ञानानन्दानन्ताद्वयं ब्रह्म। तदनुसन्धानवतो ममान्तस्तदाकाराकारितान्तःकरणवृत्तावाविष्करोतु, ब्रह्मानन्दामृतमननरतमनवच्छि-

न्मन्तस्सम्यक् स्फुरत्वित्यर्थः । ननु जीवेश्वरयोस्तद्विलक्षणत्वेन विद्यमानयोस्सतोः कथं तस्याद्वितीयत्वमित्याशङ्कामपनुदति । अङ्गीकृतद्विपनराकृतिसन्निवेश इति । द्वे समष्टिव्यष्टिरूपे मायाऽविद्ये सकार्ये पाति रक्षतीति द्विपः समष्ट्युपाधिक ईश्वरः नरो व्यष्ट्युपाधिको जीवः तयोराकृतीमूर्ती समष्टिव्यष्टिरूपे मायाऽविद्ये तयोस्सन्निवेशः । ईश्वरजीवरूपेण प्रवेशो येनाऽङ्गीकृतः स तथोक्तः । यद्वा द्वौ कर्मज्ञानफलरसौ पिबत्यनुभवतीति द्विपो जीवः नयति प्रापयति जीवान् स्वस्वकर्मफलानीति नरोऽन्तर्यामीश्वरः तदाकारेण कल्पिताऽविद्यामायाप्रतिबिम्बिताभासरूपेण सन्निवेशस्सम्यक् प्रवेशोऽवस्थानमङ्गीकृतो येन सः ब्रह्मैव स्वप्रकृतिमधिष्ठायाभास जीवेश्वराकारेण स्थितं नान्यदिति भावः । जीवेशावाभासेन करोति माया चाविद्या च स्वयमेव भवति । तत्सृष्ट्वा तदेवानुप्राविशदित्यादि श्रुतेः । अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोपि सन् । प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया ॥ ममैवांशो जीवलोके जीवभूतस्सनातनः । इत्यादि भगवद्वचनाच्च ॥ ननु निर्विकारस्य परस्य ब्रह्मणः किमर्थं जीवेश्वराकारकल्पनेत्याकांक्षायामाह अद्वैतमिति । अद्वैतं केवलमात्मवस्तु तदेव परमार्थतया सर्वोत्कृष्टवस्तुत्वेन परमपुरुषार्थत्वेन वा विवेक्तुं विविच्य भक्तानां गृहीतुं देशकालवस्तुपरिच्छेदरहितं नित्यशुद्धबुद्धमुक्तस्वभावमखण्डसच्चिदानन्दात्मकं यत्तदेव सर्वोत्कृष्टं वस्तु परमपुरुषार्थमिति वा मुमुक्षूणामध्यारोपापवादद्वारा तत्वं पदार्थं परिशोधनपुरस्सरं सम्यग्ज्ञातुमिति भावः तदुक्तं तापनीयोपनिषदि । चिन्मयस्याद्वितीयस्य निष्कलस्याशरीरिणः । उपासकानां कार्यार्थं ब्रह्मणो रूपकल्पनेति ॥

ननु निर्विशेषस्याद्वैतवस्तुनः कथं ज्ञेयत्वमित्याशङ्कामपहर्तुमद्वैतं विशिनष्टि अद्वैतगोचरमिति । अद्वैतस्याद्वैतशास्त्रस्य गोचरं विषयभूतम् । यद्वा अद्वैतगावोद्वैतश्रुतयश्चरन्ति यत्र तदद्वैतगोचरं वेदान्तविषयं प्रत्यक्षादिप्रमाणान्तरावेद्यत्वेऽप्यद्वैतवस्तुनः वेदान्तवेद्यत्वमस्तीति भावः । तन्त्वौपनिषदं पुरुषं पृच्छामि । शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय इत्यादिश्रुतेः । वेदैश्च सर्वैरहमेव वेद्य इत्यादि भगवद्वचनाच्च । एतस्याद्वैतस्य विशिष्टाद्वैत वैलक्षण्यं लक्षयति अशेषविशेषमिति—शेषाः स्वभिन्ना विशेषाः समष्टिव्यष्टि मायातत्कार्यरूपा यत्र न सन्ति तदशेषविशेषं सर्वविशेषरहितमित्यर्थः ।

एतादृशमद्वैतमेव परमार्थतया विवेक्तुमङ्गीकृतद्विपनराकृतिसन्निवेश इति संबन्धः ॥

नन्वद्वैतबोधनार्थमेव भगवत्सृष्टिप्रवेशादिकामिति कुतो निश्चय इत्याशङ्कामपनुदति वरद इति । वरमिष्टमखण्डसुखं ददात्यनुभावयति भक्तानिति वरद: ब्रह्मानन्दप्रदः हेतुगर्भितमेतद्विशेषणम् । अद्वैतबोधनार्थमेव भगवत्सृष्टिप्रवेशादिकम् । स्वस्य भक्तवरप्रदत्वात् । अद्वैतज्ञानाभावे भक्ताभीष्टानुभवाभावादिति भाव. । द्वितीयाद्वै भयं भवतीति श्रुतेः ॥

ननु शिवे रुष्टे गुरुस्त्राता गुरौ रुष्टे न कश्चन । न गुरोरधिकं तत्वमित्यादिवचनात् गुरुवन्दनस्य कर्तव्यत्वे तदकृत्वा विघ्नेश्वरवन्दनमनुचितमिति चेन्न गुरुविघ्नेश्वरयोर्ब्रह्मरूपत्वेनाभिन्नत्वात् कृते सति विघ्नेश्वरवन्दने गुरुवन्दनस्यापि कृतत्वात् । त्वमेव केवलं सर्वं खल्विदं ब्रह्मासीत्यादि गणपत्युपनिषद्वचनात् । गुरुर्ब्रह्मविना नान्यत्सत्यं सत्यं वरानने । गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः । गुरुरेकं परं ब्रह्म तस्मै श्रीगुरवे नमः—इत्यादि गुरुगीतावचनाच्च । अत्राद्वैतवस्तु विषयः । अखण्डसुखानुभूतिः प्रयोजनम् । बोध्यबोधकभावः संबन्धः । तत्कामी भक्तोऽधिकारीत्यवान्तरानुबन्धचतुष्टयमाविष्कृतं भवति ॥

May the Lord Vighnaraja, the grantor of boons, become revealed within me—the Lord who has assumed the form of the elephant and man to impart discriminatingly the knowledge, that Brahma alone is real, which is verily that excellence transcendental above all and within the range of Adwaita (or realised of oneness).

Notes :— This is an introductory verse of invocation to Vighnaraja to bless the author for a successful completion of the work now undertaken. The expression Vighnaraja is possible of several explanations as we understand the word Vighnaraja. It may mean Lord Ganapati that foremost deity of the Hindu pantheon of Gods who

is invoked first at the beginning of all undertakings to clear the way of all difficulties that may beset the progress. He is so called as He is the Lord of all obstacles that stand in the way of happiness here and hereafter. He is said to be of the form with the face of an elephant (dwipa) and the body of man (nara). In a secondary sense, the expression may be taken to refer to Siva, the father of Ganapati, since the scriptures declare that the very soul is born as son too. (Atma vai jayate putra). Thirdly it may be said to refer to the Supreme Soul (Paramatma) since the word Vighnaraja may be taken to mean the lord (raja) of all obstacles (Vighna) that stand in the way of knowledge of self, viz., ignorance and all its effects both in the collective and the individual aspect or as one who shines by the process of negation as being not this, not this (Nehi-Nehi) or as one who is realised through functional knowledge (Vritti jnana) which is an obstacle to ignorance thus referring to the supreme soul in the form of the individual soul or it may be taken as the individual soul which through functional knowledge standing in the way of ignorance shines by itself and gets duly transformed as the ultimate soul of the nature of Sat (existence) chit (energy) and Ananda (bliss), thereby to mean 'May that Brahmic Bliss be ever surging within me'.

Here there arises a doubt—How can that Paramatma or Supreme Soul be said to exist as the sole, one without a second when the Jiva (individual soul and Iswara (the collective soul) are seen to exist as different and separate entitities? It is explained away as follows: Dwipa means that which sustains (पाति) the two (द्वे) viz, Maya and Avidya, the two aspects of ignorance and their collective and individual effect. The collective aspect of Maya as embracing all is known as Iawara and

the individual aspect born of Avidya is known as Jiva. The Supreme takes the form of both and is their prop. It may be explained in another way also:— The Jiva or the individual soul enjoys the fruits of the two paths, viz., Karma (action) and Jnana (knowledge) द्वौ पिबतीति द्विपः while the word Nara means the immanent Iswara or God who leads the individual souls to the respective fruits of their deeds, good and bad नयतीति नरः. It is verily Brahma that through nature or Prakriti creates everything and itself enters into them as the individual and collective aspect of Jiva and Iswara respectively, as supported by several scriptural texts.

Then the question arises: 'Why should the Supreme Paramatma, the immutable, be conceived of in the forms of Jiva and Iswara?' The answer is, as declared in Tapaneeyopanishad, to help the aspirant after final salvation to realise that verily Brahma is the one ultimate which is to be sought after as the ultimate goal of life. If so how can the attributeless Supreme be cognized? The answer is that falling within the scope of Adwaita Sastra though not cognizable by any derict evidence, it is cognizable through the practice of Vedanta. That Supreme is अशेषविशेषम् bereft of all attributes. If so, how can it be said that the Supreme creation and the immanence of the Supreme therein are all for enlightenment of the aspirant about the Supreme? For the Supreme is the grantor of boons (Varada) namely, Bliss Absolute. The creation and all other things are only to bless the aspirant withthe realisation of Brahmic Bliss.

When it is laid down in the Sastras that the guru or spiritual preceptor is all Supreme and is to be invoked for success, why is Vighnaraja invoked instead here? The answer is that the guru and Vighnaraja are not different,

being of the same form of Brahma (Supreme) as declared in Ganapatyupanishad. The four sequences of the composition are as follows :— The subject matter is Adwaita (the Supreme). The object aimed at is the realized experience of Brahmic Bliss. The relation between them is as between what is to be known and what is known. The one qualified to know it is the aspirant devoted to it

2. After having first invoked the lord thus, the subject is taken up. All beings strive for absolute happiness. Such happiness cannot be had with out the knowledge of the self, nor can this knowledge be had except through the inspired Vedantic teaching of a guru. Such teachings cannot be effective without the discriminative knowledge of what is real and what is unreal and this discriminative knowledge can be had only with purity of mind which in its turn depends on disinterestedness of action. Hence purity of mind is to be attained through disinterested actions dedicated to the lord and performed in a spirit of devotion and faith.

अज्ञानविस्फुरदनेकविधात्मभेद-
मज्ञानमाश्रितवतस्सुलभा न मुक्तिः ।
आदर्शगेहमभितः प्रतिबिम्बितान्त-
र्द्वारं गतस्य न बहिर्गतिरर्भकस्य ॥ २

अज्ञानेति । अज्ञानेनानादिकालप्रवृत्तेन मोहेन विस्फुरन्तो विलसन्तोऽनेकविधा ब्रह्मविष्णुरुद्रादिरूपेण बहुप्रकारा आत्मभेदास्स्वरूपविशेषा यत्र तदिति विग्रहः । अनादिमायाकल्पिताऽनेकप्रकारस्वरूपविशेषमित्यर्थः । अज्ञानं न ज्ञायते किञ्चिदप्यनेनेत्यज्ञानमन्तःकरणं अथवा अज्ञानविस्फुरदनेकविधात्मभेदवदिति पाठे तु आत्मभेदा अस्य सन्तीति विग्रहः । ज्ञायते शब्दादीन् श्रोत्रादीन्द्रियद्वारा स्वाश्रयचैतन्यबलेनेति ज्ञानं बुद्धिस्तदाश्रितवतः नाना-

विषभेदवासनाविशिष्टान्तःकरणविशिष्टस्येत्यर्थः मुक्तिरात्मज्ञानद्वाराऽखण्डसच्चिदानन्दब्रह्मात्मनावस्थानलक्षणा न सुलभा सुखेन लब्धुमशक्याद्दुर्लभेत्यर्थः। यद्वा अज्ञानादनाद्यविद्यावासनावशात् विस्फुरन्तो विशेषेण प्रतीयमाना अनेकविधा ब्रह्मादिरूपेण देवमनुष्य तिर्यगादिरूपेण च बहुप्रकारा मूर्तिविशेषा यत्र तत्। यद्वा अज्ञानाच्चैतन्याधिष्ठितादव्यक्तात् विस्फुरन्तः स्थूलसूक्ष्मकारणसमष्टिव्यष्टिरूपेण विजृम्भमाणा अनेकविधा बहुप्रकारा आत्मभेदा आब्रह्मस्तम्बपर्यन्तमूर्तिविशेषा यस्य तत्तथोक्तमज्ञानं कार्यकारणाभेदन्यायेनाज्ञानकार्यं दृश्यप्रपञ्चमाश्रितवतोऽवलंबितवतः। पृथक् पृथक् सम्यतरम्यत्वमत्याङ्गीकृतवत इति यावत् मुमुक्षोर्मुक्तिस्संसारकारागारान्मोक्षः न सुलभा सुखेन लब्धुमशक्या दुर्लभेत्यर्थः। अत्र दृष्टान्तमाह श्रोतृबोधसौकर्याय आदर्शगेहमित्यादिना। अभितः परितः प्रतिबिम्बितानि प्रतिफलितान्यन्तर्द्वाराणि प्रच्छन्नानि यस्मिन् तत्तथोक्तमादर्शगेहं मुकुरमन्दिरं गतस्य प्राप्तस्यार्भकस्य बहिर्जिगमिषयानेकद्वारभ्रान्त्या प्रत्येकं प्रतिबिम्बितद्वाराण्याश्रित्य हस्तमस्तकताडनादीननेकान् प्रयत्नान् कृत्वाऽपि बहिर्गतिर्नास्ति। तथा संसारकारागारान्तर्गतस्य मूढस्य मुमुक्षयानेकेश्वरभ्रान्त्या प्रत्येकमाभासमूर्तिविशेषानाश्रित्याभिषेकनैवेद्यस्तोत्रमन्त्रजपहोमतर्पणनमस्कारनित्यनैमित्तिकयज्ञव्रततपोदानादीननेकान् प्रयत्नान् कृत्वाऽपि मुक्तिर्नास्तीति। तदुक्तं श्रुतिप्रभृतिभिः। अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योहमस्मीति न स वेद यथा पशुरिति। वदन्तु शास्त्राणि यजन्तु देवतं कुर्वन्तु कर्माणि भजन्तु देवताः आत्मैक्यबोधेन विना विमुक्तिर्न सिद्ध्यति ब्रह्मशतान्तरेऽपि। भोगैश्वर्यप्रसक्तानां तयापहृतचेतसाम्। व्यवसायात्मिकाबुद्धिस्समाधौ न विधीयते॥ इति ननु अक्षय्यं ह वै चातुर्मास्ययाजिनस्सुकृतं भवतीत्यादिश्रुतेः वैयर्थ्यं स्यादितिचेन्न। अतिमन्दमतीन् काम्येपि कर्मण्यप्रवृत्तान् प्रवर्तयितुमुपयोगित्वेन सार्थकत्वोपपत्तेः। यस्मादेवं तस्मात् मुमुक्षुभिस्सकलफलापेक्षां विहाय श्रद्धाभक्तिभ्यामीश्वरार्पणबुद्ध्या नित्यनैमित्तिकप्रायश्चित्तोपासनादीनि यथाविधि विधाय बुद्धिशुद्धिमेवादावासादयेत् तद्द्वारेणैव मुक्तेस्साध्यत्वादिति सिद्धम्। तथा चोक्तं भगवता। कर्मण्येवाधिकारस्ते मा फलेषु कदाचन। मा कर्मफलहेतुर्भूः मा ते सङ्गोस्त्वकर्मणि॥ योगस्थः कुरु कर्माणि सङ्गं त्यक्त्वा धनञ्जय। सिद्ध्यसिद्ध्योस्समो भूत्वा

समत्वं योग उच्यते ॥ दूरेण ह्यवरं कर्म बुद्धियोगात् धनञ्जय । बुद्धौ शरणमन्विच्छ कृपणाः फलहेतवः ॥ बुद्धियुक्तो जहातीह उभे सुकृतदुष्कृते । तस्माद्योगाय युज्यस्व योगः कर्मसु कौशलम् ॥ कर्मजं बुद्धियुक्ता हि फलं त्यक्त्वा मनीषिणः । जन्मबन्धविनिर्मुक्ताः पदं गच्छन्त्यनामयम् ॥ एतेन सालोक्यादीनां मुक्तीनां गौणत्वं सूचितं भवति ॥

Final emancipation is not easily attainable to him who clings to the mind obsessed with the notion of different forms of Atma born of delusion. Exit is not possible to a child who has got into a glass house with doors inside reflected all round.

Notes :— Here the word Ajnana is suggestive of the delusion working from time immemorial. The different forms of Atma (Atmabheda) have reference to the various conceptions of the deities as Brahma, Vishnu, Siva and so forth or to the divisions as Gods, men and the lower orders of creation such as beasts etc. or to the various creations of the nature gross, subtle, causal, collective and individual born of the Avyakta or Prakriti. अज्ञानमाश्रितवतः Here the word Ajnana may mean either the mind which does not know of anything and clings to ignorance or the effect of that ignorance, viz., the visible phenomena of the universe to which it clings. Here is an illustration. A child who has entered a glass house with doors reflected all round knocks at every such reflected door to find an exit to no purpose. So also one who is solely intent on the forms of several deities and their worship cannot gain the end of self emancipation. It is a fact supported by several scriptural texts. A mind devoted to enjoyment of Supreme power, prosperity and the like can never remain in a state of evenness or equipoise which leads to the knowledge of

identity of self with the Supreme without which no final emancipation is possible at all.

If so, does the scriptural text that enjoins the excessive spiritual merit of the worship during the season of Chathurmasya lose all it force? No. That text is only an incentive to the dull and ignorant not intent on even actions interested to take up to such acts. More so it is obligatory for the spiritual aspirant to take up to all actions and worship enjoined in the Sastras whereby he can attain purity of mind and, in consequence thereof, final emancipation. The necessity of action to be resorted to in a spirit of disinterestedness has been emphasised by the scriptures Here the superiority of the salvation by complete identification of the self with the Supreme is asserted and all other forms of salvation like eternal proximity with the Supreme, Salokya, Samipya and Sarupya are only of secondary importance.

नन्वेवं चित्तशुद्धिं प्राप्तस्य कथं तद्द्वारा मुक्तिप्राप्तिरित्याकांक्षायामाह ॥

शान्त्यादिसाधनवता पुरुषोत्तमेन
संप्राप्यते निजपदं वरदेशिकोक्त्या ।
चोरैररण्यसरिणीं गमितेन पुंसा
देशो निजो हि तदभिज्ञगिरैव गम्यः ॥ ३

शान्त्यादीति । शान्त्यादीनि शमादीनि साधनानि श्रवणोपायभूतान्यस्य सन्तीति शान्त्यादिसाधनवान् पूर्वोक्तनिष्कामसत्कर्मानुष्ठानोत्पन्न सदसद्विवेकैहिकामुष्मिकफलभोगवैराग्यशमादिषट्कमुमुक्षुताख्यसाधनचतुष्टयसम्पन्न इत्यर्थः । तेन पुरुषोत्तमेन पुरुषेषु सकामानुष्ठानपरेषूत्तमः श्रेष्ठः पुरुषोत्तमः पुरुषधौरेयः तेषां निकृष्टपुरुषार्थसाधनवत्वादस्य सर्वोत्कृष्टपुरुषार्थसाधनवत्वाच्च

यद्वा उत्तमः पुरुषस्त्वन्यः परमात्मेत्युदाहृत इति भगवद्वचनात् पुरुषोत्तमः परमात्मा तत्प्राप्तिसाधनवानयं मुमुक्षुरप्युपचारात् पुरुषोत्तम इत्युच्यते। तेन निजपदं निजमात्मीयं पदं स्थानं प्रत्यगभिन्नं परं ब्रह्म। वरदेशिकोक्त्या वरदेशिकस्योत्तमसद्गुरोरुक्त्या वाचा संप्राप्यते ॥ समस्तसाधनसंपन्नेनोत्तमाधिकारिणा पुरुषेण सहोपहारेण श्रोत्रियं ब्रह्मनिष्ठं सद्गुरुमुपगम्य सम्यक् श्रद्धाभक्तिशुश्रूषादिसन्तुष्टस्य तस्य मुखतः कृतश्रवणमनननिदिध्यासनैर्निश्शेषविनष्टप्रतिबन्धद्वारा अखण्डसच्चिदानन्दस्वरूपावस्थानलक्षणो मोक्षस्सङ्गच्छत इत्यर्थः। परीक्ष्य लोकान् कर्मचितान् ब्राह्मणो निर्वेदमायान्नास्त्यकृतः कृतेन। तद्विज्ञानार्थं सद्गुरुमेवाभिगच्छेत् ॥ समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठं शान्तोदान्त उपरतस्तितिक्षुस्समाहितो भूत्वात्मन्येवात्मानं पश्यति मुमुक्षुर्वै शरणमहं प्रपद्ये। आचार्यवान् पुरुषो वेद। आत्मावारेद्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य इत्यादि श्रुतेः। तद्विद्धि प्रणिपातेन परिप्रश्नेन सेवया। उपदेक्ष्यन्ति ते ज्ञानिनस्तत्त्वदर्शिनः इत्यादि भगवद्वचनाच्च। उक्तसाधनसंपन्नस्तत्त्वजिज्ञासुरात्मनः उपसीदेद्गुरुं प्राज्ञं यस्माद्बन्धविमोक्षणम्। श्रोत्रियो वृजिनो कामहतो यो ब्रह्मवित्तमः। ब्रह्मण्युपरतः शान्तो निरिन्धन इवानलः ॥ अहेतुकदयासिन्धुर्बन्धुरानमतां सताम्। तमाराध्य गुरुं भक्त्या प्रह्वप्रश्रयसेवनैः। प्रसन्नं तमनुप्राप्य पृच्छेत् ज्ञातव्यमात्मनः—इत्याद्याचार्यवचनाच्च ॥

ननु देशिकोपदेशेन शास्त्रार्थविचारेण चात्मा न ज्ञायते किन्तु स्वयमेव ज्ञायते। शास्त्रार्थैर्बुद्ध्यतेनात्मा गुरोर्वचनतो न च बुद्ध्यते। स्वयमेवैष स्वबोधवशतस्वतः इत्यादिनादिति चेन्न। आचार्यवान् पुरुषो वेद। अनन्यप्रोक्ते गतिरत्र नास्ति। गुरोर्मुखेन ध्यातव्यमन्यथा लभ्यते कथम्। गुरूपदेशशास्त्रार्थैर्विना स्वात्मा न बुद्ध्यते। एतत् संयोगसत्त्वेव स्वात्मज्ञानप्रकाशिनी। इत्यादिवचनैर्देशिकोपदेशादिकमन्तरेणात्मा न ज्ञायत इति सिद्धान्तितत्वात् ॥ तर्हि शास्त्रार्थैर्बुद्ध्यते नात्मेत्यादि वचनस्याऽप्रामाण्यप्रसङ्ग इति चेन्न। परोक्षज्ञानस्य गुरूपदेशादि जन्यत्वेऽप्यपरोक्षज्ञानस्य तज्जन्यत्वाभावात् प्रामाण्योपपत्तेः ॥ नन्वपरोक्षज्ञानिनामपि मुक्तिः पुनरावृत्तिरहिता न स्यात् मुक्तानामपि वसिष्ठभीष्मादीनामपरोक्षज्ञानिनां पुनर्देहान्तरप्राप्तिश्रवणादिति चेन्न। वसिष्ठादीनामाधिकारिकत्वेनाधिकारपर्यन्तं प्रारब्धवशात् संप्राप्तशापादीनाङ्गीकृतावा-

न्तरशरीरनाशेऽपि तद्देहभाविभोगस्य विनाशयितुमशक्यत्वात् प्रारब्धस्य विना भोगेन क्षयानुपपत्तेः । यावदधिकारमवस्थितिराधिकारिणामिति व्यासैर्विशेषितत्वात् । तरति शोकमात्मवित् न स पुनरावर्तते न स पुनरावर्तते । इति ज्ञानिनां मुक्तत्वपुनरावर्तिरहितत्वश्रवणाच्च ॥

ननु गुरुशास्त्रादेरप्यज्ञानकार्यान्तर्भूतत्वेनाविरोधित्वात् कथमज्ञाननाशकत्वमात्मज्ञानजनकत्वं चेदितिचेन्नैपदोषः । स्वप्नदशायां दृष्टदुष्टगजव्याघ्रादेः स्वप्ननाशकत्वप्रबोधकत्वदर्शनात् इत्यलमतिविस्तरेण । अत्र दृष्टान्तमाह चोरैरित्यादिना । चोरैस्तस्करैररण्यसरणिं वनमार्गं गमितेन प्रापितेन पुंसा पुरुषेण निजः स्वकीयो देशः ग्रामः तदभिज्ञगिरा तदभिज्ञस्य तद्देशमार्गपरिज्ञानवतो गिरा वाचैव गम्यो हि प्राप्यः खलु ॥ अत्रायमभिप्रायः । निशान्धकारवशात् कस्यांचिन्महानद्यां पतितस्तत्प्रवाहवेगेन बहुदूरं नीतस्तत्तीर एव कस्मिंश्चिन्निकुञ्जे नष्टदिग्देशादिसंज्ञश्शीतवातादिभिरतिक्लिश्यमानस्सन् स्थीयमानः कश्चित् पुमान् दैववशादेकस्माद्देशाद्धनमपहृत्य तत्स्वसभागीकरणार्थं तत्रागतैः कैश्चिच्चोरैर्गूढमार्गेणारण्यमार्गं प्रापितस्तद्देशमार्गपरिज्ञातृवचनेन स्वविचारेण च यथा स्वदेशं प्राप्नोति तथा ज्ञानान्धकारवशात्संसारमहानद्यां पतितः कामादिप्रवाहवेगेनातिदूरं प्रापितस्तत्संबन्धिकर्मभूमावेव नष्टात्मानात्मविवेकसन्निहपरगमनागमनादिभिरतिक्लिश्यमानस्सन् स्थीयमानः कश्चित् पुरुषः सत्सङ्गवशादनुष्ठितनिष्कामकर्मभिश्चित्तशुद्धिमार्गेण साधनचतुष्टयमार्गं प्रापितः स्वतत्वविद्वचनेन स्वविचारेण च स्वस्थानमखण्डानन्दैकरसं परं ब्रह्माप्नोतीति । यद्वा गन्धाराद्यो यने नीतस्तस्करैर्बद्धनेत्रकः तस्य बन्धं विमुच्याथ कृपालुर्मार्गमादिशत् । तेनाऽऽदिष्टमविस्मृत्य धीमान् गन्धारमाप्तवान् । एतन्न्यायवद्देशिकोपदेशेन निजपदं ब्रह्माप्नोतीति । अनेन प्रत्यगभिन्नं ब्रह्मैव विषयः तत्प्राप्तिरेव प्रयोजनं प्रतिपाद्यप्रतिपादकसंबन्धः साधनचतुष्टयसंपन्न एवाधिकारीति मुख्यानुबन्धचतुष्टयमप्याविष्कृतं भवति ॥

With the aid of the spiritual instruction imparted by the illustrious preceptor, that most keen of aspirants after final emancipation, possessed of the means of self realisation such

" tranquility and the like, attains his own inherent real state. The man who has been led astray into the tract of wilderness reaches his native home only with the help and advice of one that knows about it.

Notes :— Here in this sloka is explained how the aspirant having come by the necessary mental purity attains thereby final emancipation. The first essential is the cultivation of tranquility and the like which have reference to the discriminatory knowledge of what is real and what is unreal, disinterestedness in the enjoyment of pleasures here and hereafter, the six fold mental states of tranquility and so forth and finally the keen desire for release from all bondage. The word 'Purushottama' means that eminent spiritual aspirant after realisation as contrasted with the ordinary folk hankering after worldly objects. It is also taken to mean a spiritual aspirant deriving the sense from the word Purushottama, the Supreme. The expression निजपदं refers to the original state of its Brahmahood of the nature of Sat, Chit and Ananda. The preceptor referred to here is one learned in the Vedas with his mind ever steadfast in the Supreme. He is to be approached and besought in faith, devotion and readiness of service to him. This is supported by the several scriptural texts to that effect and the dictates of learned Acharyas.

But it may be argued that it is laid down that the soul is not realised either by the words of the preceptor or by the contemplation of the meaning of the Sastras but only by oneself wirth one's own knowledge. This cannot stand since there are positive scriptural texts to the effect that without the preceptor's advice and the knowledge of Sastras, self knowledge cannot be had. If so do the former texts become futile? No. Indirect knowledge

(Parokshajnana) is had through the preceptor and the Sastras, but not direct knowledge or realisation which is to be had by one's own exertion.

Further it is said that even Vasishta, Bhishma and others who have direct knowledge or realisation of the self have not been free from further births. The answer is though they are the chosen agents of the Lord to fulfil certain functions vital to mankind, they cannot escape the consequences of their Prarabda caused by curses and so forth and until that is exhausted they have also to pass through births. Further it has been declared by the scriptural texts that the man of realisation has no further births. न स पुनरावर्तते न स पुनरावर्तते (He does not return to life again).

Again since preceptor, Sastras and the like are included in the effect of ignorance, how can they conduce to the destruction of ignorance and the dawn of knowledge? It is even as the vision of wicked beasts like tigers and so forth in dreams bringing about the destruction of that dreamy state and the dawn of wakefulness.

The doctrine declared in the earlier part of this stanza is made clear by the illustration of a man who has lost his way in wilderness. Just as a man in intense darkness caught in the floods of a river and carried down by the torrents and stranded on a desolate bank finds shelter in a thicket close by exposed to all the cold, hunger and the like and is, by chance coming into contact with a gang of theives who have betaken themselves to that spot to divide and distribute the spoils of booty stolen by them from the city led by them to a forest tract and proceeding from there gains his native home with the help and advice of the neighbouring villagers, the traveller on the way and of his own will guided by intelligence and due consideration so also the man out of the darkness of ignorance

caught in the river of worldly existence, carried down by the current of his Karma (action) and so forth is stranded at last in Karma Bhumi, (the land of rituals and actions). There he bewails his lot not knowing what is real and what is unreal and is tossed about in the cycle of births. At last by the association with the virtuous and with the help of actions done disinterestedly he gains purity of mind and through that and the allied means of self control, his own meditation and the like attains his original state of Brahma of the nature of infinite Absolute Bliss. Here is an emphasis on the sequences of the subject matter of the work. Brahma is the subject matter. Its acquisition is the purpose intended. The relation between the two is that of what is to be treated and what is treated and only the person endowed with the fourfold qualifications is qualified to attain it.

भूमा भवानिति गुरूपनिषद्वचोभिः
कर्त्रात्मता गलति सिद्ध्यति भूमभावः ।
राजात्मजस्य निजतत्वनिबोधनेन
व्याधात्मताविगलनादिव राजभावः ॥ ४

उक्तमेव प्रकारान्तरेण सदृष्टान्तं विस्पष्टयति । देवदत्तस्य गृहप्रवेशवत् किमस्य ब्रह्मप्राप्तिरिति शङ्कापरिहाराय ॥

भूमेति ॥ पूर्वोक्ताधिकारिणः भवान् त्वंपदलक्ष्यार्थः कूटस्थः भूमा तत्पदलक्ष्यार्थः परं ब्रह्मेति त्वमेव प्रत्यक्षं ब्रह्मासीति गुरूपनिषद्वचोभिः गुरुभिर्महद्भिरुपनिषद्वचोभिर्वेदान्तवाक्यैः यद्वा गुरुसामीप्यं ब्रह्मात्मैक्यं नितरां सादयन्ति भक्तान् गमयन्तीति गुरूपनिषदः महावेदान्ताः तासां वचोभिर्वचनैस्सद्गुरुमुखतश्श्रुतवेदान्तमहावाक्यैरित्यर्थः कर्त्रात्मता जीवभावो गलति विनश्यति । भूमभावः ब्रह्मभावस्सिध्यति जायत इत्यर्थः ॥ अत्र दृष्टान्तमाह

राजात्मजस्येत्यादिना ॥ अयं भावः प्रधानद्वारा व्याधोपाधिसंसर्गवशाद्व्याधत्वं प्राप्तः कश्चिद्राजकुमारो दैववशाद्भवान् महाराज एव न तु व्याध इति राजकुमारज्ञकृतोपदेशेन स्वमननेन च व्याधत्वं त्यक्त्वा निजं राजभावमेव यथा प्राप्नोति तथा प्रकृतिद्वारा जीवोपाधिसंसर्गवशाज्जीवत्वं प्राप्तं ब्रह्म दैववशात् त्वं ब्रह्मैवासि न तु जीव इति ब्रह्मज्ञकृतोपदेशेन स्वमननेन च जीवत्वं परित्यज्य निजं ब्रह्मत्वमेव प्राप्नोति । न तु देवदत्तगृहप्रवेशवदिति । अनेन ब्रह्मण एव प्रकृतिद्वारा बन्धमोक्षादिकमित्युक्तं भवति । तदुक्तं संप्रदायविद्भिः स्वाविद्यया हि पर एव सजीवभावमागत्य संसरति लिङ्गसमागमेन । ब्रह्मैव संसरति मुच्यत एतदेव दौवारिकं भवति संसरणं तु तस्य—इति ॥

The idea expressed in the previous verse is herein expressed in another way with an illustration.

With the aid of the great scriptural (Upanishad) texts explained by a spiritual preceptor that you are verily the infinitude (Brahma), one drops off one's individuality and attains that very infinitude even as the (hunter) son of a king on being informed (or becoming aware) of his real nature or status dispels his notion of being a hunter and becomes aware of his princely status.

Notes :— Here the word भवान् has reference to the individual soul (त्वं) as in the Vedantic maxim तत् त्वमसि and the word भूमा to the Supreme soul referred to as तत् therein. The expression गुरूपनिषद्वचोभि means 'with the aid of the great Upanishad maxims' or with the aid of those Vedantic maxims which lead the aspirant to the proximity of the Guru or the identification of the Supreme and the individual soul.

Just as a prince who has identified himself as a hunter, having been brought up in their midst as one of them regains his real status as a prince having been by chance so informed by those who know really of his birth and then himself recognizing as such by his own reflection, so also the Supreme soul through the influence of Nature having taken itself to the adjunct of the individual soul and identified itself as such regains by the aid of a spiritual preceptor that he is not the individual soul as he appears to be but verily the Supreme soul itself and then by his own contemplation about the reality. This is not like one entering another's house, but like oneself regaining one's lost but real state.

ननु निर्विकारस्य परस्य ब्रह्मणः कथं बन्धमोक्षादिकमित्याकांक्षायां विचार्यमाणे ब्रह्मणो बन्धमोक्षादिकं भ्रम एवेत्याह ॥

कूटस्थनित्यसुखबोधतनोः प्रतीचो
बन्धो विमोचनमिति भ्रम दुर्विलासः ।
वन्ध्यासुतस्य वपुरादिगुणप्रपञ्च-
स्तत्पञ्चताऽपि सुतरां परिकल्पनैव ॥ ५

कूटस्थ इति । कूटस्थनित्यसुखबोधतनोः निर्विकाराखण्डानन्दज्ञानं स एव तन्मूर्तिर्यस्य तस्य प्रतीचः प्रत्यगात्मनः यद्वा अधिष्ठानतया देहद्वयावच्छिन्न-चेतनः कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते इति वचनेन कूटस्थः सर्व-विकाररहितः प्रत्यगात्मा तदभिन्नो यो नित्यसुखावबोधः सच्चिदानन्दात्मकं परं ब्रह्म स एव तन्मूर्तिर्यस्य सः कूटस्थनित्यसुखबोधतनुः प्रत्यगभिन्नब्रह्मात्मक-स्तस्य प्रतीचः प्रत्यगात्मनः बन्धः बन्धनं विमोचनं विमुक्तिश्चेति यो व्यवहारः स भ्रमदुर्विलासः भ्रमस्य भ्रान्तेः दुर्विलासो दुःखभाव एव न तु वास्तमित्यर्थः । अत्र दृष्टान्तमाह । वन्ध्यासुतस्य वन्ध्यायाः अप्रसूतायास्सुतस्यात्मजस्य वपु-रादिगुणप्रपञ्चश्शरीरगुणविस्तारस्तत्पञ्चताऽपि तस्य वन्ध्यासुतस्य पञ्चता मृति-

रपि सुतरां परिकल्पनैव नितरामारोप एव न तु सत्यमित्यर्थः । निर्विकार-परिपूर्णसच्चिदानन्दरूपस्य परस्य ब्रह्मणो बन्धमोक्षादिकमज्ञदृष्ट्या प्रतीयमानमपि तज्ज्ञदृष्ट्या सम्यक्‌विचार्यमाणे वन्ध्यपुत्रस्य शरीरतन्नाशादिवन्नास्त्येवेति-भाव: । तदुक्तं भगवता । बन्धो मोक्ष इति व्याख्या गुणतो मे न वस्तुतः । गुणस्य मायाकार्यत्वान्न मे मोक्षो न बन्धनम् । आचार्यैश्च । भ्रान्तिं विनात्व-सङ्गस्य निष्क्रियस्य निराकृतेः । न घटेतार्थसंबन्धो नभसो नीलतादिवत् । स्वस्य द्रष्टुर्निर्गुणस्याक्रियस्य प्रत्यग्बोधानन्दरूपस्य बुद्धेः भ्रान्त्या प्राप्तो जीव-भावो न सत्यो मोहापाये नास्ति वस्तुस्वभावादिति ॥

The notions of bondage and release are only the ill-turn of delusion of the individual soul which is but the Supreme Brahma of the nature not liable to any modification, eternal, blissful and of knowledge. The conception of the various adjuncts of body and the like and of the death of a barren woman's son is indeed but a major superimposition (i. e. the product of mere fancy).

Notes :— The expression कूटस्थनित्यसुखबोधतनोः may be explained as 'of the form or nature changeless' (कूटस्थ) eternal, blissful and of knowledge, or of the form of the prop of and different from the two bodies gross and the subtle and eternal not different from the Supreme soul, which is eternal, blissful and of knowledge. To the ignorant it may appear that the Supreme or the individual soul is subject to bondage and release, but to the realised it will be clear that there is no such thing at all.

नन्वस्य प्रपञ्चस्य प्रत्यक्षेणानुभूयमानत्वे सति कथं बन्धमोक्षा-दिकमात्मनो नास्तीत्याशङ्कां निरसितुम् । 'नाऽसतो विद्यते भावो

नाऽभावो विद्यते सतः' इति न्यायेन जगतोऽसत्वमात्मनस्सत्वं च साधयति सप्तभिः ॥

आपाततः प्रतिभया जगदस्तिवादः
सत्यं निरूपणविधौ न हि किञ्चिदस्ति ।
भीरोर्विभाति परितस्तिमिरं पिशाच-
स्तत्रैव दीपकलिकाऽऽनयते किमस्ति ॥ ६

आपाततः इति । आपाततः अविचारितः प्रतिभया आभासज्ञानेन जगद्ज्ञानतत्कार्यं समष्टिव्यष्ट्यात्मकं सत्यं वास्तवमिति वादोऽस्ति व्यवहारो वर्तते । निरूपणविधौ सम्यग्विचार्यमाणे किञ्चिदपि नास्ति हि किमप्यज्ञानतत्कार्यलक्षणं वस्तु न भवति खलु । अत्र दृष्टान्तः । भीरोर्भयशीलस्य बालस्य परितः सर्वतोवर्तमानं तिमिरं पिशाच इति भाति । पुनस्तत्रैव दीपकलिकाऽऽनयने यस्मिन् देशे पिशाचभ्रमस्तस्मिन् देश एव प्रदीपकोरकाप्रापणे सति किमस्ति न किमपीत्यर्थः । यथा तिमिरावृतदशायां भयशीलस्य बालस्य परितः प्रसारितं तिमिरं स्वभिन्न पिशाचरूपेण प्रकाशते । पुनर्भीत्या प्ररोदनादिपुरस्सरं स्वपितरमुपसृत्य तत्कृपावशादुपात्तदीपप्रकाशावृतदशायां स्वभिन्नत्वेन प्रतीतस्य पिशाचस्यासत्वं स्वस्यैव सत्वं च प्रकाशते । तथाऽज्ञानावृतदशायां भ्रान्तस्य पुरुषस्य परितः प्रसारितमज्ञानं स्वभिन्नप्रपञ्चरूपेण प्रकाशते । पुनराध्यात्मिकादिपरितापेन परापरविरागादिसाधनपुरस्सरं परमगुरुमुपसृत्य तत्कृपावशादुपात्त सम्यक्ज्ञानप्रकाशावृतदशायां स्वभिन्नत्वेन प्रतीतस्य जगतोऽसत्वं स्वस्यैव सत्वं च प्रकाशते । तेजस्तिमिरयोरिव ज्ञानाज्ञानयोः परस्परविरोधित्वेनैकाधिकरणत्वाभावादिति भावः । यावद्भ्रान्तिस्तावदेवास्य सत्ता । मिथ्याऽज्ञानोज्जृम्भितस्य पमादात् रज्वां सर्पोभ्रान्तिः कालीन एव भ्रान्तेर्नाशेनैव सर्पोऽपि तद्वत् । सदिदं परमाद्वैतं स्वस्मादन्यस्य वस्तुनोभावात् । न ह्यन्यदस्ति किञ्चित्सम्यक्परमार्थतत्वबोधदशायाम् । यदिदं सकलं विश्वं नानारूपं प्रतीतमज्ञानात् तत्सर्वं ब्रह्मैव प्रत्यस्ताशेषभावनादोषमित्यादिशास्त्रप्रसिद्धिं विद्वदनुभूतिं च द्योतयति हि शब्दः ॥

When this worldly phenomenon is being directly experienced by all, how can it be said that the soul has neither bondage nor release? This doubt is cleared by the following seven slokas whereby the unreality of the world and the reality of the soul are established.

At first owing to the knowledge based on appearance, there prevails the theory that the world is real, but on investigation there is nothing of the sort. The coward sees the ghost in the darkness all round but is there anything seen when a streak of light is brought in?

Notes:— The appearance of a world as existing is due to one's lack of due consideration and to a false knowledge based on such mere appearance. This fact is explained by the illustration of a coward who sees the ghost in the darkness around him who sees the reality of the situation with the aid of a light brought therein. So also, in the state of ignorance, the deluded one sees as the result of that delusion the existence of a world as distinct from him, but this delusion disappears when owing to his keenness for spiritual enlightenment, his aversion for things worldly, the acquisition of the necessary qualifications and the aid of the spiritual preceptor, real light dawns in him and he experiences the reality. The apparent reality of the worldly phenomenon lasts only as long as there is delusion of the mind. When that delusion is dispelled with the dawn of knowledge it would be seen that it has no reality, as the mistaken notion of the rope as serpent ceases to exist when light is brought

into the place. This truth that the only reality is Brahma will down then. It is corroborated by scriptural texts quoted in the commentary at the end and by the experience of the realised.

चिज्ज्योतिरेव जगदात्मतया चकास्ति
वस्त्वन्तरं किमपि नास्ति विचार्यमाणे ।
रज्ज्वौ भ्रमाधिकरणादपि रज्जुसर्प
तत्वान्तरं भवितुमर्हति किं कथञ्चित् ॥ ७

चिज्ज्योतिरिति ॥ यद्यप्यापातदृष्ट्या जगत् स्वभिन्नतया प्रतीयते तथाऽपि विचार्यमाणे स्वाचार्यवर्यमुखतः श्रुतियुक्त्यनुभवैरसम्यगालोच्यमाने सति यत् कालत्रयेऽपि सर्वास्ववस्थास्वितरानपेक्षं स्वयमेव प्रकाशते तच्चिज्ज्योतिस्संवित् प्रकाशः परं ब्रह्म तदेव जगदात्मतया समस्तभूतभौतिकप्रपञ्चाकारतया चकास्ति प्रकाशते ॥ वस्त्वन्तरमितरवस्तु किमपि नास्ति । सद्विदं सर्वं चिद्विदं सर्वं । सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन । सर्वं ह्येतत् ब्रह्म । मत्त. परतरं नान्यत् किञ्चिदस्ति धनञ्जय । आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न किञ्चन । यदस्ति यत् भाति तदात्मरूपं नान्यत्ततो भाति न चान्यदस्ति । स्वभावसंवित् प्रतिभाति केवलाग्राह्यं गृहीतेति मृषाविकल्प —इत्यादि श्रुतिभगवदाचार्य वसिष्ठवचनादिति भावः । नन्वेवं सति घटादौ नष्टे सति ब्रह्मणोऽपि नाशप्रसङ्गस्स्यादिति चेन्न । ब्रह्मणस्तद्विवर्तोपादानत्वेन विकारित्वानुपपत्तेः । अत्र दृष्टान्तमाह । रज्ज्वौ मन्दान्धकारस्थरज्जुखण्डे भ्रमाधिकरणात् सर्पभ्रान्त्यधिष्ठानादपि रज्जु सर्प तत्वान्तरं रज्जुरिव रूपो रज्जुसर्पः रज्जुभुजगः स एव तत्वान्तरं स्वरूपान्तरं भवितुं कथञ्चिदप्यर्हति किं नार्हतीत्यर्थः ॥

It is verily the light of Brahma that shines in the form of the universe. On real consideration there is no other object whatsoever. Owing to the delusion of mind, does the

mistaken notion of snake in the rope tend to be anything other than itself.

Note :— Though at first sight the universe appears to be a separate entity different from Brahma, on real consideration in the light of the advice of the seers of revelation, of the scriptural texts, of reason and experience, it will be seen that eternal light shines of itself at all times independent of any other object. That light of consciousness is the Supreme Brahma. That itself shines in the multiple forms of objects animate and inanimate and of the universe. There is no other object, but that Supreme Brahma. The scriptures declare "All this is Sat, all this is conscious (chit), all this is Brahma, there is nothing here as many. All this is Brahma. The Lord says—'O Dhananjaya ! there is nothing whatsoever, different from Me'. Further 'This entire universe is verily the Atman (Brahma), there is nothing else. Whatsoever, exists or appears that is all but the form of Atma. Nothing exists, nothing appears besides that Atman. The primeval consciousness shines alone of itself. It is a false notion—that you have grasped the ungraspable. Thus preach the Srutis, the Lord and the preceptors like Vasishta and so forth. If this is so, then on the destruction of the pot and the like, the should not destruction of Brahma also take place. No. It need not and does not. Brahma being the material cause to which everything returns in the long run is not susceptible of any modification in itself.

To illustrate :— A rope is mistaken for a snake at times owing to the prevailing intense darkness. Can it be said that that mistaken notion of the snake in the rope will ever be anything real but a mistaken notion ? No, not at all at any time.

विश्वं समस्तमपि विभ्रममात्रमेत-
दात्मैव सन्नयमनन्यसुखप्रकाशः ।
स्फूर्त्यैव विश्वमपि सत्यमितीर्यते चेत्
को नाम शुक्तिरजतेन धनीनभावि ॥ ८

विश्वमिति ॥ एतद्दृश्यमानमव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं सर्वमपि विश्वं जगत् विभ्रममात्रं विविधभ्रान्तिमात्रं न तु वास्तवमित्यर्थः । तर्हि वास्तवं किमित्याकांक्षायामाह आत्मेति । अयं आत्मैव प्रत्यगभिन्नं ब्रह्मैव, अयमात्मा ब्रह्मेत्यादिश्रुतेः सत् कालत्रयेऽपि येनकेनाप्यबाध्यमानः नान्यत् । आत्मा वा इदमग्र आसीत् । एतदात्म्यमिदं सर्वं तत्सत्यमित्यादिश्रुतेः । नन्वात्मन एव सत्यस्वरूपमस्तु । सुखमनुभवितुमिच्छाभवति चेत् स्रक्चन्दनवनिताद्यैहिकामुष्मिकसुखसाधनानि साधनीयान्येव । तस्मात् प्रपञ्चस्यापि सत्यत्वमङ्गीकर्तव्यमेवेत्याशङ्कां विनाशयितुमात्मानं विशिनष्टि अनन्यसुखप्रकाश इति ॥ अन्यौ सुखप्रकाशौ विषयानन्दादित्यादि लक्षणौ यत्र न स्तस्सोनन्यसुखप्रकाशश्चिदानन्दरूपः । यद्वा अनन्यसुखप्रकाशः स्रक्चन्दनवनितादिजनितविषयानन्दस्फूर्तिर्यत्र नास्ति सः । यद्वा अन्यरहितसुखप्रकाशः विजातीयानन्तरिताखण्डानन्दस्फूर्तिरित्यर्थः । यद्वा अन्यैर्मृष्टान्नभोजनस्रक्चन्दनवनिताद्यैहिकविषयैरप्सरोवनिताद्यामुष्मिकविषयैर्वा यः सुखप्रकाशः आनन्दस्फूर्तिः स न भवतीत्यनन्यसुखप्रकाशः । यद्वा स्वस्मात् परोऽन्यसुखप्रकाशस्स्वाज्ञानवशात् स्वभिन्नतया प्रतीयमानब्रह्मादिपिपीलिकान्तसकलप्राणिगतसुखस्फूर्तिनास्तीत्यनन्यसुखप्रकाशः नित्यनिरतिशयाखण्डानन्दस्फूर्तिः । एतस्यैवानन्दस्यान्यानि भूतानि मात्रामुपजीवन्ति इति श्रुतेः । यद्वा ननु ब्रह्मादिसुखव्यक्त्योस्स्वभिन्नत्वेन दृश्यमानत्वे सति कथमात्मन एव सत्वमित्याशङ्कां परिहरति अनन्यसुखप्रकाश इति । अन्यौ स्वाज्ञानवशात् स्वभिन्नत्वेन प्रतीयमानौ सुखप्रकाशौ ब्रह्माद्यानन्दतद्देहौ स्वस्मात् परतो न भवतः इत्यनन्यसुखप्रकाशः स्वभिन्नसत्ताभावादिति भावः । आत्मैवेदं सर्वं सर्वं खल्विदं ब्रह्म, नेह नानास्ति किञ्चनेत्यादि श्रुतेः एतद्विलक्षणं ब्रह्म, ब्रह्मणोऽन्यन्न किञ्चन ब्रह्मान्यत् भाति चेन्मिथ्या यथा मरुमरीचिकेत्याचार्यवचनाच्च

हेतुगर्भितमेतद्विशेषणं आत्मैव सद्रूपः अनन्यसुखप्रकाशत्वाद्यन्नैवं तन्नैवं यथा घटादिः ॥ ननु स्फूर्त्यैव घटपटादिव्यक्त्यैव हेतुना विश्वमपि सत्यं वास्तवमितीर्यते प्रोच्यते ईक्षत इति पाठे तु ईक्ष्यते दृश्यते चेत् तर्हि को नाम पुरुषश्शुक्तिरजतेन शुक्तिकारोपितरौप्येण धनी धनभावी धनाढ्याधिपाभिमानी न कोप्यातपस्थितशुक्तिप्रतीतरजतेन राजराजाभिमानवान् भवतीत्यर्थः। आत्मभिन्नतया जगद्भातीति चेत् शुक्तिरजतवन्मिथ्येति भावः ॥

This entire universe is but a delusion. Verily Atman alone is real and of incomparable Bliss and Effulgence. If it is argued that the universe also is real because of its manifestation then is there indeed any person that would exult in the pride of being rich on account of the possession of the silver-like oyster shell ?

Note :— This entire universe is but a product of delusion, and not real. Then what is real ? Atman alone is real and eternal uninfluenced by the present, past or future. The scriptures proclaim that Atman alone was in existence before. Anything else is of it and that alone is real.

Let Atman be verily real. If one desires to enjoy happiness, then one has to come by objects of pleasure of this world and thereafter. Hence the phenomenal universe also should be real. To dispel such a doubt it is set forth that Atman is Ananya Sukhaprakasah. It can be explained in several ways i. e. wherein is not 1 any other happiness or effulgence of any worldly object or pleasure—Atman is of the instrinsic nature of reality, consciousness and Bliss absolute ; 2 the worldly pleasure born of worldly objects of pleasure ; 3 or fulness of Bliss absolute unalloyed ; 4 or an extraordinary

Bliss that shares not the nature of the objects of the world like sumptuous food and the like or of the heaven like celestial damsels and so forth; 5 or that eternal, unsurpassed and full Bliss unlike the ordinary pleasure of beings born of their ignorance of their real nature which is Bliss absolute—the scriptures declare that beings live upon but a particle of that Bliss Supreme; 6 or to dispel the doubt as to how the Atman alone can be real when the Bliss of Brahma and the like are seen as different from one's self it is explained that the other worldly pleasures which are conceived to be real through ignorance are not different from that of Atman. For the scriptures declare 'All this is verily Atman, All this is Brahma, there is nothing here as many' and so on. This Brahma is the one real. There is nothing other than Brahma. If anything appears as different from Brahma, it is unreal as the mirage in the desert. So says the preceptor. If by the mere fact of the manifested existence of objects as pot, cloth etc. this universe also is considered real, then will any person exult as rich and opulent on the possession of silver like oyster shells? Not at all. The idea conveyed is that the universe appearing different from Brahma, is as unreal as silver like oyster shell being of real silver.

नास्ति प्रतीत्यवसरे न पुरा न पश्चा-
दाश्चर्यमेतदवभाति तथाऽपि विश्वम् ।
यद्वा किमद्भुतमिवेह महेन्द्रजालं
मायाविकल्पितमिति प्रतिभासते हि ॥ ९

नास्तीति ॥ मायाविकल्पितं मायया विविधं कल्पितमत एव विश्वं जगत् प्रतीत्यवसरे वर्तमानकाले पुरा भूतकाले पश्चात् भाविकाले च नास्ति न भवति । तथा अपि एतदुक्तलक्षणमव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं जगत्

अवभाति इति यत् तत् आश्चर्यं किं वा नाश्चर्यमित्यर्थः । इह अस्मिन् लोके अद्भुतमिव आश्चर्यमिव महेन्द्रजालं मायाविकल्पितं मायाविना माहेन्द्रजालिकेन कल्पितं इन्द्रावितमिति प्रतिभासते हि द्रष्टृणामवभासते खलु । दृश्यमानस्यापि जगतो मायाविकल्पितत्वात् महेन्द्रजालवत् प्रतीतिमात्रमेवेति भावः । तदुक्तं विद्यारण्यमुनिभिः इन्द्रजालमिदं द्वैतमचिन्त्यरचनात्वत इति ॥

This universe has no existence at the present—the time of our perception of it, nor had it in the past, nor will have it in the future. Yet is it a wonder that it appears so? Here in this world a feat of jugglery conjured up by a magician does indeed appear as a wonder. The universe though it is seen to exist as such is but mere appearance. Hence it has been declared by the sage Vidyaranya that this notion of duality is but magical.

एकोऽपि सन्नयमनेकतया विभाति
भूमा स्वकल्पिततमः पटलानुषङ्गात् ।
इन्दुर्द्वितीयरहितोऽपि च सद्वितीय-
भावेन भाति पुरुषस्य निजाक्षिदोषात् ॥ १०

एक इति ॥ यत्र नान्यत् पश्यति नान्यच्छृणोति न न्यद्विजानाति स भूमा यो वै भूमा तदमृतं एकमेवाद्वितीयं ब्रह्मेत्यादि श्रुतेः सन् कालत्रयाबाध्यमानोऽयं भूमा स्वप्रकाशापरोक्षप्रत्यगभिन्नं परं ब्रह्म एकोऽप्यद्वितीयस्वरूपमपि स्वकल्पित तमः पटलानुषङ्गात् स्वेनाऽऽत्मनैव सोपाधिकेन कल्पितस्य आरोपितस्य तमः पटलस्याज्ञानतिमिरनिकरस्य सकार्यस्यानुषङ्गादनुसंबन्धात् । यद्वा स्वस्मिन्नद्वितीये परे ब्रह्मणि कल्पितानामनादिमायारोपितानां तमः पटलानामज्ञानतिमिरतत्कार्यनिकराणामनुषङ्गादनुसंबन्धादध्याससंबन्धाद्धेतोरिति

यावत् । अनेकतया देवमनुष्यतिर्यगादिरूपेणासंख्यतया विभाति विशेषेण प्रकाशते । एकस्सन् भिद्यते भ्रान्त्या मायया न स्वरूपत: । इन्द्रोमायाभि: पुरूरूपं ईयते इत्यादि श्रुतेः । तथा हि इन्दुश्चन्द्रोऽद्वितीयरहितोऽपि एकोऽपि पुरुषस्य चन्द्रद्रष्टुनिजाक्षिदोषात् निजयोः स्वकीययोरक्ष्णोश्चक्षुषोर्यो दोषस्तैमिरिकादिलक्षणस्तस्माद्धेतोस्सद्वितीयभावेन सद्वितीयत्वेन भाति द्विचन्द्रत्वेन प्रतीयत इत्यर्थ: । स्वव्यतिरिक्तस्य सर्वस्याप्यज्ञानारोपितत्वेनासत्यत्वादात्मैव सत्यज्ञानानन्दस्वरूपस्सर्वत्र प्रकाशते न तु जगदिति भाव: ॥

The Eternal Plenitude (Bhuma) though but one appears as many on account of Its association with the mass of ignorance superimposed on It by Itself. For instance the moon though but one appears double to the man of defective eye sight.

Notes :— Where nothing else is seen, nor heard nor cognised but is, is what is called Bhuma. The scripture declares that as Bhuma, which is ever existent, the one is without a second, Brahma and so forth. That Bhuma or Brahma is *Sat* i. e. everlasting uninfluenced by the three moods of time present, past and future. That Bhuma is self-effulgent Supreme Brahma which is not different or separate from the individual soul. That Brahma though really but one without a second appears as many on account of Its contact with ignorance super imposed on It by Itself. The expression 'Swakalpita' may also be explained as 'superimposed on It by the beginningless Maya or illusion. It is on account of that Adhyasa or erroneous superimposition as a result of ignorance that the one Brahma appears as many. The scripture says that one Brahma eternal is seen as many through delusion and not intrinsically. This truth is illustrated by the appearance of a double moon when there

is but one to the man of defective eyesight caused by cataract and like eye diseases. In short everything that appears different from Brahma is unreal, being but the result of an erroneous superimposition of ignorance. Atman alone, which is of the nature of Satya (truth), Jnana (knowledge) and Ananda (Bliss) shines everywhere, and not the universe.

आलोक्यते भुवनचक्रमलातचक्र-
मत्यन्तविभ्रमविजृंभितमस्थिरं च ।
दैवात् भ्रमस्यविरतौ समुपस्थितायां
नालोक्यते किल पुरेव पुनस्तदेव ॥ ११

आलोक्यत इति ॥ अत्यन्तविभ्रमेण स्वान्तनितान्तविभ्रान्त्या हस्तनितान्तचलनेन च विजृम्भितं विस्फुरितमत एवास्थिरं बुद्बुदवन्नश्वरं यत् भुवनचक्रं विश्वमण्डलं अलातचक्रं उन्मुकमण्डलं चालोक्यते मूढजनैरवलोक्यते-तदेव पुनर्भुवनालातचक्रद्वयमेव पश्चाद्दैवात् भाग्यवशात् यदृच्छया च भ्रमस्य भुवनालातचक्रयो भ्रमस्यविरतौ भ्रमणस्य विरामे समुपस्थितायां संप्राप्तायां पुरेव पूर्ववन्नालोक्यते किल न दृश्यते खलु। हस्तभ्रमणवशात् सत्यत्वेन प्रतीयमानालातमण्डलवदज्ञानदशायां समस्तनानावासनानिमित्तचित्तभ्रमवशात् सत्यत्वेन प्रतीयमानं प्रपञ्चमण्डलं घुणाक्षरन्यायेन यदृच्छाप्राप्तसत्सङ्गवशादीश्वरार्पणबुद्ध्या श्रद्धाभक्तिभ्यां सम्यगाचरित नित्यनैमित्तिक प्रायश्चित्तोपात्त चित्तशुद्धिसाधन सम्पत्तिसद्गुरूपसत्तिश्रवणमनननिदिध्यासनद्वारोपात्त सम्यक्ज्ञानदशायां समस्तनानावासन विनाशनिमित्तचित्तैकाग्र्यवशान्नपूर्ववत् सत्यत्वेन दृश्यत इति भावः। एतेन चले चित्ते भवेच्छक्तिः स्थिरे चित्ते सदाशिव इति न्यायेन चित्तभ्रमदशायामज्ञान तत्कार्यप्रतीपस्स्यात् तत्भ्रान्तिशान्तिदशायां तु सच्चिदानन्दाद्वितीयब्रह्ममात्रं प्रकाशत इति सूचितं भवति ॥

It is seen (by the ignorant) that the universe and the circlet of a waving torch exist as

such, which are transcient, being projected by the delusion of the mind and the waving of the hand respectively. When again by chance that very delusion ceases to exist, those two also are not seen to exist (as real).

Notes :— The expression अत्यन्तविभ्रम means the intense delusion of the mind in the case of the universe and the incessant waving of the hand holding the torch in the case of the torch circlet विजृंभितं means projected. अस्थिरं means transcient, perishable like bubbles. When by chance or luck on account of the association with the virtuous, with a mind entirely dedicated to God, with purity of mind born of the due performance of all duties enjoined by the Sastras in full faith and devotion, by the acquisition of all other aids of spiritual development and by sitting at the feet of the Guru and hearing his advice, by one's own thinking over it and deep meditation spiritual light is kindled within with the destruction of all impressions of the past actions good and bad, in that state of keen concentration of the mind, the world does not appear real as it did before. In an unsteady mind of delusion there exist ignorance and all its byproducts, but when that delusion ceases there shines the one Brahma of the nature of Sat, Chit and Ananda. The expression घुणाक्षरन्याय referred to in the commentary is a maxim to denote a chance occurrence. The incision made in wood or in the leaf of a book by an insect (घुण) at times by chance resembles a letter of the alphabet and hence any chance occurrence.

गन्धर्वपत्तनमिदं जगदव्यवस्थं
चैतन्यनामनि विहायसि नश्चकास्ति ।

विद्योतते यदि च विद्युदिवात्मविद्या
सद्यस्तिरोभवति सर्वमिदं तदैव ॥ १२

गन्धर्वपत्तनमिति ॥ किं बहुना चैतन्यनामनि चिदाह्वये विहायसि नभसि निस्सङ्गे परिपूर्णे परस्मिन् ब्रह्मणीति यावत् अव्यवस्थं व्यवस्थाशून्यमिदं परिदृश्यमानं जगदव्यक्तादि स्थूलान्तं समष्टिव्यष्ट्यात्मकं विष्टपं सर्वं गन्धर्वपत्तनं गन्धर्वनगरं गन्धर्वनगरं नाम राजनगराकारस्सितासितपीतादिजीमूतरचनाविशेषस्तदिति नोऽस्माकं कृतश्रवणादीनां चकास्ति तद्वन्मिथ्येति प्रतिभातीत्यर्थः । तत्र कारणमाह । चेत्यस्मात् कारणात् विद्युदिव सौदामिनीवात्मविद्या आत्मज्ञानं विद्योतते यदि प्रकाशते चेत् तदैवात्मज्ञानोदयसमये एव तयैवेति पाठे तयैव विद्ययैवेदं परिदृश्यमानं जगत्सर्वं सद्यः सत्वरं तिरोभवति अदृश्यतां प्राप्नोति तस्मादित्यर्थः ॥ यद्वा नन्वस्माकं प्रत्यक्षेण दृश्यमानं जगत् सत्यमेवेति प्रतीयते । कथं भवद्भिर्गन्धर्वपुरवन्मिथ्येत्युच्यते इत्याकांक्षायामाह विद्योतते इत्यादिना । यद्यपि विश्वमज्ञदृष्ट्या विद्योतते सत्यत्वेन प्रकाशते तथाप्यात्मविद्या सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च ब्रह्मत्वविज्ञानरूपिणी यदा विद्योतते सद्गुरुमुखतस्सुकृत वेदान्तश्रवणमननादिद्वारा सम्यक् प्रकाशते । तदैव सम्यग्ज्ञानोदयसमय एवेमज्ञदृष्टिप्रदृष्टं व्यष्टिसमष्ट्यात्मकं विष्टपं विद्युदिव सद्यस्सत्वरं तिरोभवति निश्शेषमदृश्यतां गच्छति । भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावर इति श्रुतेः । तस्मात् परिपूर्णचिदाकाशस्वरूपे परे ब्रह्मणि स्वाज्ञानावस्थायामवस्थायीव प्रतीयमाना ब्रह्मस्तंभपर्यन्तं जगदात्मकं जगत्सर्वमात्मज्ञानोत्पत्त्युत्तरक्षणानवस्थायित्वादाकाशे गन्धर्वपुरवन्मिथ्यैवेति सिद्धम् ॥ एतेन मरुजले यथा मीनाः खे गन्धर्वपुरं यथा यथा वन्ध्यासुतस्यापि विवाहाडंबरं महत् । आत्मज्ञाने तथेदन्तु मृषा सर्वं भवेदितिन्यायेन सम्यगात्मज्ञाने सति सुखदुःखादिवैचित्र्यकथनं जननमरणादिकथनं पुत्रमित्रकलत्रादिकथनं पुण्यपापादिकर्मकरणं वेदाध्ययनादिकमन्यच्च सर्वमात्मज्ञानदशायां मृषैवेति सूचितं भवति ॥

In the firmament of Chit namely Supreme Brahma this universe appears to us as unreal

as the city in the air. If like lightning, the knowledge of Atman sparkles within, then at that very moment, all this (visible world) ceases to exist as such.

Notes:— The apparent appearance of the universe as such is as unreal as the city of Gandharvas (a class of demi Gods) in the air or sky. The Gandharva Nagara alluded to here is that collection of clouds, dark, white, and yellow in colour gathered up in the sky giving the appearance of a city of coloured buildings and the like. It has no stability but disappears in a short time or changes into other shapes To one who has had the spiritual advice of a Guru, this imaginary form of a city has no reality when the knowledge of Atman like lightning sparkles within. If for the reading तद्वैव at the end, we take the other reading तयैव it should be explained as तयैवात्मविद्यया (by that very knowledge of the Atman). Here it may be argued that the world has a reality since it is actually visible before us. Then how can it be likened to the imaginary city of Gandharvas? This is answered as follows:— If out of ignorance the world appears as real, then as soon as the knowledge of the Atman dawns within as a result of spiritual advice of the Guru and the consequent spiritual exercise enjoined by him all this visible phenomena of the universe suddenly disappear. In support of this is the scriptural text 'when that Supreme is realised, all knots of the mind are cut, all doubts are dispelled, and all the fruits of one's actions prior to that realisation get exhausted as not to generate any further effect. Hence what appeared to exist as real in that state of ignorance of the true knowledge of Atman, disappears all at once with the dawn of that

knowledge and one realises that the erstwhile knowledge was as unreal as the imaginary city of Gandharvas in the sky. As the fish in the mirage, as a city in the sky and as the pomp and splendour of the marriage of a son of a barren woman, this world also is unreal on the dawn of Atmajnana. In the fulness of that knowledge of Atman there is no talk of happiness or misery, birth or death, nor the worldly ties of son, friend, wife and so forth, nor the performance of actions conducive to merit or demerit nor the study of Vedas and so forth. All these would appear false or unreal.

आरोपितस्य जगतः प्रविलापनेन
चित्तं शिवात्मकतया परिशिष्यते नः ।
शत्रून् निहत्य हतयन्तुरधोनिपातात्
गन्धद्विपो भवति केवलमद्वितीयः ॥ १३

एवं जगतोऽसत्वं तद्विलक्षणस्यात्मन एव सत्वं च प्रतिपाद्य संप्रति जिज्ञासूनामात्मज्ञानावगमाय कैवल्यप्राप्तिप्रकारं सहोपायमुपदिशति कृपालुर्देशिकेन्द्रः ॥

आरोपितस्येति ॥ अद्वितीये शिवे सच्चिदानन्दैकरसे परे ब्रह्मण्यारोपितस्य रज्जौ सर्पवत् कल्पितस्य जगतः प्रपञ्चस्याव्यक्तादिस्थूलान्तस्य समष्टिव्यष्ट्यात्मकस्य सेश्वरस्य प्रविलापनेनोत्पत्तिप्रातिलोम्येन यत् प्रकर्षेण विलापनं कार्यकारणाभेदन्यायेन निश्शेषादृश्यप्रापणं तेन नोऽस्माकमनुसन्धावतां चित्तमन्तःकरणवृत्तिः शिवात्मकतया मङ्गलस्वरूपतया सत्यज्ञानानन्दानन्ताद्वयब्रह्मात्मतया परिशिष्यते अवशिष्यते ॥ यच्छेद्वाङ्मनसी प्राज्ञस्तद्यच्छेज्ज्ञान आत्मनि । ज्ञानमात्मनि महति नियच्छेत्तद्यच्छेच्छान्त आत्मनि—इति । जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते ज्योतिष्यापः प्रलीयते ज्योतिर्वायौ प्रलीयते वायुश्च लीयते व्योम्नि तच्चाव्यक्ते प्रलीयते अव्यक्तं पुरुषे ब्रह्म निष्कले

संप्रलीयते ॥ शनैश्शनैरुपरमेत् बुद्ध्या धृतिगृहीतया आत्मसंस्थं मनः कृत्वा न किञ्चिदपि चिन्तयेत् । आत्मन्येवाखिलं दृश्यं प्रविलाप्य धिया सुधीः भावयेदेकमात्मानं निर्मलाकाशवत् सदा ॥ इत्यादि श्रुतिस्मृतिभगवदाचार्यवचनशतेभ्यः ॥ अत्र दृष्टान्तमाह ॥ गन्धद्विपो मत्तगजः शत्रून् अमित्रान् निहत्य निश्शेषं नाशयित्वा हतयन्तुः घातयितुः अधोनिपातात् अधोनिक्षेपणात् मारणादिति यावत् अद्वितीयः केवलं भवति द्वितीयरहित एवास्ति । अत्रायमभिप्रायः सम्यक् श्रद्धाभक्तिशुश्रूषादि सन्तुष्टसद्गुरुवरमुखतोऽध्यारोपनिरसनपुरस्सरं महावाक्यार्थे सम्यक् श्रवणे मनने च कृते सत्युत्तमाधिकारिणां नित्यशुद्धबुद्धमुक्तस्वभावनिरतिशयाखण्डसच्चिदानन्दैकरसं परं ब्रह्मैवाहमस्मीति तदाकारा चित्तवृत्तिरुत्पद्यते ॥ तया चैतन्यप्रतिबिम्बसहितया ब्रह्मगताज्ञाने निश्शेषं विनष्टे सति तत्कार्याणामपि निश्शेषविनष्टत्वात् कार्यान्तर्भूता सा चित्तवृत्तिरपि निश्शेषं विनश्यति ॥ तदा तत्प्रतिबिम्बितचैतन्यमपि सूर्यसन्नसन्नदीपप्रकाशवत् ब्रह्मासन्नसन्नप्रकाशं सदाऽदर्शविनाशे तत्प्रतिबिम्बितवक्त्रवत् बिम्बभूताखण्डानन्दैकरसब्रह्ममात्रं भवतीति ॥

By complete effacement of the superimposed universe, our Chitta or mind remains of the nature of Siva i. e. Supreme Brahma. The infuriated lordly elephant after destroying the enemies and throwing down the keeper (its master) remains alone without a second.

Having explained the unreality of the universe and established the reality of the Atman the compassionate proceeds to impart advice as to the way to attain Kaivalya (oneness) with the means thereof for the enlightenment of the spiritual aspirant.

Notes :— Like the mistaken notion of the serpent arising on seeing a rope, the concept of the universe is one

superimposed on Brahma of the nature of Sat, Chit and Ananda. By getting effaced in the reverse process of creation that concept of the unreal universe in all its aspects, collective and individual with a God over it, the Chitta or mind of those given to incessant contemplation of the Supreme Brahma as the sole one without a second ultimately remains of the nature of that Supreme Brahma which is Sat, Chit and Ananda. The scriptures like Srutis and Smritis and the sayings of the preceptor as well support the above truth thus: The organ of speech and the allied organs of sense should be drawn in unto the mind, the mind unto the Buddhi or intellect; the Buddhi unto the Mahat and the Mahat unto the Supreme Brahma. Further, the earth gets ultimately dissolved in water, the water in light, the light in wind, the wind in sky (ether), the sky or ether in Avyakta (primary matter) and the Avyakta in the Supreme Brahma. With an unflinching resolve, one should very slowly retire from worldly activities. Drawing in the mind unto Atman, one should not think of anything other than the Brahma. Seeing everything in the Atman without any notion of separate existence or entity for them, one should meditate on that one Atman alone like unto the all engrossing pure sky. The above mentioned fact is illustrated by the example of the elephant which kills its enemies (the products of nescience) and its own master (the individual soul). The gist of the verse is: One should win the favour of a preceptor or Guru by ardent faith, devotion and service to him. He must listen to the spiritual advice of the Guru thus pleased and by the elimination of all superimposed notions meditate on the great maxims explained by him and gradually with a Chitta or mind completely overpowered by the truth. "I am Brahma the eternal, immaculate, the

conscious, the liberated and of the nature of Sat, Chit and Ananda." With a mind along with the individual soul thus transformed and ignorance about Brahma and its effects completely effaced, the inward working of the mind which is also an effect of that ignorance is destroyed. The individual soul which is but a reflection of the Supreme soul in the mind becomes faded before the refulgent Brahma even like the lamp fading before the sun. Like the refleted image of the face disappearing when the mirror is destroyed there remains in the mind only the Brahma of the nature of full absolute Bliss when the original ignorance and its effects are destroyed by the dawn of real spiritual enlightenment.

अद्यास्तमेतु वपुराशितारमास्तां
कस्तावतापि मम चिद्वपुषो विशेषः ।
कुम्भेऽपि नश्यति चिरं समवस्थिते वा
कुम्भांबरस्य नहि कोऽपि विशेषलेशः ॥ १४

एवमात्मकैवल्यप्राप्तिप्रकारमुपायेन सहोपदिश्य संप्रत्यज्ञदृष्टिप्रतीतमाविदेहमोक्षावस्थायीदं शरीरं तृणीकुर्वत् स्वस्याविकारितां दर्शयति । यतीनामपिज्ञानिनां विदेहमुक्त्यै निर्विचिकित्सं देहादितादात्म्यं त्यक्त्वाऽऽत्मानुसन्धानमेवावश्यं कर्तव्यमिति सूचयितुं देहाद्यात्मत्ववादिमतनिरसनायच ॥

अद्येति ॥ इदं वपुः घटवत् परिदृश्यमानं शरीरं सलिङ्गमाब्रह्मस्तंबपर्यन्तं समष्टिव्यष्ट्यात्मकं अद्य अस्तं एतु इदानीमेव येन केनापि निमित्तेन प्रलयं प्रयातु अथवा आशाशितारं आस्तां चन्द्रतारपर्यन्तं वर्ततताम् । तावतापि शरीरस्याशुनाशे चिरकालावस्थानेपि चिद्वपुषः चिन्मूर्तेः मम कूटस्थासङ्गस्य परमात्मनः को विशेषः कोऽपि नास्तीत्यर्थः । सृष्ट्यादेर्मायाकार्यत्वादात्मन-

स्त्वसङ्गत्वान्निरवयवत्वाच्चेति भाव: । अपि शब्द: शरीरोत्पत्तिस्थितिलयकाले-ष्यात्मन: सर्वविशेषाभावे सति तदुत्पत्त्याद्यभावकाले कोऽपि विशेषोनास्तीति किमु वक्तव्यमिति कैमुतिकन्यायद्योतक: । तस्मात् सिद्धमात्मन: सच्चिदानन्द-रूपस्य कालत्रयेपि षड्भाव षट्कोश षडूर्म्यादि सर्वविकारराहित्यम् । तदुक्तं श्रुत्या भगवत्या न जायते म्रियते वा कदाचिन्नायं भूत्वा भविता वा न भूय: अजो नित्यश्शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे इत्यत्र दृष्टान्तमाह कुम्भ इत्यादिना ॥ कुम्भांबरस्य घटाकाशस्य लोकप्रसिद्धिद्योतको हि शब्द: । विस्पष्टमवशिष्टम् ॥ एतेन यतश्शरीरस्यैव सर्वविकारित्वं आत्मनस्सच्चिदा-नन्दरूपस्य सर्वदा निर्विकारित्वं च । ततो यतिना तत्वविदा विदेहसुखार्थिना सततमनात्मतादात्म्यमशेषतस्त्यक्त्वा सर्वमिदमहं च ब्रह्मैवेत्यात्मानुसन्धानमेव विजातीयप्रत्ययानन्तरितमवश्यं कर्तव्यमिति सूचितम् । देहादिशून्यपर्यन्तानां चार्वाकादीनां आभासश्रुतियुक्त्यनुभवाश्रयाणां मतं समस्तं निरस्तं च भवति ॥

Let my body perish now or let it remain as long as the moon and the stars last. What difference is made thereby to my Supreme soul? Whether the pitcher is destroyed or it remains long makes not an iota of difference for the atmosphere in the pitcher.

Notes :— Having explained in the previous stanza the method of attaining oneness along with the means thereof, the preceptor now explains in this the immutability of the soul setting at naught the physical body which to the ignorant appears to last till the attainment of final emancipation. Further it is suggested here that even the ascetic Jnani should incessantly meditate on the Atman giving up its identification with the body and the like for the attainment of final emancipation, refuting the doctrine of those who argue that the body and the like are the Atman.

Explanation :— The word 'Vapu' means the body that is visible like the pot and so forth and includes the Linga sareera and all such bodies, collective or individual. The destruction of the body or its continued existence however long it be does not affect the Supreme soul. For creation is the product of Maya, while the Atman is unattached, without any parts and indivisible. The word 'Api' is for the sake of emphasis. Even at the time of the origin or sustainment or destruction of the body, the Atman does not undergo any change; how much more then must it remain unaffected in the absence of creation, destruction and so forth of the body. Hence it is established that the Atman has no modifications like the six states of birth, growth etc., or the six infirmities of grief, delusion etc., or the six sheaths of food and so on. It is declared also in the Gita that the Atman is never born nor is dead. It is eternal. It is never killed when the body is killed. In illustration thereof is given the instance of the pot. Though the pot is destroyed the destruction or the existence of the pot never affects the atmosphere contained in it. The gist is: It is the body that is liable to modification but not the Atman which is ever immutable. Hence the aspirant after final emancipation should incessantly meditate on the maxim 'I am Brahma' and thus realise it. The doctrines of all those who assert the prominence of the body or of the voidness and likewise those of the materialists like Charvakas and so forth are thereby refuted.

सङ्कल्पमात्रसविकल्पितमूर्तिविश्वं
विश्वं च सत्यमिति मूर्च्छितमन्दबुद्धिः ।
चिन्ताप्रकर्षजनितां वनितां विदित्वा
शैवेति वल्गति यथा चिरविप्रयुक्तः ॥ १५

एवमात्मनस्सच्चिदानन्दरूपस्य कालत्रये अपि सर्वविकाररहितत्वे च श्रुतियुक्त्यनुभवसिद्धेऽप्यतिमूढमतिरसज्जगत्सत्यमिति मत्वा परिभ्रमतीत्याह । विदुषामनात्मविषयवैराग्यादृढीकरणायात्मानुसन्धानरुचिप्रवृद्धये च ॥

सङ्कल्पेति ॥ एवं सत्यपि मूर्च्छिता अनाद्यविद्यावासनयातीव मन्दा मूढा बुद्धिर्मनीषा ब्रह्मात्मैकत्वविषया यस्य स मूर्च्छितमन्दबुद्धिरत्यन्ताविवेकी पुरुषः सङ्कल्पमात्रेण मानसकर्ममात्रेण सविशेषं कल्पिताऽऽरोपिता मूर्तिर्यस्य तथोक्तं विश्वमव्यक्तादिस्थूलान्तं समष्टिव्यष्टिरूपं विष्टपं विश्वं च व्यष्ट्यभिमानिनं जीवं चकारात्समष्ट्यभिमानिनमीश्वरं च सत्यं वास्तवमिति मत्वा भ्रमति ममासौ पिताऽसौ माताऽसौ भार्याऽसौ पुत्रोसौ शत्रुरिदं मित्रमिदं क्षेत्रमिदं पात्रमिदमपात्रमिदं धनमहं कर्ताऽहं भोक्ताऽहं सुख्यहं दुःख्यहं ब्राह्मणोऽहं क्षत्रियोऽहं वैश्योऽहं शूद्रोऽहं ब्रह्मचार्यहं गृह्यहं वानप्रस्थोऽहं सन्यासीत्यसारसंसारचक्रे कृमिपूति विण्मूत्रादिपात्रे पित्रादि गात्रे सत्यत्व नित्यत्व रम्यत्वमत्या निरन्तरं भृशं परिभ्रमति न तु विवेकीत्यर्थः । अमेध्यपूर्णं कृमिजन्तुसंकुलं स्वभावदुर्गन्धमशौचमध्रुवं कलेबरे मूत्रपुरीषभाजने रमेत मूढो न रमेत पण्डित—इति वचनादिति भावः । अत्र दृष्टान्तमाह—यथा येन प्रकारेण चिरविप्रयुक्तः प्रियया बहुकालं वियोजितः पुरुषः चिन्ताप्रकर्षजनितां चिन्ताप्रकर्षेण विचारोत्कर्षेण जनितामतिप्रयत्नलब्धामित्यर्थः । यद्वा चिन्ताप्रकर्षे कामिनीसम्भोगादिविचारोत्कर्षे सति जनितां संप्राप्तां वनितां यस्यकस्यचिदपि योषितं दूषितामपि शैवेति विदित्वाऽतिसुभगेति मत्वा वल्गति सन्तोषेणाऽसौ मम भार्या पतिव्रता परमपुरुषार्थरूपिणी नित्या चन्द्राननना मनोहराऽमराङ्गनाप्येतादृशी न भवतीति परिभ्रमति तथेत्यर्थः । एतेन निर्विकारमखण्डसच्चिदानन्दैकरसमात्मानमज्ञात्वा सविकारमनृतजडदुःखात्मकमनात्मानमेवाऽऽत्मानं मत्वाऽतिमूढोपारनिस्सारसंसारसागरे पतितो निमज्जन्नुन्मज्जन्नत्यन्तदुःखमनवरतमनुदिनमनुभविताप्यसारसंसाराभिवृद्ध्यर्थमेव सन्ततमतिप्रयत्नं करोत्यहो कष्टमित्यज्ञहृदयमुद्दिश्य स्वहृदयपरितापस्समाविष्कृतो भवति । यद्वा ननु पूर्वोक्तश्लोकेन घटाकाशघटयोरिवात्मानात्मनोरविकारिता

विकारिते किल प्रतिपादिते । तत्रानात्मनः स्वविलक्षणत्वेन विद्यमानत्वे सति कथं यतेरद्वैतानुसन्धानं सिद्ध्यतीत्याकांक्षायामाह सङ्कल्पेति । मूर्च्छितमन्दबुद्धिः मन्दा रागद्वेषादिदोषवशात् कृशीभूता बुद्धिरद्वैतविषया यस्य मूर्च्छिता शतसहस्रकोटिजन्मार्जितसुकृतनिकरपरिपाकवशादुपात्त चित्तशुद्धिसाधनसंपत्तिद्वारोपात्त सद्गुरुवरमुखतो सकृत्कृतश्रवणादिभिरुच्छ्रिता स मूर्च्छितमन्दबुद्धिः श्रवणादिविस्फुरितसम्यक्ज्ञानवान् पुरुष इत्यर्थः ॥ यद्वा पूर्वं मूर्च्छिता रजस्तमस्तत्कार्यरागद्वेषादिभिरतिमूढातिसूक्ष्माद्वैतवस्तुग्रहणाशक्ता पश्चान्मन्दा भक्तिश्रद्धाभ्यामीश्वरार्पणबुद्ध्या चिरमाचरित सात्वीकसत्कर्मभिश्शान्तातिसूक्ष्माद्वैतवस्त्ववधारणशक्ता बुद्धिरन्तःकरणं यस्य स मूर्च्छितमन्दबुद्धिः निष्कामानुष्ठितिजनित सदसद्विवेकवैराग्यशमदमसन्यासादि सकलसाधनसंपन्नः पुरुष इत्यर्थः । सङ्कल्पमात्रेणानाद्यविद्यावासनामय मनोव्यापारमात्रेण सविकल्पिता सविशेषं कल्पिताऽऽरोपितामूर्तिराकृतिर्यस्य तथोक्तं विश्वमव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं क्षेत्रसंज्ञितं शरीरं विश्वं च व्यष्ट्यभिमानिनं क्षेत्रज्ञसंज्ञितं जीवं चकारात् समष्ट्यभिमानिनमीश्वरं च सत्यमिति मत्वा सत्यपदं ज्ञानादीनामुपलक्षणं सत्यज्ञानानन्दानन्ताद्वयं परं ब्रह्मैवेति सद्गुरुवरमुखतः सम्यगुपलभ्य भजति । सर्वस्यापि प्रपञ्चस्यारोपितत्वेनासत्यत्वात् । ब्रह्मविद्यतिः सर्वदा सर्वमिदमहं च ब्रह्मवेत्यद्वैतमेवानुसन्धत्ते न तु द्वैतं नामरूपात्मकमित्यर्थः ॥ सर्वं खल्विदं ब्रह्म नेह नानास्ति किञ्चन । सत्यं ज्ञानमनन्तं ब्रह्म नित्यं विज्ञानमानन्दं ब्रह्मेत्यादि श्रुतेः ॥ नासतो विद्यते भावो नाभावो विद्यते सतः । उभयोरपि दृष्टोन्तस्त्वनयोस्तत्वदर्शिभिः ॥ क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत । क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत् तज्ज्ञानं मतं मम ॥ मत्तः परतरं नान्यत् किञ्चिदस्ति धनञ्जय । ममैवांशो जीवलोके जीवभूतस्सनातन ॥ इत्यादि भगवद्वचनात् ॥ रूपवर्णादिकं सर्वं विहाय परमार्थवित् । परिपूर्णचिदानन्द स्वरूपेणावतिष्ठते ॥ एतद्विलक्षणं ब्रह्म ब्रह्मणोऽन्यन्नकिञ्चन । ब्रह्मान्यद्भाति चेन्मिथ्या यथा मरुमरीचिका ॥ आत्मैवेदं जगत्सर्वमात्मनोऽन्यन्न किञ्चन । मृदो यद्वत् घटादीनि स्वात्मानं सर्वमीक्षते ॥ इत्याद्याचार्यवचनाच्चेति भावः ॥ अत्र दृष्टान्तमाह ॥ यथा चिरविप्रयुक्तः चिरकालं विप्रेण सर्वे शाक्ता द्विजाः प्रोक्ताः शक्तिवादरतास्सांख्या इत्यादिवचनाच्छक्तिवादकसांख्य-

मतानुसारिणा द्विजेन युक्तः संमिलितस्तत्राश्रितः पुरुष इत्यर्थः । चिन्ताप्रकर्षजनितां चिन्तापदेन तत्कारणप्रकृतिरुच्यते । चिन्तायाः प्रकृतेस्सकाशात् प्रकर्षेण जनितां समुद्भूतां वनितां कार्यभूतामविद्यां समष्टिव्यष्ट्यात्मिकां त्रिलोकीं शैवेति शक्त्यात्मिकेति विदित्वा शक्तिवादकसांख्यमुखतस्सम्यक् बुद्ध्वा वल्गति सन्तोषेणोत्प्लवति तद्वदित्यर्थः ॥

The intensely dull of intellect is deluded that the universe, with a form differentiated by his mere imagination and the soul (both individual and collective) are real, just as a lover long separated from his beloved is deluded by the visionary form of the woman, the product of his deep imagination, as auspicious (pure and real).

Notes :— Here is explained further that the ignorant is deluded in the thought that the unreal universe is verily real, even though it is established on the authority of scriptures, reason and experience that the Atman is of the nature of Sat, Chit and Ananda, never undergoing any modification at any time, with a view to strengthening the spirit of nonattachment to objects, non-Atman and to intensifying the incessant concentration on Atman in the wise. मूर्च्छितमन्दबुद्धिः denotes that the dullness of intellect has been intensified by spiritual ignorance, as a result of the stored up impressions of ignorance beginningless. The expression विश्वं च has reference to the soul individual in beings and the soul collective, Iswara. Thus deluded, the ignorant clings to his body, his relations and so forth, but not the wise. To illustrate the above fact, is cited the instance of a long separated lover. In his intense imagination about his beloved he at times gets the vision of a woman which he takes to be real. To explain in

another way the expression चिन्ताऽकर्षजनितां: He may come by the visionary form of a woman in his deep imagination of his beloved and the amorous sports with her. Though such a visionary form be impure and of anybody else's, he would consider her as his own, pure most beautiful, chaste and so on. Not knowing Atman, the real, of the nature of absolute bliss, he exults in objects, non Atman, unreal and the source of all misery. Thus rolling in the ocean of worldly existence for ever, he has no hope at all of any cessation of such miseries. Here may arise a doubt. In the former sloka it was said that the Atman like the atmosphere in the pot is not susceptible to any modification while the non Atman like the pot is liable to modification. While thus there exists a difference as Atman and non Atman, how can the incessant contemplation of oneness without a second be achieved? This doubt is cleared by explaining the expressions in the sloka in another way. The Buddhi or intellect made dull (Manda) by the accretion of love, hatred and so forth and thus overpowered by spiritual ignorance becomes Murchhita or elevated by the stored up merits of many past lives and the consequent purity of mind, the advice of the preceptor and one's own deep contemplation over it. Hence the expression मूर्च्छितमन्दबुद्धिः means one duly spiritually enlightened. It may be explained otherwise too as follows: Murchhita (deluded) earlier by love, hatred and so forth through Rajas (activity) and Tamas (inertia) and thus made incapable of grasping the subtle truths of Advaita; it becomes Manda (calm later) through long practised Sattvic rituals and virtues, disinterested performances of actions dedicated to God, purity of mind, discrimination of real and unreal and so forth, and thus able to grasp the subtle truths. In short the person is qualified for spiritual enlightenment. The first *Viswom* may mean the

body (Kshetra) and the second *Viswom* may be taken to mean the soul individual and the soul collective (Iswara). Understanding that Kshetra or body is unreal being superimposed and that the soul. Brahma is the only one real, the enlightened sees the Brahma in all and all in Brahma. The scriptures declare: "All this is verily Brahma. There is nothing here as many. Brahma is truth, Jnana and Bliss and is eternal". So also says the Lord in Gita: "There is no existence for the unreal, nor non-existence for the Real." "Know Me as Kshetrajna that pervades all Kshetra or bodies." "There is nothing other than Me. The individual soul is but a part of Mine. Bhagawan Sankara also has in spiritual experience given Uttirana to the same truth that all this is Brahma. As pots are from earth, so also everything is of Atman. The latter half of the sloka is capable of explanation in another way by taking the words Chinta (contemplation), Vanita (woman) and Vipra (brahmin) in a different sense. The word Vipra means also a follower of the cult of Sakti or Samkhya philosophy; Chinta connotes its cause viz. Prakriti or matter, and Vanita, its effect viz. ignorance born of Prakriti. Thus understanding, the latter half is explained as follows: as one coming into long contact with the followers of Samkhya and comprehending the three words as of Saiva or of the nature of Sakti, exults in all ecstasy.

स्वस्थे मयि स्वरससत्यसुखावबोधे
व्यामोहनाज्जगदिति व्यपदिश्यते यत् ।
अन्यत्र कुत्रचिददृष्टमरूपरूप-
मस्थानचित्रमिति निश्चिनुमस्तदेतत् ॥ १६

तर्हि भवतां निश्चय कथमित्याकांक्षायां मन्दमतिर्यज्जगत् सत्यमिति निश्चित्य परिभ्रमति तदेव वेदान्तचिन्तावन्तो वयं मिथ्येति निश्चिनुम इत्याह स्वस्थे इति ॥ स्वस्थे स्वस्मिन्नेव स्थीयत इति स्वस्थः तस्मिन्। यद्वा स्वस्मिन्नेवाखण्डसच्चिदानन्दरूपे स्थीयत इति। स्वेनैव सच्चिदानन्दरूपेणावस्थीयत इति वा स्वस्थः तस्मिन्। स्वरससत्य सुखावबोधे स्वरसः स्वरूपानन्दः तदभिन्नो यः सुखावबोधः सत्यानन्दचित् तन्मये मयि प्रत्यगभिन्ने परमात्मनि व्यामोहनादत्यन्ताज्ञानाद्धेतोः जनैर्जगदव्यक्तादिस्थूलान्तं विश्वं व्यपदिश्यते आरोप्यते इति यत् तदेतज्ञ्व्यवहारादन्यत्र कुत्रचिदितरत्र कुत्राप्य दृष्टमदर्शितं अरूपरूपं रूपरहितरूपं शशविषाण नरविषाणादिवन्नाममात्ररूपमित्यर्थः। एतादृशमस्थानचित्रमिति भित्त्याद्याधाररहितालेख्यमिति वयं वेदान्तचिन्तावन्तो निश्चिनुमः सम्यक् निर्णयामः आकाशे गन्धर्वपुरवत् परिपूर्णे सच्चिदानन्दैकरसे निस्सङ्गे परब्रह्मण्यति मन्दमतिकल्पितं जगत्सकलं कालत्रयेऽपि नास्तीत्यस्माकं निश्चय इति भावः॥ तदुक्तमाचार्यैः यथैव शून्ये वैतालो गन्धर्वाणां पुरं यथा यथाऽऽकाशे द्विचन्द्रत्वं तद्वत्सत्ये जगत् स्थितिरिति॥ यद्वा ब्रह्मण्यारोपितं जगत् सर्वमहं च ब्रह्मैवेति यतिरनुसन्धानं करोतीति पूर्वोक्ताद्वितीयब्रह्मानुसन्धानमेव वयमपि कुर्म इत्याह। शिष्यैरपि युष्माभिरेवानुसन्धानं कर्तव्यमिति सूचयितुम्॥ स्वस्थ इति। स्वरस सत्यसुखावबोधे निजानन्दाखण्डसदानन्दचिद्रूपे मयि प्रत्यगभिन्ने चिदानन्दैकरसे परे ब्रह्मणि स्वस्थे स्वरूपेणैव न तु जगदाकारेण स्थीयत इति स्वस्थः तस्मिन् सतीत्यर्थः। यद्वा स्वरस्यसत्यसुखावबोधे नित्यनिरतिशयाखण्डसच्चिदानन्दैकरसे स्वस्थे स्वेनैव निष्क्रियात्मनैव सदा स्थीयत इति स्वस्थः तस्मिन् मयि प्रत्यगभिन्ने ब्रह्मणिविषये व्यामोहनात् व्यामोहयति स्वकार्यजालैर्जनान् विभ्रामयतीति व्यामोहनं माया शब्दवाच्यमनाद्यज्ञानं तस्माद्धेतोः जनैर्यज्जगदव्यक्तादिस्थूलान्तं समष्टिव्यष्टिरूपं विष्टपमिति व्यपदिश्यते व्यवह्रियते तदेतत्सर्वं अस्थानचित्रं अस्थानं अकारवाच्यानां ब्रह्मादीनामाधारभूतं चित्तमाश्चर्यकरं वस्तु। अस्थानं च तच्चित्रं चास्थानचित्रं नित्यनिरतिशयाखण्डानन्दैकरसमद्वितीयं परं ब्रह्म। यद्वा अस्थानमनाश्रयं कस्मिन् भगवः प्रतिष्ठितः अनाधारमविक्रियं स्वे महिम्नि प्रतिष्ठित इत्यादिश्रुतेः तच्चित्रमाश्चर्यकरमनवरतमनुसन्धानवतामखण्डानन्दकरं चेत्यस्थानचित्रम्। सर्वाधारमनाधारमनतिशयमविक्रियं नित्यशुद्ध-

बुद्धमुक्तस्वभावमखण्डसच्चिदानन्दमद्वयं परं ब्रह्मेति वयमात्मानुसन्धानपरा निश्चिनुमः। अखण्डमानन्दमरूपमद्भुतमित्यादिश्रुतेः। ब्रह्मणो मलिनहृदयावेद्यतां दर्शयितुं तद्विशिनष्टि अन्यत्रकुत्रचिददृष्टमिति। अन्यत्र ब्रह्मविद्व्यतिरिक्तेषु मलिनमतिषु कुत्रचिदप्यदृष्टम्। विमूढा नानुपश्यन्ति पश्यन्ति ज्ञानचक्षुषः। सर्वगं सच्चिदात्मानं ज्ञानचक्षुर्निरीक्षते। अज्ञानचक्षुर्नेक्षेत भास्वन्तं भानुमन्धवत्। इत्यादि भगवदाचार्यवचनात् रागादिमलिनहृदयैर्ज्ञातुमशक्यमित्यर्थः। कुत इत्याशङ्कां विनाशयितुं विशेषणान्तरमाह अरूपरूपमिति। अरूपमिति रूप्यते श्रुतियुक्त्यनुभवैर्विचार्यते इत्यरूपरूपं निराकारमित्यर्थः। न सन्दृशे तिष्ठति रूपमस्येति श्रुतेः। हेतुगर्भितमेतद्विशेषणम्। ब्रह्म मलिनहृदयावेद्यमेव अरूपरूपत्वात् यन्नैवं तन्नैवं यथा घटादिभिरित्येवं विशेषणविशिष्टमस्थानचित्रमिति वयं निश्चिनुम इति संबन्धः॥ शुक्तिरजतस्यैव सर्वस्यापि जगतः कल्पितत्वेनासत्यत्वात् सर्वदा सर्वमिदमहं च ब्रह्मैवेति परिपूर्णवृत्त्या वयमपि दृढमनुदिनमनुसन्धानं कुर्म इति भावः॥ एतेन सूचितं भो शिष्याः युष्माभिरप्येवमेवानुसन्धानमवश्यं कर्तव्यमशेषवासनावृत्तिद्वारा निरतिशयाखण्डानन्दावाप्तय इति॥ मयीत्यत्रैकवचनमद्वितीयब्रह्मविवक्षया। वयमित्यत्र बहुवचनं लोकदृष्ट्या ब्रह्मनिष्ठानां बहुत्वादिति च बोध्यम्॥

Owing to extreme delusion, the universe is superimposed on Me who abides in Myself in the intrinsic essence of Sat, Chit and Ananda. Such a superimposition we decide is not seen anywhere else (other than in the ignorant). It is a figure without form and a picture without a canvas.

Here is established the theory of the Vedantins that the universe which to the ignorant is real is to the Vedantin false and illusory.

Notes :— स्वस्थः means abiding in the self or abiding in the nature of Sat, Chit and Ananda. स्वरस means the intrinsic essence of bliss absolute अरूपरूपं means figure

without a form, with a form only in name like the horns of a rabbit or of a man. अस्थानचित्र a picture without a wall on which to draw. The Vedantins declare that the universe superimposed on the absolute Brahman has no reality at any time. It is declared by the Acharya that the universe is as unreal, as sound in vacuum, as city in the air or as two moons in the sky. The Vedantins meditate on the one Absolute Brahma embracing all. The Absolute Brahman remains in its own instrinsic nature of Sat, Chit and Ananda and not in the form of the universe as wrongly conceived by the ignorant on account of Maya or illusion. अस्थानचित्रं the wonderful object that is the prop of Brahma (अ) and all others. The expression is capable of other explanations as well as 'the Absolute Brahma without a second' or as one that has no other support besides itself and so wonderful as declared by scriptures. Brahman has no support for itself but is the support for all. Further that Brahma is incomprehensible for the impure of heart. It is not realisable by any except the spiritually wise even as the blind cannot see the sun. One is impure when one's heart is overpowered by the passions of love, hatred and so forth. The reason for non-realisation by the impure is that the Brahman is formless. The scriptures declare that Brahman has no form. Hence the Guru's advice to his disciples that they should incessantly meditate on the Brahmin as embracing all to experience absolute spiritual bliss. The singular मयि is suggestive of one the Supreme Brahman or the plural निश्चिनुम: of the many intent on the realisation of Brahma.

आध्यासिकस्फुरणभेदतिरोहितोऽपि
चिद्धातुरेकरसतां न जहाति जातु ।

नानाचराचरविचित्रविचित्रितोऽपि
चित्रः पटो न पटभावमपास्यति स्वम् ॥ १७

ननु सुरनरादिव्यक्तिविशेषैर्घटपटादिव्यक्तिविशेषैश्चावृतत्वादतिसूक्ष्मत्वादरूपत्वाच्च ब्रह्मणोस्माभिर्मन्दमतिभिः कथं तदनुसन्धातव्यमित्याकांक्षायां तदुपायमप्युपदिशति कृपालुः ॥

आध्यासिकेति ॥ आध्यासिकैरध्याससंबन्धिभिः स्फुरणभेदैः सुरनरतिर्यगादिव्यक्तिविशेषैः घटपटादिव्यक्तिविशेषैश्च तिरोहितोऽपि तिरस्कृतोऽपि चिद्धातुः संविद्धातुः एकरसतां केवलरसत्वं परिपूर्णानन्दत्वमितियावत् जातु कदाचिदपि न जहाति न त्यजति किन्तु पटे चित्रवदात्मन्यारोपितेषु तेषु देवमनुष्यतिर्यगादिषु घटपटवटतटकुड्यकुसूलादिषु च सर्वत्र नामरूपात्मकेषु सर्वेषु कालेषु सर्वास्वप्यवस्थासु सर्वदा घटस्सन् पटस्सन् घटः स्फुरति पटः स्फुरतीत्यादिरूपेण चित्रेषु पटवदनुवर्तत एवेत्यर्थः ॥ सद्धीदं सर्वं चिद्धीदं सर्वम् ॥ अस्ति भाति प्रियं रूपं नामचेत्यंशपञ्चकम् । आद्यत्रयं ब्रह्मरूपं जगद्रूपं ततो द्वयम् ॥ इत्यादिश्रुतेः ॥ यस्मादेवं तस्मान्मुमुक्षुभिरारोपितनामरूपात्मकप्रपञ्चचित्रं सर्वं परित्यज्य सच्चिदानन्दात्मकं ब्रह्मचैतन्यं मात्रं संगृह्य सर्वदा सर्वमिदमहं च ब्रह्मैवेति पूर्णवृत्त्या दृढमनुसन्धातव्यमिति भावः ॥ तदुक्तं विद्यारण्यमुनिभिः जगच्चित्रं स्वचैतन्ये पटे चित्रमिवार्पितं मायया तदुपेक्ष्यैव चैतन्यं परिशेष्यतमिति ॥ अत्र दृष्टान्तमाह नानेत्यादिना ॥ स्वं स्वकीयं अपास्यति निरस्यति । विस्पष्टमवशिष्टम् ॥

The Supreme spirit does never give up its intrinsic sole essence of bliss though shrouded by the different manifestations falsely imposed on it. The canvas on which is beautifully painted the picture of various objects, movable and immovable, does not thereby lose its own nature of being a canvas.

Notes :— To the doubt how it is possible for us the ignorant to meditate on Brahma which is covered by the several manifestations like Gods, men and lower creations and other objects like pot, cloth etc., which is very subtle and has no form, the compassionate Guru gives the following advice.

आध्यासिक relating to अध्यास which means the false imposition of the attributes of one object on another. Spuranabheda refers to the manifested creations of Gods, men and other objects. The Ekarasa is the intrinsic nature of absolute bliss. The pictures on the canvas may be different, animate like men and so forth or inanimate like pot, cloth, tree, river bank, cottage or farm house and so on. They go by several names and forms on the cloth on which they are painted, but the cloth is all the same the cloth and the cloth alone. Hence the :aspirant after salvation should incessantly meditate on the one Brahma as comprehending all. It has been declared by the sage Vidyaranya that the universe is a picture painted on the cloth Brahma by Maya. In illustration thereof is cited the nature of the picture and of the cloth on which it is painted.

सच्चित् सुखात्मकमखण्डितमात्मतत्त्वं
मन्येत कश्चिदहमित्यतिनिश्चितार्थम् ।
देहेन्द्रियादकमपि विभ्रमवासनाभि
व्याप्तो ममाहमितियद्वदविद्वदात्मा ॥ १८

ननु एवं सर्वेष्वपि कालेषु सर्वदा सच्चिदानन्दैकरसस्य ब्रह्मणः सर्वत्र परिपूर्णत्वात् सर्वेषामप्रयासेन लभ्यं खलु कुतो न लभ्यत इत्याकांक्षायां तस्याज्ञानावृतत्वनिमित्तदुर्लभतां सूचयितुमनेकेषु जनेष्वनेकजन्मकृतसुकृतनिकरपरिपाकवशाद्यः कश्चिदनवरतमतिप्रयत्नं करोति स एक एव तज्ज्ञानजनिताखण्डानन्दमनुभवितुं शक्नोति नान्य इत्याह ॥

सच्चिदिति ॥ लोकेनेकेषु जनेषु श्रवणादि प्रयत्नं कृतवत्सु कश्चिदेव सुकृती पुरुषः सच्चित् सुखात्मकं सत्यज्ञानानन्दस्वरूपमखण्डितमनविच्छिन्नमात्मतत्त्वं आत्मनः प्रत्यगभिन्नस्य परस्य ब्रह्मणस्तत्त्वं स्वरूपं तत्पदलक्ष्यमहमिति अहंप्रत्ययालम्बनकूटस्थासङ्गचिद्रूपस्त्वंपदलक्ष्यं इत्यादि निश्चितार्थं श्रवणमननादि संस्कारबलेनात्यन्तदृढीकृतार्थं यथा तथा मन्येत ज्ञायेत सततमनुसन्धत्त इत्यर्थः। अनेकशतसहस्रकोटि जन्मार्जितसुकृतनिकरपरिपाकविमलीकृतान्तःकरणजनितसकलसाधनसंपत्तिद्वारा देशिकशुश्रूषाश्रवणमननादिप्रयत्नवतां प्रेक्षावतां शतसहस्रकोटिसंख्याकेषु यः कश्चिदतिसुकृती सादरं चिरं निरन्तरश्रवणादिष्वतिपरिश्रमं करोति स एक एव पुरुषः सर्वमिदमहं चाखण्डानन्दैकरसं परं ब्रह्मैवास्मीति दृढानुसन्धानजनितानन्दमनुभवितुं शक्नोति नान्ये समस्तवेदाध्ययनपुरस्सरमश्वमेधादि समस्ताध्वरकर्तारोपीति भावः। तदुक्तं भगवतापि 'मनुष्याणां सहस्रेषु कश्चिद्यतति सिद्धये। यततामपि सिद्धानां कश्चिन्मा वेत्ति तत्त्वतः' इति ॥

नन्वस्मिंल्लोके केषांचिदेकान्तवेदान्तकथननैपुण्यं केषांचित् ब्रह्मविदहमित्यभिमानपुरस्सरमुपदेशादौ प्रवृत्तिः केषांचित् काषायधारित्वं केषांचित् कपालित्वं केषांचिन्मुण्डित्वं केषांचित् तपस्वित्वं केषांचिद्भस्मचीरजटाधारित्वं केषांचिदुन्मत्तत्वं केषांचिन्नग्नत्वं केषांचिन्निगमागमादि कवयितृत्वं केषांचिदभोज्यान्नपानवृत्तित्वं च दृश्यते। तस्मात् प्रायेण वेदान्तवक्तृत्वादिलक्षणलक्षिता सर्वेऽपि जनाः स्वानन्दानुभविन एवेति प्रतीयन्ते। पुनः कथं कश्चिदेव प्रत्यगभिन्नं ब्रह्म जानातीत्युच्यत इति चेत् सत्यं केषांचिद्वेदान्तकथननैपुण्यं केषांचिद् ब्रह्मवित्त्वाभिमानपुरस्सरमुपदेशादिप्रवृत्तिः केषांचित् काषायधारित्वादिश्च दृश्यते। तथापि तेषां तद्वृत्तिशून्यत्वाद्रागादित्वाच्च वृत्तिमात्रफलकत्वात् काषायग्रहणमात्रस्य च श्रेयोहेतुत्वाभावेन वृत्तिमात्रप्रयोजनपर्यवसायित्वाच्च तेऽप्यज्ञानिन एव। तदुक्तमाचार्यप्रभृतिभिः "कुशला ब्रह्मवार्तायां वृत्तिहीनाः सुरागिणः। तेऽप्यज्ञानितया नूनं पुनरायान्ति यान्ति च ॥ वाग्वैखरी शब्दझरी शास्त्रव्याख्यानकौशलम्। वैदुष्यं विदुषां तद्वद् भुक्तये न तु मुक्तये ॥ जटिलो मुण्डि लुञ्चितकेशः काषायाम्बरबहुकृतवेषः। पश्यन्नपि च न पश्यति मूढो ह्युदरनिमित्तं बहुकृतवेषः ॥ शंसन्ति तत्त्वं परबोधनार्थं

विवेकिनो मूढतमा वसन्ति । उष्ट्रवद्भारवाही च शास्त्राणां बहुवर्त्मनां भञ्जश्च भेकवाचालः समर्थोऽपि निरर्थकः । काषायग्रहणं कपालधारणं केशावली-लुञ्चनं पाषण्डप्रेतभस्मचीवरजटाधारित्वं निगमागमादि कवितागोष्ठिसभाभ्य-न्तरे सर्वं स्वोदरपूरणार्थनटनं न श्रेयसे कारणम् ॥ उन्मत्तत्वमभोज्यान्नपान-पाषण्डवृत्तयः इत्यादि लिङ्गग्रहणं नानादर्शनदर्शितम् । उत्पन्नस्वावबोधस्य ह्युदासीनस्य सर्वदा सदाभ्यासरतस्यैतन्नैकत्राप्युपयुज्यते ॥ तर्हि वेदान्तगुरु-शिष्यसंप्रदायविच्छित्ति अनिर्मोक्षप्रसङ्गश्च, काषायदण्डमात्रेण यतिः पूज्यो न संशयः इत्यादिवचनवैय्यर्थ्यं भस्मादिधारणविधिवैय्यर्थ्यं च स्यदितिचेन्न ॥ वेदान्तिनस्तन्निष्ठस्य तीव्रविरागिगस्तज्ञत्वात् तज्ञकृतोपदेशस्य तथात्वाभावात्, भस्मादिधारणस्यारुरुक्षूग मत्यन्तोपयोगित्वेन वय्यर्थ्यानुपपत्तेः काषायदण्ड-मात्रेणेत्यादि वचसः अविदितात्मतत्वस्यापि यतेः पूज्यत्वे सति विदितात्म-तत्वस्य यतेः पुज्यत्वमस्तीति किं वक्तव्यमिति कौमुतिकन्यायेन आत्मविदो यतेः पूज्यत्वप्रतिपादनपरत्वात् विविदिषा सन्यासिविषयत्वाच्च विविदिषु वक्तृ-श्रोतृणामतिदुर्लभता ॥ खलु भगवदाप्युक्तम् । आश्चर्यवत् पश्यति कश्चिदेन-माश्चर्यवद्वदति तथैव चान्यः । आश्चर्यवच्चैनमन्यच्छृणोति श्रुत्वाप्येनं वेद नचैव कश्चिदिति ॥ अत्र दृष्टान्तमाह । यद्वत् विभ्रमवासनाभिव्याप्तः विभ्रमवास-नाभिर्विभ्रान्तिसंस्कारैरभिव्याप्तः अनाद्यविद्यावासनानिकरपरिवृत इत्यर्थः । अत एवाविद्वदात्मा अविद्वानात्मानात्मज्ञानशून्य आत्मा मनो यस्य सोवि-द्वदात्मात्यन्ताविवेकी पुरुषः देहेन्द्रियाकं देहोऽन्नमयकोशः स्थूलशरीरं इन्द्रि-याण्युभयविधानि ज्ञानकर्मेन्द्रियात्मकानि सान्तः करणानि प्राणादिकोशत्रयात्म-कानि अकं दुःखं चापिशब्दात् कारणशरीरं पुत्रमित्रकलत्रादीनि चाहं ममेति सततं दृढमभिमन्यते तद्वदित्यर्थः ॥ अनेनानाद्यविद्यानानावासनविसरपरि-वृतत्वादेवात्मज्ञानस्य परिपूर्णस्यापि दुर्लभत्वं देहादिशून्यपर्यन्तात्मवादिनां श्रुतियुक्त्याभासावलंबिनामनात्मवित्वं भ्रान्तत्वं च सम्यक्सूचितं भवति ॥

One may meditate on the principle of Atman of the nature of Sat, Chit and Ananda and full as to be very firmly settled that it is the 'I' just as, on the other hand, another over

powered by the impress of delusion and consequently ignorant of the nature of Atman may consider the body, the senses, the objects of worldly ties and so forth as 'I and mine'.

Notes :— Since Brahma of the essence of bliss is eternal and ever present and full, it must be easily accessible to all without any effort. Then how is it that it is not so realised ? This doubt is answered, in this verse, that it is due to the real ignorance of man.

Among the aspirants after spiritual realisation only very few are able to realise the truth of the great maxim 'Thou art That' (तत्त्वमसि). On account of the merits acquired through several lives and the purity of mind, by the aid of a preceptor and one's own meditation and effort one may have the realisation of the Brahman and not others of mere deep Vedic study or intent on the mere performance of religious rites. This has been decleared by the Lord Himself, "of thousands of men some perhaps one strives after Siddhis or occult powers. Even among those who have come by such Siddhis, very few know Me in reality of My nature.

In this world some are seen clever at Vedic studies some pride themselves as spiritual preceptors, some take to coloured robes of Sanyasins, some go forth with shaven heads or matted locks of hair and so on and everyone of them exults in the joy of their bliss. Then how can it be said that one rarely enjoys the bliss of Brahma ? True, there are many such people. But overpowered with love and other passions and lacking in the sincerity of their professed nature, they take to such forms which do not of itself conduce to any glory or real happiness. They are also ignorant of the real nature of Brahma. This has been affirmed by several Acharyas like Sankara and

others. Their learning is only for the enjoyment of worldly pleasures and not for salvation. They take to such forms for the sake of their belly. These are but the traits of a heretic or hypocrite. To one in whom has dawned self knowledge, these are of no use If so, this strikes at the root of the Vedantic Institution of Guru and Sishya. Further it gives no scope to the theory of salvation. It goes to the text also that an ascetic becomes worshipful on putting on the ochre coloured robes. It does not lend support also to the injunction as to the necessity of smearing ashes on the body. This allegation is explained away as follows: Vedantins are bereft of all attachment since they know the reality of Supreme Brahma, but not so the disciple who seeks their spiritual advice. The putting on of the sacred ash on the body is of great use to the spiritual aspirant. Further when it is laid down that an ascetic becomes worthy of worship by his taking to ochre coloured robes and wielding the Yogi's stick, it has reference to a Yogin who has not known and realised the principle of Atman. How much more then should an ascetic who has known the Atman be worthy of worship? The second half of the verse is as usual in illustration of the fact set forth in the first half. In the expression देहेन्द्रियार्कं, Deha denotes the gross physical body, Indriya refers to the two fold organs of action and perception with the Anthhakarana (mind) and the three sheaths of Prana (the vital breath) and the like; Aka means sorrow, hence the objects of sorrow like wife, son and so forth. The word Api has reference to the causal body. Herein is alluded the delusion of the ignorant who conceive the Atman as the body, voidness and so forth.

विश्वं मृषा विरसमित्यवधार्य धैर्य-
मास्वाद्यते मुनिभिरन्तरसौ रसात्मा ।

सन्तापजं मरुमरीचिरसं निरस्य
संसेव्यते सुमतिभिस्सुरसिन्धुपूरः ॥ १९

नन्वेवमात्मज्ञानस्य दुर्लभत्वे सत्यनाद्यविद्यानानावासनाविसरपरिवृतानां मुमुक्षूणां का वा गतिरित्याकांक्षायामुपायरहितानामतिदुर्लभत्वेऽपि उपायसहितानामतिसुलभत्वं सूचयितुमुक्तमेव प्रकारान्तरेण सोपायमुपपादयति ॥

विश्वमिति ॥ मुनिभिर्मननशीलैर्यतिभिः विश्वं प्रकृतिजविकृतिरूपमव्याकृतादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं जगत्सर्वं नामरूपात्मकं विरसं विगतो नष्टो रसः सच्चिदानन्दलक्षणो यस्य तद्विरसं असारमत एव मृषा मिथ्यानृतजडदुःखरूपमिति अवधार्य श्रुतियुक्त्यनुभवैर्निश्चित्य धैर्यं मनस्थैर्यं गापाद्यानेकेषु विक्षेपकेषु स्रक्चन्दनवनितादिविषयेष्वाध्यात्मिकादिषु वा संप्राप्तेषु सत्स्वपि दृश्यमिथ्यात्वदृष्ट्या चित्तनैश्चल्यं सम्पाद्येत्यर्थः । यद्वा निष्कामानेकजन्माराधित परमेश्वरप्रसादासादितचित्तप्रसाद सदसद्विवेकादि साधनद्वारोपात्त देशिकेशोपदेश श्रवणमनननिदिध्यासनैरखण्डसच्चिदानन्दाद्वये परे ब्रह्मणि तदाकाराकारितायाश्चित्तवृत्तेर्नितान्तनैश्चल्यं संपाद्येत्यर्थः । असौ रसात्मा तदाकाराकारितायाश्चित्तवृत्तेर्विषयभूतः परिपूर्णानन्दस्वरूपः अन्तरास्वाद्यते सर्वमिदमहं च ब्रह्मैवेति चिरनिरन्तरकृतसमाधिना निश्शेषविनष्टदुष्टशिष्टादिवासनापटलत्वादिष्टिकाचूर्णादिसङ्घर्षितादर्शतलवच्चितान्तनिर्मले स्वान्तःकरणे तदाकाराकारित एवात्यन्तसुखेनात्यन्तसुखमनुभूयत इति भावः । तदुक्तं भगवता । प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम् । उपैति शान्तरजसं ब्रह्मभूतमकल्मषम् ॥ युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः । सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते ॥ इति ॥ अत्र दृष्टान्तमाह सन्तापजमित्यादिना । सन्तापात् आतपात् जायते समुत्पद्यते इति । सन्तापजं मरुमरीचिरसं मृगतृष्णिकाजलं निरस्य अपास्य सुरसिन्धुपूरः गङ्गाजलमित्यर्थः । विस्पष्टमवशिष्टम् । एतेन मृगप्रायाणामेव जगत् सत्यत्वरम्यत्वमतिरिति सूचितं भवति ॥

Regarding the world as bereft of the essence of bliss and illusive, the sages do steadfastly

enjoy within them the Atman of bliss like one giving up the illusive water of the mirage produced by heat resorts to the flood of the holy Ganges.

Notes :— Even though the knowledge is difficult to be had for the ignorant, it is very easy for those who have the means to come by it. The same idea is expressed herein in another way.

The word धैर्यं means resoluteness of mind. Though beset by several temptations, worldly and spiritual, the spiritual aspirant sees everything visible as unreal and becomes steadfast in the contemplation of the Atman. It may also be explained otherwise. By the grace of God obtained by the disinterested performance of actions through several lives and by purity of mind capable of discriminating what is real from what is unreal, through the Guru's spiritual advice and one's own deep contemplation over Brahman, one's mental activities become completely suffused with Brahman and thereby one becomes steadfast in mind With a mind thus suffused with Brahman wherein there is no other impression his mind becomes pure like a mirror cleaned with the soft dust of bricks and the like. The mind thus transformed into the nature of Brahma enjoys bliss absolute. This fact has been supported by several scriptural texts. This is explained by an illustration in the second half of the verse as one giving up the illusive water of the mirage and resorting to the water of the holy Ganges. It is only to the ignorant that the world appears as real and charming and not to the spiritually awakened.

एकान्तसन्निहितमीदृशमात्मतत्त्वं
लोका विमूढमतयो बत नाद्रियन्ते ।

आकाशगोचरमशेषजगत्प्रकाशं
घूका न भास्करमुदीक्षितुमुत्सहन्ते ॥ २०

एवं साधनाभावे साध्याभाव इति न्यायेन साधनरहितानां दुस्साध्यमप्यात्मज्ञानं ससाधनानां सुसाध्यमिति सूचयित्वा संप्रति मन्दमतिस्वभावं प्रतिपादयति द्वाभ्याम् ॥

एकान्तसन्निहितमिति ॥ ईदृशं उक्तप्रकारं उपायसाध्यं एकान्तसन्निहितं हृदयाकाश एव सर्वसाक्षित्वेन विद्यमानत्वादत्यसमीपस्थितं अशेषजगत्प्रकाशं अशेषं जगत् बुद्ध्यादिस्थूलान्तं सर्वमपि प्रपञ्चं प्रकाशयति हृदयाकाशे कूटस्थासङ्गचिद्रूपेण स्थित्वा बोधयतीत्यशेषजगत् प्रकाशः । यद्वा अव्यक्ताकाशे प्रत्यगभिन्नपरिपूर्णपरब्रह्मरूपेण स्थित्वा ब्रह्माण्डं रविरिवाव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकमशेषं जगत् प्रकाशयतीत्यशेषजगत् प्रकाशः । यद्वा अशेषजगत्सु समस्तलोकेषु प्रकाशः प्रसिद्धः ब्रह्मादिपिपीलिकान्तेषु प्राणिष्वहमहमित्यहं प्रत्ययविषयत्वेन प्रसिद्ध इत्यर्थः । तमात्मतत्वं प्रत्यक्तत्वं कूटस्थं ब्रह्माभिन्नस्वरूपं विमूढमतयोनाद्यविद्या नानावासनाभिर्विशेषेणात्यन्तं मूढा तिरोहिता मतिर्बुद्धिरात्मविषया येषां ते विमूढमतयोत्यन्ताविवेकिनो लोका जनानाद्रियन्ते न मन्यन्ते बतेति खेदे ॥ तत्र दृष्टान्तमाह आकाशेत्यादिना । आकाशगोचरं आकाश एव गोचरः पदं यस्य तं तथोक्तमशेषजगत्प्रकाशं अखिलब्रह्माण्डमण्डलप्रकाशकमित्यर्थः । भास्वरं आदित्यं उदीक्षितुमुद्द्रष्टुं घूका उलूका नोत्सहन्ते नेच्छन्तीत्यर्थः । नितान्तमन्तिकस्थमत्यन्तसुखलभ्यमनन्तसुखदमात्मभूतमपि ब्रह्मतत्वं ज्ञातुं भास्करमुलूकवद्विषयलंपटा मूढाः परमनीचा नेच्छन्त्यहो विषयवासनाविलासवैभव इति भावः ॥ तदुक्तं श्रुत्या उलूकस्य यथा भानुरन्धकारः प्रतीयते स्वप्रकाशे परानन्दे तमो मूढस्य जायते इति । एतेन महद्भिः कृपयोपदेष्टुमाहूता अपि मूढाः ज्ञानलवदुर्विदग्धत्वाद्विषयानुभूतिभङ्गभीत्यावाश्रुतभावेनानभिपश्यन्तसन्तस्सत्सरणां दूरेण निरस्यारण्यसरण्यामेव संसरन्ति । किमु कुर्वन्तु सन्त इति सूचितं भवति ॥

Alas! people with their intellect deluded do not pay heed to the aforesaid principle of

Atman present within themselves. Owls do not dare to look at the sun in the sky who illuminates the entire world.

Notes :— On the principle 'no means no end' the following two slokas describe the nature of the ignorant who have not the means to realise the Atman within एकान्तसन्निहितं means seated close within the mind seeing everything. अशेषजगत्प्रकाशं seated within the Atman throws light on all, the subtle intellect and the gross forms of the Prapancha ; or like the sun the universe, the Atman illuminates the entire world; or the Atman is well known in all beings as the spirit of egoism. In illustration is given the instance of owls that dare not look up to the sun who illuminates the entire universe. The author bewails the lot of the ignorant who are given up to the evanescent worldly pleasures without a thought for realising the Atman of eternal bliss. They would prefer to tread the jungle track of ignorance to the royal road to the Atman indifferent to all Gurus and their advice.

किं च

आनन्दविस्फुरणरूपमपि प्रपञ्च-
मन्यं विभाव्य परितापमुपैति मुग्धः ।
दीपादिषु स्ववपुषः परिदृश्यमानां
छायां विगाह्य परिमुह्यति किं न बालः ॥ २१

आनन्देति ॥ इतः कोन्वस्ति मूढात्मा यस्तु स्वार्थे प्रमाद्यति दुर्लभं मानुषंदेहं प्राप्य तत्रापि पौरुषमित्यादिवचनात् ॥ मूढस्साधने सत्यपि माया-वशात् स्वसाध्यवस्तुप्रमादी मूढः आनन्दविस्फुरणरूपमपि कार्यकारणाभेद-न्यायेन विवर्तोपादानभूतसच्चिदानन्दस्वरूपमपि प्रपञ्चं परिदृश्यमानं जगत्सर्वं अन्यं विभाव्य रज्जुसर्पवत् सच्चिदानन्दस्वरूपादितरमिति परिकल्प्य परितापं

आध्यात्मिकादिदुस्सहदुःखं उपैति प्राप्नोति सन्ततमनुभवतीत्यर्थः ॥ अत्र दृष्टान्तमाह दीपादिष्वित्यादिना ॥ बालः अर्भकः दीपादिषु प्रदीपादिषु आदि शब्देनादर्शनादिषु च परिदृश्यमानां ईक्ष्यमाणां स्ववपुषः स्वशरीरस्य छायां विगाह्य प्रविश्य स्वशरीरवैलक्षण्येन परिलक्ष्येत्यर्थः परिमुह्यति न किं परिमुह्यत्येवेत्यर्थः ॥ यथार्भकः स्वाभिन्नामपि छायां भिन्नत्वेन परिकल्प्य पिशाचत्वादि बुद्ध्या नितरां परितापमनुभवति तथा मन्दमतिः स्वाभिन्नमपि जगति भिन्नत्वेन परिकल्प्य जीवत्वादिबुद्ध्या नितरामनवरतमाध्यात्मिकादिपरितापमनुभवतीति भावः ॥ एतेन दुर्लभो मानुषो देहो ब्राह्मो देहः सुदुर्लभ इत्यादिवचनात् मनुष्यत्व पुरुषत्व ब्राह्मणत्वादिकमतिदुर्लभं पुरुषार्थसाधनं लब्ध्वाप्यतिमन्दोऽतिसुलभमानन्दकरमप्यात्मतत्त्वमविचार्य नितरामनवरतपरितापकरमपि सुतदुहितृकलत्रादिकमुररीकृत्य तत्पोषणायैव वेषमोषणकर्षणादिकमतिदूषणमप्यतिभूषणीकृत्याध्यात्मिकाधिभौतिकादि तापत्रयनिबिडबडवानलादिपरिपूर्णे निस्सारसंसारापारसागरे पतितो निमज्जन्नुन्मज्जन्नत्यन्तपरितापमनवरतमनुभवत्यहो कष्टमिति दुष्टहृदयमुद्दिश्य शिष्टहृदयपरितापरूपमाविष्कृतं भवति ॥ परतापात् द्रवते सतां मन इति न्यायात् तस्मात् तत्तापनिवृत्त्यै स्वस्य मूढत्वानर्थनिवृत्तिद्वाराखण्डानन्दावाप्तये च साधनसंपत्तिपुरस्सरं चिरं निरन्तरमादरेण श्रवणमननादिकं कृत्वा आत्मज्ञानमवश्यं संपादनीयमिति सूचितं च ॥

Moreover: Regarding the world, as different, though it is but a manifested form of Bliss Absolute (Atman) the deluded ignorant suffers great sorrow. Does not a child become deluded on getting into the shadow of his own body seen in the light of lamps and the like?

Notes :— Having the means of realisation like the human body and manly exertion, it is a pity that the ignorant fails to make use of them. Can there be a greater fool? आनन्दविस्फुरणरूपं—On the principle that the effect is not different from the cause, the Vedantin holds that this

worldly phenomenon is but a form of Atman manifest. The second half of the verse is in illustration of the fact asserted in the first half. It is well known that a child may think of his own shadow cast in the light of lamp or reflected in a mirror as something different from himself and get afraid of it as being a ghost and the like. Though possessed of the means of realisation, the ignorant does not pay heed to the principle of Atman but gets deluded in the worldly bondages of son, wife and so forth and takes to any means, fair or foul, to keep them up and thus for ever remains immersed in the ocean of worldly existence. The author, as natural with the virtuous, feels pity for their lot and insists that knowledge of Atman should be acquired by all at any cost.

माया स्वकीयवियदादिविकारजालै-
र्नात्मानमन्यथयितुं प्रभवत्यसङ्गम् ।
आधारपुष्करपलाशकमंबुधारा
स्वीयैः किमार्द्रयितुमर्हति शीकरौघैः ॥ २२

एवं मन्दमतिस्वभावं प्रतिपाद्य माया समस्तजनसम्मोहिनी स्वकार्यनिकरैरात्मानं निर्विकारमपि सविकारतां प्रापयितुमतिसमर्था खलु । पुनः कथमात्मनो निर्विकारित्वमित्याशङ्कां परिहर्तुमाह । यद्वा एवं सज्जनदुर्जनयोरुभयोरपि माया तत्कार्यविकारसञ्जातसन्तापत्वे सति निर्विकारित्वमात्मनोनुपपन्नमित्याशङ्कामुपशमयितुं मायास्वकार्यविकारनिकरैरात्मानमसङ्गमन्यथाकर्तुं न शक्नोतीत्याह ॥ अव्यक्तनाम्नी परमेशशक्तिरनाद्यविद्या त्रिगुणात्मिका परा । कार्यानुमेया सुधियैव माया यया जगत्सर्वमिदं प्रसूयते ॥ सन्नाप्यसन्नाप्युभयात्मिका नो भिन्नाप्यभिन्नाप्युभयात्मिका नो । साङ्गाप्यनङ्गाह्युभयात्मिको नो महाद्भुतानिर्वचनीयरूपा ॥ इत्याचार्यवचनात् । माया सदसद्भ्यामनिर्वचनीया त्रिगुणात्मिका परिणामिकारणमपरा प्रकृतिः परमेशशक्तिः स्वकीयानां स्वीयानां वियदादिविकाराणामाकाशादि परिणतानां जालैः समूहैः

स्थूलसूक्ष्मकारणसमष्टिरूपानेककोटिब्रह्माण्डपिण्डाण्डमण्डलैरित्यर्थः। यद्वा स्वकीयानां वियदादीनामाकाशादीनां विकारजालैः गंभीरशब्दास्त्रशस्त्रादिसङ्घातैः करणैरसङ्गः येनकेनापि संबन्धरहितं असङ्गोह्ययं पुरुष इति श्रुतेः आत्मानं स्वाधारं प्रत्यगभिन्नं परं ब्रह्म अन्यथयितुं अन्यथाकर्तुं विकारितां प्रापयितुमिति यावत् न प्रभवति शक्ता न भवतीति मायाया जडत्वादात्मनोऽसङ्गत्वाच्चेति भावः॥ तदुक्तं श्रुतिभगवदाचार्यप्रभृतिभिः। न जायते म्रियते वा विपश्चिन्नायं कुतश्चिन्न बभूव कश्चित्। अजो नित्यो शाश्वतोऽयं पुराणो न हन्यते हन्यमाने शरीरे॥ अविनाशी वारेयमात्मा॥ अविनाशी नित्य इति॥ वेदाविनाशिनं नित्यं य एनमजमव्ययम्। कथं स पुरुषः पार्थ कं घातयति हन्ति कम्॥ नैनं छिन्दन्ति शस्त्राणि नैनं दहति पावकः। न चैनं क्लेदयन्त्यापो न शोषयति मारुतः॥ अच्छेद्योऽय मदाह्योऽयमक्लेद्योऽशोष्य एव च॥ नित्यः सर्वगतःस्थाणुरचलोऽयं सनातन। न जायते नो म्रियते न वर्धते न क्षीयते नो विकरोति नित्यः विलीयमाने च वपुष्यमुष्मिन्न लीयते कुंभ इवांबरस्वयमिति॥ तस्मादात्मनः सर्वविकाररहितत्वं सिद्धम्। अत्र दृष्टान्तमाह आधारेत्यादिना आधारपुष्करपलाशकं स्वाश्रयपद्मपत्रं आर्द्रयितुं आर्द्रीकर्तुं आर्द्रतां प्रापयितुमित्यर्थः। विस्पष्टमवशिष्टम्॥

Maya with hosts of her modifications like Akasa and so forth is not able to workout any change in the Atman which is bereft of all attachment. Is the flow of water with its innumerable drops able to wet the lotus leaf, its support?

Notes:— Here is described that Maya though powerful to bring about modifications is nevertheless powerless as regards the immutable Atman. Maya is indescribable. She is the power of the Supreme Atman of the three moods of Satva, Rajas and Tamas. **वियदादि** denotes the subtle and gross forms or missiles and weapons producing great noise. Maya by herself is inert while Atman is ever

unattached. This has been confirmed by several scriptures, by the Lord Himself and by the Guru. Like the atmosphere in the pot, the Atman is not destroyed when the body perishes. This is illustrated by the drops of water falling on a lotus leaf.

आभासमात्रतनवो जगतीविकल्पा
मां न स्पृशन्त्यपि विमुक्तसमस्तसङ्गम् ।
आरोपिता मलिनतादिविचित्रधर्मा
लिम्पन्ति किं नु विमलं वियदन्तरालम् ॥ २३

उक्तमेव प्रकारान्तरेण प्रतिपादयति आत्मनो निर्विकारित्वे निर्विचिकित्साय ॥

आभासेति ॥ आभासमात्रतनवो: आभासमात्रा: शुक्तिरजतवत् प्रतीतिमात्रा: तनवो येषां ते तथोक्ता जगतीविकल्पा: जगतीषु लोकेषु विकल्पा: मनुष्योऽयं ब्राह्मणोऽयं क्षत्रियोऽयं वैश्योऽयं शूद्रोऽयमयं ब्रह्मचारी गृहस्थोऽयं वानप्रस्थोऽयं सन्यासीपुरुषोऽयमियं स्त्री नपुंसकोऽयमित्यादिरूपा: घटपटमठकुड्यकुसूलादि रूपाश्चारोपास्सर्वे । यद्वा जगत्य:स्वस्मिन्नारोपिता अव्यक्तादिस्थूलान्ता: समष्टिव्यष्ट्यात्मिकास्तत्स्था ये विकल्पा आब्रह्मस्तंबपर्यन्तनामरूपगुणकर्मतदवस्थावैचित्र्यात्मकास्ताश्च सर्वे । विमुक्तसङ्गं विमुक्ता निर्मुक्ता समस्तसङ्गा: संयोगसमवायाद्यशेषसंबन्धा येन तं तथोक्तं मां आत्मानं कूटस्थासङ्गचिद्रूपमपि न स्पृशन्ति । किमुवक्तव्यं निरुपाधिकनिरतिशयनित्यशुद्धबुद्धमुक्तस्वभावमखण्डानन्दैकरसं परं ब्रह्म न स्पृशन्तीति भाव: । यद्वा तेहस्मवै पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ भिक्षाचर्यं चरन्तीति श्रवणात् ॥ विमुक्तसमस्तसङ्गं विमुक्ता: विधिना सन्यस्ता: समस्तसङ्गा: पुत्रैषणादय: सर्वे येन तं तथोक्तं मां वेदान्तश्रवणार्थं विधिवत् सन्यस्तसमस्तकर्माणं परमहंसमपि न स्पृशन्ति । किमु वक्तव्यं कूटस्थासङ्गचिद्रूपं परं ब्रह्म न स्पृशन्तीति भाव: । असङ्गो ह्ययं पुरुष इति श्रुते: । न मां कर्माणि लिम्पन्तीत्यादि भगवद्वचनाच्च । एतेन स्वव्यतिरिक्तस्यारोपितत्वेनाभासमात्रत्वात्

स्वस्यासङ्गत्वाच्च ब्रह्मणापि विकारित्वं वक्तुं स्मर्तुं च न शक्यमिति सूचितं भवति ॥ अत्र दृष्टान्तमाह आरोपिता इति मलिनतादि विचित्रधर्माः नील-पीतरक्तत्वादि नानाप्रकारधर्माः सुगममन्यत् ॥

The seeming distinctions in the world, only in forms do not touch me at all who am bereft of all attachment. Do the various superimposed properties of impurity and so forth defile the aerial space which is pure?

Notes :— Here is the same fact explained in another way to remove all doubts as to the immutability of the Atman. जगतीविकल्पाः—The various distinctions of the world as man, Brahmin, bachelor, woman, pot etc. are not real, but merely superimpositions or it may mean the earthly superimpositions on the Atman. मां (Me) may refer either to the individual soul or the Supreme soul. If in the case of the former which has given up all attachments the earthly distinctions do not touch it, how much more should the Supreme soul of no adjuncts, eternal, pure and consciousness and so forth be untainted by such distinctions! This has been confirmed by scriptural texts and by the Lord Himself as He says 'Actions or Karmas do not taint Me' and so on. In illustration thereof is the aerial space that is not tainted by any impurity or by any seeming colour such as blue, yellow, red and so forth.

स्वप्नस्सुषुप्तिरथजाग्रदिति ह्यवस्था-
स्तिस्रोऽपि शश्वदुदयास्तमयैरुपेताः ।
निर्मोकराजय इवोरगराजभोगे
मय्येव साक्षिणि विभान्त्यनुवर्तमाने ॥ २४

एवमात्मनि निर्विकारित्वं प्रतिपाद्य संप्रति जाग्रदादयस्तिस्रोऽप्यवस्था मय्येव साक्षिणि विभान्तीति प्रतिपादयति । स्वस्य सर्वसाक्षित्वादिकं सूचयितुम् ॥

स्वप्न इति ॥ स्वप्नः जागर्तिविषयानुभूतिसंस्कारजप्रत्ययः स विषयः । सुषुप्तिर्निद्रा सर्वविषयप्रत्ययप्रलयरूपा । अथ अनन्तरं जाग्रत् जगर्या सर्वेन्द्रियैर्विषयोपलब्धिरिति तिस्रोऽवस्थाः अपि शब्दात् तद्देहतद्व्यापार तदभिमानिनः अतीताश्चानागताः समष्टिव्यष्ट्यात्मकाः शश्वत् आमोक्षं उदयास्तमयैः उत्पत्तिस्थितिप्रलयैः उपेताः समन्विताः सत्यः निर्मोकानां कञ्चुकानां राजयः पङ्क्तयो निर्मोकराजयः कञ्चुकपङ्क्तयः उरगराजभोगे उरगाणां सर्पाणां राजा उरगराजः तस्य भोगे वर्ष्मणीव अनुवर्तमाने अवस्थात्रयमनुविद्यमाने साक्षिणि साक्षात् ईक्षत इति साक्षी अवस्था तद्देहतद्व्यापारतदभिमानिनां साक्षाद्द्रष्टा तस्मिन् मयि प्रत्यगभिन्ने सच्चिदानन्दैकरसे ब्रह्मण्येव विभान्ति विराजन्ते । न तु तदभिमानिषु विश्ववैश्वानरादिषु तेषां अवस्थात्रयानुवर्तमानभावाभावादिति भावः ॥ मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् । मयि सर्वं लयं याति तद्ब्रह्माद्वयमस्म्यहमित्यादि श्रुतेः ॥ एतेनात्मनस्सकलभुवनभोक्तृभोजनभोग्यभोगालयभोगसाधनादिविलक्षणत्वं तत्साक्षित्वं तदस्पष्टत्वमविकारित्वं नित्यमङ्गलत्वं च सूचितं भवति ॥ त्रिषु धामसु यत्भोग्यं भोक्ता भोगश्च यद्भवेत् । तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः ॥ इत्यादिश्रुतेर्विद्वदनुभूतेश्च द्योतको हि शब्दः ॥

The three states of dream, deep sleep and wakefulness are ever accompanied with rise and fall. Like the rows of sloughs on the body of the lordly serpent they shine or exist in 'Me', which abides in them throughout as the spectator.

Notes:— Herein is described the omnipresence of the Atman who is the spectator eternal.

स्वप्न or dream is the state whose contents are the experiences of the objects in the state of wakefulness.

सुषुप्ति is deep sleep wherein all knowledge of all objects of senses is extinct and जाग्रत् wakefulness is the state where all senses function. All these states are witnessed by the Atman of the nature of Sat, Chit and Ananda and not by their presiding deities of Viswa Vaiswanara and others since they do not abide in the three states throughout. The scriptures also declare, "All are born in Me, all are sustained in Me, all are dissolved in Me, I am that Brahma, the one without a second, the 'I' in all". Hence the Brahma is different from all worldly objects and is the eternal spectator, indistinct, immutable and ever auspicious.

स्वप्नः प्रजाग्रदिति शब्दकृतो विशेषो
मायामयत्वमुभयोरपि तुल्यमेव ।
प्रत्यक्परागिति नामकृतो विकल्पः
सत्यावबोधसुखतां तु तयोस्स्वरूपम् ॥ २५

मायास्वकीयेत्यारभ्यानुवर्तमान इत्यन्तेन ग्रन्थेनात्मनः सर्वाधारत्वासङ्गत्वनिर्विकारत्वसर्वसाक्षित्वादिकं प्रतिपाद्य सम्प्रति पूर्वं भूमा भवानित्यादावुक्तमपि जीवात्मपरमात्मनोरैक्यमतिरहस्यमपि पुनरप्युपदिशति परमकृपालुराश्रितानां परमकैवल्यज्ञानदाढ्यार्य ॥

स्वप्न इति ॥ प्रत्यगितिपदस्य अविद्यातत्कार्येभ्यः सर्वेभ्यः प्रातिलोम्येनाञ्चति प्रकाशत इति विग्रहः । परागिति मायातत्कार्येभ्यः सर्वेभ्यः परत्वेन वैलक्षण्येनाञ्चतिप्रकाशत इति विग्रहः । प्रत्यक् जीवात्मा पराक् परमात्मा चेति द्विप्रकारोऽयं विकल्पः नामकृत एव न तु वस्तुभेदकृतः तयोः प्रत्यक् पराचोः स्वरूपं तु सत्यावबोधसुखता एव सच्चिदानन्दत्वमेव ॥ अत्रायं भावः पराक् पदेन तत्पदार्थः प्रत्यक् पदेन त्वं पदार्थश्च ग्राह्यः ॥ पदार्थस्तु द्विविधः वाच्यार्थो लक्ष्यार्थश्चेति । तत्र समष्ट्यज्ञानात्मिकं तदवच्छिन्नं सर्वज्ञत्वादिविशिष्टं चैतन्यमनवच्छिन्नं चैतन्यमेकीभूय तप्तायः पिण्डवत् प्रतीयमानं तत्-

पदवाच्यार्थः एतदाधारभूतमनविच्छिन्नं चैतन्यं तत्पदलक्ष्यार्थः। व्यष्ट्यज्ञानादिकं तदवच्छिन्नं, किञ्चिज्ज्ञत्वादिविशिष्टं चैतन्यमनविच्छिन्नं चैतन्यमेकीभूय तप्तायः पिण्डवत् प्रतीयमानं त्वंपदवाच्यार्थः एतदाधारभूतमनविच्छिन्नं चैतन्यं त्वंपदलक्ष्यार्थः ॥ तत्र वाच्यार्थयोः परस्परविरोधात् सर्वज्ञत्व किञ्चिज्ज्ञत्वादिविरुद्धधर्मान् निरस्य सोऽयं देवदत्त इत्यत्र यथा तथा जहदजहल्लक्षणया विरुद्धकूटस्थब्रह्मणोरविद्या मायाद्याधारभूतयोर्लक्ष्यार्थयोरनविच्छिन्नसच्चिदानन्दलक्षणयोरैक्यमेव ज्ञातव्यं न तु नामादिकृतभेदत्वमिति ॥ तदुक्तं विद्यारण्यमुनिभिः। कूटस्थब्रह्मणोर्भेदं नाममात्रादृते नहि घटाकाशमहाकाशौ वियुज्येते नहि क्वचिदिति श्रुतिभिश्च। त्वमिति तदिति कार्ये कारणे सत्युपाधौ द्वितयमितरथैकं सच्चिदानन्दरूपम् ॥ उभयवचनहेतू देशकालौ च हित्वा जगति भवति सोऽयं देवदत्तो यथैकः इति। अत्र दृष्टान्तमाह। स्वप्नं जागर्ति संस्कारजन्यप्रत्ययस्सविषयः। प्रजाग्रत् पूर्वजन्मजाग्रत् संस्कारजन्यप्रत्ययस्सविषयश्चेति विशेषो भेदः शब्दकृतः नामप्रवृत्त एव नत्वर्थकृतः उभयोः स्वप्नजागरयोरपि मायामयत्वं तु अनाद्यविद्यावासनाविकारत्वं तु तुल्यमेव समानमेव। द्वयोरपि मायाविजृंभितत्वादि भावः। तदुक्तं स्कान्दे भगवता यथा स्वप्नप्रपञ्चोऽयं मयि मायाविजृंभितः तथा जाग्रत्प्रपञ्चोऽयं मयि मायाविजृंभित इति ॥

The difference, as dream and wakefulness, is one of words only. Both are verily equal being, of the nature of Maya. The distinction, as the individual soul and the Supreme soul, is one of name only. Their intrinsic nature is Sat, Chit and Ananda (reality, consciousness and bliss absolute).

Notes:— After explaining the nature of Atman as being the prop of all, non-attached, immutable and all seeing, herein is explained the identity of the individual soul and the Supreme soul. प्रत्यक्—that which shines as

opposed to ignorance and all its effects, viz., the individual soul. पराक् is that which shines as different from Maya and all her effects. The difference as प्रत्यक् and पराक् is only nominal, not substantial. The nature of both is verily Sat (reality), Chit (energy) and Ananda (bliss). The word पराक् is suggestive of तत् (That, the Supreme soul) while प्रत्यक् is suggestive of त्वं (Thou, the individual soul). The meaning of a word may be of two kinds viz. Vaachya (expressed) and Lakshya (indicated). The expressed meaning of Tat is that which is qualified by All-knowingness and so forth while that of Thvom (त्वं) is that qualified by little-knowingness and the like while the indicated meaning of both is the basic support of that energy of the nature of Sat, Chit and Ananda. As told by the sage Vidyaranya—" There is no difference between the Individual Soul and the Supreme Soul except in name. The atmosphere in the pot and the atmosphere around are never different ones. Both dream and wakefulness are born of Maya and are equally liable to the modifications caused by the beginningless Avidya or ignorance". This has been asserted by the Lord Himself in Skanda Purana.

सर्वेन्द्रियोपरमशान्तजगद्विकल्पाः
स्वानन्दमात्रपरिशेषितचैत्यबोधे ।
ते जाग्रतोऽप्यनुभवन्ति सुषुप्त्यवस्थां
क्रीडन्ति ये सततमात्मनि सत्यबोधे ॥ २६

एवं जीवपरयोरभेदमुपदिश्यानन्तरं तमनवरतमनुदिनमनुसन्धानवतामनुभूतिमुपदिशति श्रद्धया मुमुक्षूणामात्मानुसन्धानप्रवृत्तिसिद्धये ॥

सर्वेति ॥ ये श्रवणादिजन्यज्ञानवन्तो मुमुक्षवः सर्वेन्द्रियोपरमशान्तजगद्विकल्पाः सर्वेषामिन्द्रियाणां चक्षुरादीनां समनस्कानां वागादीनां च

सप्राणानां उपरमः विरतिः विषयप्रवृत्तिविरोध इति यावत् तेन शान्ताः नष्टाः जगद्विकल्पाः आकाशादि समस्तप्रपञ्चभ्रमा येषां ते तथोक्तास्सन्तः अत एव स्वानन्दमात्रपरिशेषितचैत्यबोधे स्वानन्दमात्रपरिशेषितस्वरूपसुखमात्रावशिष्टः चैत्यबोधः सर्वदृश्यचराचरात्मकप्रपञ्चप्रत्ययः यस्मिन् तस्मिन् पूर्णानन्दैकरस इत्यर्थः अत एव सत्यबोधे सच्चित्स्वरूपे आत्मनि प्रत्यगभिन्ने परे ब्रह्मणि सततं अनवरतं क्रीडन्ति रमन्ते। सर्वमिदमहं च ब्रह्मैवेति चिरं निरन्तरमनुसन्धधत इत्यर्थः। ते निरन्तरमनुसन्धानवन्तो महान्तो जाग्रतोऽपि जाग्रदवस्थायामपि सुषुप्त्यवस्थां अनुभवन्ति निर्विषयानन्दमश्नातीत्यर्थः॥ अयं भावः। तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः नानुध्यायात् बहून् शब्दान् वाचो विग्लापनं हि तत् इत्यादिश्रुतिवचनानुसारेण ये ससाधनास्सद्गुरुमुखादध्यारोपापवादपुरस्सरं महावाक्यश्रवणमनने कृत्वाऽऽत्मानं ज्ञात्वा तद्ध्यानाय बहिःप्रवृत्तिनिवृत्तसर्वेन्द्रियास्सन्तः दृश्यमशेषमात्मन्येव निश्शेषं प्रविलाप्य नित्यशुद्धबुद्धमुक्तस्वभावमखण्डसत्यज्ञानानन्दैकरसमद्वितीयं परं ब्रह्मैवाहमस्मीति परिपूर्णवृत्त्या चिरं निरन्तरमनवरतमाहारविहारव्याहारशयनासनादिष्वपि संभजन्ति ते समस्तवासनानां निश्शेषसंक्षये सति नेत्रतैमिरिकावरणनिश्शेषताशे शरदिन्दुदर्शनाह्लादवन्नित्यं निरन्तरं निरतिशयमनिर्वचनीयमुत्तमं ब्राह्मं सुखं सुखेनानुभवन्तीति॥ तदुक्तं भगवता—प्रशान्तमनसं ह्येनं योगिनं सुखमुत्तमम्। उपैति शान्तरजसं ब्रह्मभूतमकल्मषम्॥ युञ्जन्नेवं सदाऽऽत्मानं योगी विगतकल्मषः। सुखेन ब्रह्मसंस्पर्शमत्यन्तं सुखमश्नुते—इति॥ श्रुतिभिश्च समाधिनिर्धूतमलस्य चेतसो निवेशितस्यात्मनि यत् सुखं भवेत्। न शक्यते वर्णयितुं गिरा तदा स्वयं तदन्तःकरणेन गृह्यते इति॥ इदमेव सुखं सात्त्विकमिति बोद्धव्यम्। तच्चोक्तं श्रीभगवता—यत्तदग्रे विषमिव परिणामेऽमृतोपमम्। तत्सुखं सात्त्विकं प्रोक्तमात्मबुद्धिप्रसादजमिति॥ अनेन नित्यसुखेच्छोः साधनमेवातिप्रयत्नेन साधनीयं न तु साध्या। सति साधने साध्यस्याप्रयत्नसाध्यत्वादिति सूचितं भवति॥

They, in whom distinctions as universe and the like are subsided on account of the cessation (of the activities) of all the senses and who

exult always in the Atman whose experience then of the worldly phenomenon is but its own nature of bliss left behind, and who is also Sat (reality) and Chit (energy), enjoy the state of deep sleep though they are wakeful.

Notes :— Having explained the identity of the individual soul and the Supreme soul, herein is described the experience of those who are given up to the incessant meditation of the Atman.

The expression Sarvendriya connotes, not only the senses but also the mind, speech and the like and the vital breaths too. Jagatvikalpa means all delusions as the world, sky and so forth. Chaityabodha means the experience of the worldly phenomenon with all its visible movable and immovable objects therein. The Swarupa refers to the intrinsic nature of the Atman, viz. bliss absolute. The scriptures also declare that the Atman, the Supreme is to be known and meditated on and mere repetition of sounds is but a waste of words. The gist is : One should first acquire the necessary spiritual qualification, then hear from the preceptor the explanation of the great maxims as 'Thou art That' (तत्त्वमसि) and the like and then meditate on them oneself. Controlling the outward activities of the senses, gradually get dissolved the entire visible in the Supreme Atman and incessantly meditate on it. Gradually there will dawn within the spiritual absolute bliss of the Atman. That bliss is one to be experienced only and is incapable of any description by words. Hence what is required is the acquisition of the spiritual means at which the end will follow of its own accord.

कर्तेति कायिकविचेष्टितदर्शिनो मां
गृह्णन्ति चेत् किमु यथैव तथा भवामि ।
पारिप्लवोऽयमिति पामरधीगृहीत-
श्चन्द्रस्तथा नहि चलांबुदसन्निकृष्टः ॥ २७

नन्वहं करोम्यहं कारयाम्यहं भुंजेऽहं भोजयामीति कर्तृत्वकारयितृत्व-भोक्तृत्वभोजयितृत्वादिकमात्मन्येव दृश्यते विदामविदां च कथं कर्तृत्वादिधर्म-विशिष्टस्यात्मनः कर्तृत्वादिधर्मरहितब्रह्मभावः सिध्यतीत्याकांक्षायां केवलपाम-रारोपितकर्तृत्वादिभिरात्मा स्वतस्सिद्धब्रह्मभावः कर्त्रादिरूपो न भवतीत्याह कर्तेति ॥ कायेन निर्वर्त्यानि कायिकानि शारीरादिकाणि विचेष्टितानि विशेष-व्यापाराः विहाराहारादिरूपास्तान्येव द्रष्टमात्मधर्मत्वेन मन्तुं शीलं येषां ते कायिकविचेष्टितदर्शिनः शारीरव्यापारमात्रदर्शिनः अस्थिमांसादिविकारविण्मूत्र-गात्राभिमानिनः परमनीचाः मामकर्तारमनाकारमनन्तरं कूटस्थासङ्गचिद्रूपं परं ब्रह्म कर्तेति कर्तृपदं कारयितृत्वादीनामुपलक्षणं कारयिता भोक्ता भोजयितेति गृह्णन्ति चेत् कल्पयन्ति यदि यथा येनकेनप्रकारेणाहं तथैव कर्तृत्वादिधर्मैव भवामि किमु न भवाम्येवेत्यर्थः किंतु कर्तृत्वादिधर्मशून्यं निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं निराधारं निर्विकारं नित्यशुद्धबुद्धमुक्तस्वभावमखण्ड-सच्चिदानन्दैकरसमद्वितीयं च यत् परं ब्रह्म तदेवाहमस्मि ॥

निद्राभिक्षे स्नानशौचे नेच्छामि न करोमि च । द्रष्टारश्चेत् कल्पयन्ति किं मे स्यादन्यकल्पनात्—इति विद्यारण्यमुनिवचनात् ॥ व्यापृतेष्विन्द्रिये-ष्वात्मा व्यापारी वा विवेकिना । दृश्यतेऽभ्रेषु धावत्सु धावन्निव यथा शशी ॥ अज्ञानात्मानसोपाधेः कर्तृत्वादीनि चात्मनि । कल्प्यन्तेऽम्बुगते चन्द्रे चलनादि यथांभसः ॥ निर्गुणो निष्क्रियो नित्यो निर्विकल्पो निरञ्जनः । निर्विकारो निराकारो नित्यमुक्तोऽस्मि निर्मलः ॥ अहमाकाशवत् सर्वं बहिरन्तर्गतोऽ-च्युतः । सदा सर्वसमस्सिद्धो निःसङ्गो निर्मलोऽचलः ॥ नित्यशुद्धविमुक्तैक-मखण्डानन्दमद्वयम् । सत्यं ज्ञानमनन्तं यत् परं ब्रह्माहमेव तत् ॥ इत्याद्या-चार्यवचनाच्चेति भावः ॥ ननु स एव मायापरिमोहितात्मा शरीरमास्थाय करोति सर्वम् ॥ एष एव साधुकर्मकारयतीत्यादि श्रुतिवचनात् आत्मन एव

कर्तृत्वादिकं वक्तव्यमिति चेन्न । आत्मनः निष्क्रियत्वादविकारित्वाच्च तदनुपपत्तेः ॥ ननु कर्तृत्वादिकमात्मनिष्ठत्वेनैव प्रतिभातीति चेत् तदध्यारोपितमेव न तु स्वाभाविकम् । कर्तृत्वादेः स्वाभाविकत्वे सति बन्धस्यापि स्वाभाविकप्रसङ्गः मोक्षाभावप्रसङ्गः गुरुशास्त्रादिवैयर्थ्यम् । निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनं साक्षी चेता केवलो निर्गुणश्च इत्यादि श्रुतीनां मृषावादित्वं च स्यात् । तर्हि स एव मायापरिमोहितात्मा शरीरमित्यादि श्रुतीनां मृषावादित्वं स्यादितिचेन्न । तासां श्रुतीनां मायापरिमोहितात्मप्रतीयमानकर्तृत्वाद्याभासविषयत्वेन शुद्धात्मविषयत्वानुपपत्तेः ॥ चुम्बकसन्निधिमात्रेणायस इवात्मसन्निधिमात्रेण देहेन्द्रियादेश्चेष्टावत्वस्य विवक्षितत्वाच्च । तत्र किं प्रमाणमिति चेत् नाहं कर्ता नैव भोक्ता प्रकृतेस्साक्षिरूपकः मत्सान्निध्यात् प्रवर्तन्ते देहाद्या अजडा इव ॥ ध्यायतीव लेलायतीव प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः, अहङ्कारविमूढात्मा कर्ताहमिति मन्यते । तत्ववित्तु महाबाहो गुणकर्मविभागयोः ॥ गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते—इत्यादि श्रुत्यादिवचनमेवेति ब्रूमः । तस्मादात्मनः कालत्रयेपि कर्तृत्वादिकं नास्तीति सिद्धम् ॥ एतेन तत्त्वविद्भिर्व्युत्थानदशायां क्वचित् भिक्षाशनादौ सत्यपि देहेन्द्रियादिरेव कर्ता नाहमिति मन्यते । मूढैस्तु सदा देहादितादात्म्यं प्राप्याहं कर्ता भोक्तेत्यनवरतमभिमन्यत इति सूचितत्वाद्विवेक्यविवेकिनोराहारविहारसुखदुःखादि तुल्यत्वात् को विशेष इति शङ्कापि निश्शेषं निरस्ता ॥ अत्र दृष्टान्तमाह पारिप्लव इत्यादिना । पारिप्लवः प्रचलः पामरधीगृहीतः मन्दमतिकल्पितः चलांबुदसन्निकृष्टः प्रचलमेघसमीपस्थः । शिष्टं विस्पष्टम् ॥

Do I turn out a doer if those with an eye only to the activities of the body grasp me as such? The moon close by the moving cloud who is taken to be moving by the vulgar of dull intellect is never so (moving).

Notes.— The vulgar and the wise see the Atman only as the agent of doing and the like. As such, how can the Atman with such attributes as doer and so forth turn out to Brahmahood bereft of such attributes? It is

answered here that by the mere superimposition of the vulgar as such, the Brahma does not turn out to be doer or agent of any other function.

कायिकविचेष्टितदर्शिन:—Those who pride only in the activities of the body composed of bones, muscles and so forth. As the sage Vidyaranya says, neither does the Atman desire nor do such actions as sleeping or begging, bathing or any purification. If the vulgar attribute such functions to Brahma, how does it affect that Brahma which is eternal and ever immutable? When the senses function, the vulgar think of Brahma as so functioning. It is like thinking that the moon is moving when really the clouds nearby are moving or when the water in which she is reflected is rippling. Many a scriptural text can be cited describing the nature of Brahma as being immutable and the very 'I' of the individual soul. But there are many scriptural texts to the contrary as well to prove the agency of Brahma as doer etc. How can these be reconciled? The scriptures declare that the Atman is Nishkriya (without action) and Nirvikara (subject to no modification). As such if the Atman appears to be doer etc. it is only by superimposition and not natural. If the agency of Atman as doer is natural, then it is to be inferred that by nature Atman is subject to bondage as well. Then there is no question of Moksha too. Preceptorship and scriptures turn to be of no use and the scriptural texts that speak of Atman as Nishkriya etc. turn to be false. If so it may be argued as well that the text that the Atman deluded by Maya works seated in the body also becomes false. No Such texts have reference to the Atma deluded by Maya and not to the immaculate Atman. As the proximity of a lodestone acts on the iron, so also the proximity of the Atman acts on the body and the

senses and they act by themselves. This is declared by several texts. Hence it is to be concluded that the Atman has never at any time the agency as doer and the like. In short, it is the ignorant who identifies the Atman with the body and thinks that the Atman is the doer and so on, while the selfrealised, though he may take to begging and the like when he is off his religious abstraction, think that it is the body that works and not the 'I' in him. For illustration: the moon near the moving clouds appears to move to the ignorant though in fact it is the cloud that moves and not the moon.

मिथ्या समुल्लसतु नाम जगद्विचित्र-
मेतावता विमलतत्वविदो न हानिः ।
स्वप्ने भयङ्करगजादिनिरीक्षणेऽपि
न स्वात्मकत्वमनुसन्धधतोऽस्ति भीतिः ॥ २८

ननु तत्वविदां समाधिदशायामद्वैतभावात् भयदुःखादिकं नास्त्येव तथापि व्युत्थानावस्थायां स्वभिन्नस्य जगद्वैचित्र्यस्य प्रत्यक्षेणानुभूयमानत्वात् कथमद्वैततत्वं सिध्यति तदभावे कथं भयदुःखादिरहितत्वं सिध्यति तदसिद्धौ कथं विवेक्यविवेकिनोर्विशेष इत्याशङ्कामुपशमयितुमुपदिशति मिथ्येति ॥ नामजगद्विचित्रं तत्वविदो व्युत्थानदशायां नाममात्रेण जगत् अव्यक्तादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं तदेव विचित्रं विविधरूपं चित्रं अनाधारलेख्यमित्यर्थः । यद्वा जगन्नामविशेषचित्रं मिथ्या मृषारूपं समुल्लसतु सम्यक् विभातु । यद्वा नामरूपं जगद्विचित्रं विपरीतचित्रं आदर्शदृश्यमाननगरीतुल्यत्वादिति भावः अथवा नामजगत् विचार्यमाणे नाममात्रावशेषत्वात् विचित्रं विशेषेणाश्चर्यकरं अत एव मिथ्या । यद्वा विचित्रं विगतं नष्टं चित्रं स्वरूपं यस्य तत् विचित्रं दृष्टनष्टस्वभावं नामजगत् नामरूपप्रपञ्चः वाचारंभणं विकारोनामधेयं मृत्तिकेत्येव सत्यमित्यादिश्रुतेः यद्वा विचित्रं अविवेकिनां विशेषमत्यन्तरमणीयं चित्रं पुत्रमित्रकलत्रादि गात्रं क्षेत्रशास्त्रपात्रपत्रादिरूपं च यत्र तत् विचित्रं भक्तहृदय-

ह्याभासचित्वमित्यर्थः एतादृशं नाम जगत्सर्वं मिथ्या तद्विलक्षणमखण्डसच्चिदानन्दैकरसं ब्रह्मैव सत्यमित्युल्लसतु विस्फुरतु विवेकिनामित्यर्थः । यद्वा विचित्रं नानाविधरूपं मिथ्या नाम जगत् ब्रह्म सत्यं जगन्मिथ्येति श्रुतिप्रसिद्धं स्थूलादिसमस्तप्रपञ्चचक्रं समुल्लसतु व्युत्थानदशायां सम्यक् विभातु । एतावता मिथ्याभूत जगत्प्रतीतिमात्रेण विमलतत्त्वविदः विमलं निर्मलं त्रिगुणतत्कार्यनिर्मुक्तं तत्वं याथार्थ्यमबाधितस्वरूपमखण्डसत्यज्ञानानन्दाद्वयं ब्रह्मैवेत्यात्मत्वेन ज्ञायत इति विमलतत्त्ववित् निर्गुणब्रह्मज्ञानी तस्य हानिः स्वरूपच्युतिः देहादितादात्म्यमाध्यात्मिकादि दुःखं कोपं शापपापनरकादिभीतिर्वा न भवति । दृश्यमानस्य सर्वस्यापि जगतः स्वप्नार्थवन्मिथ्यात्वाद् व्युत्थानावस्थायामपि सर्वमिदमहं च ब्रह्मैवेत्यद्वैतभावस्मृतिभावादिति भावः ॥ तदुक्तं विद्यारण्यमुनिभिः—मायामयत्वं भोगस्य बुद्ध्वास्थामुपसंहरन् भुञ्जानोऽपि न सङ्कल्पं कुरुते व्यसनं कुतः । स्वप्नेन्द्रजालसदृशमचिन्त्यरचनात्वतः इत्यविस्मरतो हानिः का वा प्रारब्धभोगत इति ॥ अत्र दृष्टान्तमाह स्वप्न इत्यादिना स्वप्ने दृष्टस्य वस्तुनः स्वाप्नकत्वं स्वप्नसंबन्धि स्वात्मकं तद्भावः स्वात्मकत्वं अनुसन्धधतोऽनुस्मरतः पुंसः । सुगममन्यत् ॥

(To the realised) let the world with its various shades only in name and false verily will appear to exist (in his state of wakefulness after his religious abstraction). Is there any harm thereby to him who has realised the immaculate Supreme? Even at the sight of dreadful elephants and the like in dream, there is no fear for him who incessantly thinks of it as dream.

Notes:— To the realised there is no fear in the state of Samadhi or mental abstraction as he sees only oneness without a second. Yet how can he, when he actually sees a world around him and different from him in his wakeful state after Samadhi, come by the principle

of oneness. Without that realisation of oneness how can he get rid of fear and misery ? If one can not attain that state of freedom from fear and misery, what difference is there between the philosopher and the fool ? Herein is the explanation clearing such doubts. The expression नामजगद्विचित्रं is explained in many ways: (1) a world of many forms in name only just like a picture without a canvas, (2) a wonderful picture of the name of world, (3) a reflected image as world of names and forms (as in a mirror), (4) one which is highly wonderful as being a world but in name, (5) this seeming world of names and forms that has lost its intrinsic nature, (6) the world highly attractive with its bondages only to the ignorant (but not to the wise), (7) the false world of mere name of diverse forms. विमलतत्त्ववित is one who has known the attributeless Supreme Brahma. The word हानि (harm) refers to the fall from this state of realisation. The realised on seeing the seeming world does not identify his body with the soul, nor is subject to anger, curse, sin, fear of hell and so forth, since to him the world is like unto a dream and everything including himself is Brahma. To one who is firm in that thought, there is no fear of fall at any cost. In illustration is given the fearful vision of ferocious elephants and so forth in dreams which does not cause any fear to one who is aware that it is only a dream and not real.

अत्यन्तमेतदसदित्यपि चाव्यवस्थं
मध्यात्मदृष्टिरनुवर्तत एव लोकम् ।
नास्त्यत्र वक्त्रमिति निश्चितवानपि द्रा-
गादत्त एव मुकुरं मुखदर्शनाय ॥ २९

ननु लोके शुक्तिकारजतादि मिथ्यात्वदर्शनं तदादानादिप्रवृत्तिश्चोभयमप्येकत्र वस्तुमशक्यमेव खलु । तद्वद्विषयमिथ्यात्वदर्शनं तदादानादिप्रवृत्तिश्चोभयमप्येकत्र वस्तुमशक्यमेव । तस्मात् कथमस्य शरीरयात्रा सिध्यतीत्याकांक्षायामाह अत्यन्तमिति ॥

एतत् दृश्यमानं भोक्तृभोग्यभोगसाधनादिकं सर्वं अव्यवस्थं व्यवस्थारहितं उत्पत्तिविपत्तिमत्वादित्यर्थः अत एव अत्यन्तमसच्च शश्वत्तितरां नश्वरं च भवति । इत्यपि एवमपि मयि अनुसन्धानकर्तरि आत्माकारा दृष्टिः आत्मदृष्टिः ब्रह्माकाराकारितान्तःकरणवृत्तिः । लोक्यते दृश्यते इति लोकः भोक्तृभोग्यादिरूपः तं अनुवर्तत एव । व्युत्थानदशायां शरीरयात्रामात्रसिद्धये भिक्षाशनादिकं तत्क्षणमुररीकरोत्येवेत्यर्थः ॥ ननु भिक्षाशनादिना विक्षेपशतापत्तिरनर्थव्रातापातश्च स्यात् । ध्यायतो विषयान् पुंसस्सङ्गस्तेषूपजायते इत्यादि भगवद्वचनादिति चेन्न सपदि पुनरात्मस्मृतेः । तदुक्तं विद्यारण्यमुनिभिः अनुसन्दधतैवात्र भोजनादौ प्रवर्तितुं शक्यते अत्यन्तविक्षेपाभावादाशु पुनस्स्मृतेः ॥ किं च भगवदाप्युक्तं किल—निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् । यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः समस्सिद्धावसिद्धौ च कृत्वाऽपि न निबध्यते इति ॥ तर्हि भगवद्गिरां परस्परपरसविरुद्धत्वादग्राह्यत्वापत्तिरिति चेन्न । ध्यायतो विषयान् पुंस इति गिरश्चिरनिरन्तरविषयध्यानविषयत्वेन । शारीरमित्यादि गिरामचिरविषयध्यानविषयत्वेन चाविरुद्धत्वादग्राह्यत्वानुपपत्तेः ॥ यद्वा ननु एवं तत्वविदस्सर्वदृश्यमिथ्यात्वनिश्चयत्वे कर्मसु प्रवृत्त्यनुपपत्तिः दृश्य सत्यत्वनिश्चयपूर्वकत्वात् प्रवृत्तेः एवं सत्याधिकारिकाणां तत्वविदां सर्वदृश्यमिथ्यात्वनिश्चयवतां कथं लोकसंग्रहनिमित्तेषु कर्मप्रवृत्तिरित्याकांक्षायामाह अत्यन्तमिति । एतद्देह तत्कर्म तत्कर्म तत्साधनादिकं सर्वमव्यवस्थं व्यवस्थाशून्यं इदमित्थमेतावत्पर्यन्तं तिष्ठतीति नियमरहितमित्यर्थः अत एवात्यन्तं नितान्तमसद्विचार्यमाणे शशविषाणादिवत् काल-त्रयेप्यविद्यमानं च भवतीत्यर्थः । इत्यपि एवमपि मयि लोकसंग्रहचिकीर्षौ तत्वविदि आत्मदृष्टिः आत्मा मनः स एव दृष्टिः आत्मदृष्टिः मनश्चक्षुः वाक्काययोरुपलक्षणमेतत् मनोवाक्कायरूपं करणत्रयमित्यर्थः लोकं जनं जातावेकवचनं

सर्वान् जनान् कर्मसङ्गिनोऽज्ञान् अनुवर्तते एव अनुसृत्य तिष्ठत्येव विद्वानाधिकारिको लोकसंग्रहार्थं गुणागुणेषु वर्तन्त इति बुद्ध्वा त्रिविधैरेवकरणैः श्रौतस्मार्तादिकं कर्मकरोत्येवेत्यर्थः। न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम्। जोषयेत्सर्वकर्माणि विद्वान् युक्तस्समाचरन् ॥ लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसीत्यादि भगवद्वचनादिति भावः ॥ ननु तस्य लोकसंग्रहकर्तुः कर्मित्वेनाज्ञत्वप्रसङ्ग इति चेन्न। अज्ञदृष्ट्या कर्मित्वेऽपि तज्ज्ञदृष्ट्या कर्मण्यकर्मदर्शनेनाकर्मित्व ज्ञत्वप्रसङ्गाप्रसक्तेः। तदुक्तं श्रीभगवता कर्मण्यकर्मयः पश्येदकर्मणि च कर्म यः स बुद्धिमान् मनुष्येषु स युक्तः कृत्स्नकर्मकृदिति ॥ यद्वा ननु जगत्सर्वथा मिथ्यैवेति चेदात्मन आकाशः संभूत इत्यादि श्रुत्याऽऽकाशादि समस्तजगदङ्गीकरणं किमर्थमित्याकांक्षायामाह अत्यन्तमिति। अव्यवस्थमिदमित्थमिति व्यवस्थारहितमेतद्दृश्यमानमाकाशादि जगत्सर्वमत्यन्तं भृशमसज्ञादर्शदृश्यमाननगरवदसदेव। चकारोऽवधारणार्थं मायाकार्यत्वात् दृष्टनष्टस्वभावत्वाच्च शशविषाण नरविषाणादि वदतीव शून्यमेवेत्यर्थः। इत्यप्येवमपि मयि प्रत्यगभिन्ने सच्चिदानन्दैकरसे कूटस्थासङ्गचिद्रूपे परे ब्रह्मण्येव आत्मा अन्तःकरणं स्वात्माभिमुखीकृतं स एव दृष्टिः नेत्रं यस्य स आत्मदृष्टिः आत्माभिमुखीकृतचित्तवृत्तिरात्मजिज्ञासुरित्यर्थः। लोकं आकाशादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं जगदनुवर्तत एव अनुसरत्येव तत्क्षणमङ्गीकरोत्येवेत्यर्थः आत्मतत्वनिर्णयार्थमिति शेषः। अध्यारोपापवादाभ्यां ज्ञातव्यस्तत्वनिर्णय इति वचनादध्यारोपापवादाभावे तत्वनिर्णयाभावादिति भावः ॥ यद्वा ननु यद्येवं तत्वविदः सर्वथा जगन्मिथ्येति दृढनिश्चयस्तर्हि तदन्तःपातिनः साङ्गस्य समाधेर्मिथ्यारूपस्योपादानं किमर्थमित्याकांक्षायामाह अत्यन्तमिति ॥ एतत् तत्ववित् क्रियमाणमात्मानुसन्धानं साङ्गं व्यवस्थावस्थितिर्यस्य नास्ति तदव्यवस्थं अनवस्थं निराधाराज्ञानतत्कार्यान्तर्भूतत्वादाद्यन्ताधाररहितमित्यर्थः अत एव अत्यन्तं नितान्तं असच्च शशविषाणवत् कालत्रयेप्यभावरूपं च भवतीति शेषः। आद्यन्ताभाववस्तुतो मध्याद्यस्थानाभावादिति भावः। तदुक्तं विद्यारण्यमुनिभिः न व्यक्तेः पूर्वमस्त्येव न पश्चाच्चापि नाशतः, आदावन्ते च यन्नास्ति वर्तमानेऽपि तत् तथा इति ॥ इत्यप्येवमपि मयि समाधिकर्तरि आत्मा प्रत्यगभिन्नं सच्चिदानन्दैकरसं परं ब्रह्म तमुद्दिश्य या दृष्टिः बुद्धिः आवृत्तिरसकृदुपदेशादिति न्यायेन सद्गुरुमुखादसकृत् कृतश्रवणमननाभ्यां सञ्जातात्मतत्वनिश्चयात्मिका

साऽऽत्मदृष्टिः आत्माकारवृत्तिः सर्वमिदमहं च ब्रह्मैवेत्यखण्डाकाराकारितान्तःकरणवृत्तिरिति यावत्। लोक्यते आलोक्यते ब्रह्मतत्त्वं सम्यगनुभूयते अस्मिन् इति लोकः समाधिर्निर्विकल्पः ज्ञातृ ज्ञानादि त्रिपुटी विकल्पराहित्येन श्रवणादिनिश्चिताद्वैतात्मवस्तुनि तदाकारेण जलनिक्षिप्तलवणपिण्डवन्नितरामेकीभावेनावस्थानलक्षणः तमनुवर्तते अनुसरत्युररीकरोत्येवेत्यर्थः तत्क्षणं निश्शेषाशेषवासनानिवृत्तिद्वारा नित्यनिरतिशयाखण्डानन्दोदयार्थमिति शेषः ॥ एतेन स्वस्य धीसाक्षित्व निस्सङ्गत्व निर्विकारित्व निष्क्रियत्व निर्मलत्व पूर्णानन्दत्वादिकं सूचितं भवति ॥ अत्र दृष्टान्तमाह नेत्यादिना। मुकुरं आदर्शं द्राग् आदत्ते तत्क्षणमङ्गीक्रियते। विस्पष्टमवशिष्टम् ॥

All this (visible phenomenon of the universe) which is unstable is not real; even if this be so, as for me, my mind transformed into Brahmahood follows the world. Though one is sure that one's face is not in the mirror, yet quickly seizes it to see one's own face therein.

Notes:— To know that the pearl oyster is only silvery in appearance and still to accept it as pure silver are impossible. Likewise to know the worldly objects of senses to be unreal and at the same time to work for them are impossible. As such, how can one who sees all these as false lead a physical life in this world? This problem is discussed in this verse in its several aspects.

एतत्—This visible phenomenon of the universe with its various aspects as enjoyer, enjoyment, objects enjoyed and so on. अव्यवस्थं without any stability, being liable to birth and destruction. मयि in me given up to the incessant meditation on the Supreme Atman. आत्मदृष्टिः with the activities of a mind transformed into Brahmahood. लोकं the world of the aspects of enjoyee, enjoyment and the like. Thus the realised has of course to take up

to begging alms, eating food and so on merely for the upkeep of his body on earth. Now arises the doubt. Leading an earthly life thus is beset with several temptations and calamities. Has not the Lord Himself declared that the man who thinks of worldly objects of pleasure becomes gradually deeply attached to them ? To solve this doubt Sage Vidyaranya says that a man could take to worldly pursuits even as he is incessantly meditating on the Supreme. No temptation can stand in the way of his incessant meditation. Further it has been declared by the Lord Himself, "The self controlled realised man does not incur any sin by resorting to mere physical exertion and action. Also the realised with an even mind in all situations does not incur any bondage even by resorting to physical action." Now comes this objection: since the Lord's declarations as set forth above are inconsistent with the earlier text quoted are they worth accepting ? The answer is: they are to be accepted since there is no real inconsistency. For, the earlier text of increasing attachment in a man given up to thinking of the objects of pleasure refers to one who is *incessantly* thinking of that pleasure alone, while the two later texts sanctioning bodily actions for the realised have reference not to incessant but only to casual temporary meditation of the objects of pleasure. Another aspect of discussion is: Since the man who knows the truth and is realised considers everything visible around him as false, how can he take to any action at all ? All actions are based on the reality of the visible things around. As such how can the realised take to actions conducive to the welfare of the world ? The solution is given by explaining the verse in another way. एतत्—This body, its nature, its activities and so on. अव्यवस्थं uncertain as to how long it

will remain as such and so is greatly असत् (unreal). Like the rabbit horns it has not any reality at all at any time. Even though the nature of the body is such, as for me (मयि) who am intent on the welfare of the world I follow the ignorant world with my mind, word and body. Here आत्मदृष्टि: means with the eye of mind, word and body. Even the spiritually advanced should perform the actions enjoined by the scriptures and religious codes to infuse faith and enthusiam in the ignorant people. For the Lord has said one should not upset the faith of the ignorant. The wise should applaud their actions, himself performing them disinterestedly looking unto the welfare of the world. Since such a wiseman intent on the welfare of the world becomes a Karmin so far as he takes to action, does he not become tainted with ignorance ? No. Though he is a man of action in the eyes of the ignorant, he is not so in the eyes of the wise. For the Lord has said, 'He is the best of men who sees inaction in action, and action in inaction.' Such a man performing actions disinterestedly and without attachment stands foremost.

A third view of the verse is : If the universe is in always false, how does the scripture declare that the sky (आकाश) and the like arose from Atman ? The explanation is : this visible phenomenon of world and so forth being a product of Maya is as false as the city seen reflected in a mirror as they cannot be described with any definiteness. Still with a mind directed inward to the Atman (आत्मदृष्टि:) the spiritual aspirant takes for granted the world and so forth for the complete ascertainment of truth (तत्व), for reality can be definitely ascertained only by acceptance of erroneous knowledge (अध्यारोप) and refutation of the same (अपवाद). This verse is explained in another way also to meet the following objection, viz , if the knower

of reality is of the firm view that the world is unreal, why should he resort to Samadhi (religious mental abstraction) which is included in that? The explanation is: एतत् this incessant meditation on the Atman has no stability, being the effect of ignorance which has neither beginning nor end. Hence it is exceedingly unreal as the rabbit horn. As Sage Vidyaranya observes "that which has no beginning nor end has likewise no existence for the present also." Even if it be so, as for me who am given to such mental abstraction (मयि) that insight as to the nature of Atman (आत्मदृष्टिः), the Supreme, with a mind transformed to Brahmahood on account of the Guru's advice and by my own incessant meditation and the like leads me to experience that Brahmic bliss in the state of unalloyed Samadhi (लोकं) wherein I get dissolved as salt in water. Thus this verse explains that the Atman is a witness of one's intellect and is unattached, immutable, non-doing, immaculate, Absolute Bliss and so forth. The illustration of the face and mirror fully explains the point.

उद्बोधितोऽपि कबले कबले जनन्या
निद्रालसश्शिशुरिवाविदितान्यभावः ।
आलोकयन्नपि बहिर्जगदिन्द्रजाल-
मन्तः कयापि कलया न परिच्युतोऽस्मि ॥ ३०

ननु क्रियमाणसमाधिर्नानाविध गीतनृत्तवाद्यवाराङ्गनालिङ्गनादिभिर्विक्षेपकैर्विच्छिद्यते । कथं नित्यनिरतिशयाखण्डानन्दानुभूतिरित्याशङ्कां परिहर्तुमिदमाह उद्बोधित इति ॥

जनन्या मात्रा कबले कबले प्रतिकबलं उद्बोधितोऽपि उत्कर्षेण सम्यक् बोधितोऽपि निद्रालसः सुषुप्त्यालसो मन्दः अत एव अविदितान्यभावः

अविदित: अनभिज्ञात: अन्यभाव: इतरभाव: अन्नादितत्वं येन स: तथोक्त: शिशुः अर्भक इव अहमहमेवेदं सर्वमित्यनुसन्धानवान् योगी बहि: इन्द्रजालं इव यदसत्यमपि सत्यवत् प्रतीयमानं इह परानेकविध गीत नृत्त वनितादि पुण्यकर्मफलभोगपरिपूर्णं अत्यन्तगम्भीरकुम्भीपाकरौरवासिपत्रवनशुनकसूकरादि पापकर्मफलभोगपरिपूर्णं अरसरसिक सरसविरसरसनीयं सरसरसिक विरसविरस निरसनीयं च भवति। तत् जगदिन्द्रजालं भुवनेन्द्रजालं आलोकयन्नपि केनचिन्निमित्तेन दर्शयन्नपि अन्त: अन्तर्भागे कयापि कलया गीतनृत्तवनितादिष्वेकेनाप्यंशेन शिल्पविद्यया वा न परिच्युतोऽस्मि न परिगलितो भवामि समाधिच्युतो न भवामीत्यर्थ:। अयं भाव: लोके यथा निद्रालुःशिशुर्जनन्या येनकेनाप्युपायेन भोजयितुमिच्छया अन्नादिकमुद्धृत्य भो वत्स पश्यैतान् करटगरुडकुक्कुटादीनित्यादि चाटुकोटिशतै: उन्मिषितोऽपि सुषुप्तिसुखासक्त्या तेष्वेकमपि अनवेक्ष्य सुषुप्तिसुखमेवानुभवति। तथा समाधिस्थो ब्रह्मविद्यति: प्रापञ्चिकजनेन कथमपि संसारितां प्रापयितुमिच्छया नृत्तगीतवाद्यवाराङ्गनालिङ्गनादिभिर्व्युत्थितोऽपि निरतिशयब्रह्मानन्दासक्त्या तेष्वेकमप्यनवेक्ष्य निरतिशयब्रह्मानन्दमेवानुभवतीति। तदुक्तं श्रीविद्यारण्यमुनिभिः एवं तत्वे परे शुद्धे धीरो विश्रान्तिमागत:। तदेवास्वादयत्यन्तर्बहिर्व्यवहरन्नपि—इति॥ श्रुतिभिश्च। वृक्ष इव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पेत। उपल इव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पेत। आकाश इव तिष्ठासेच्छिद्यमानोऽपि न कुप्येत न कम्पेतेत्यादिभि:। एतेन स्वस्य धीरत्वं गुणातीतत्वं निरन्तरात्मारामत्वमखण्डानन्दैकरसरसिकत्वं च सूचितं भवति॥

Like a drowsy child who is not conscious of anything else though awakened by the mother at every morsel of food, I am not in the least distracted within though outwardly perceiving the jugglery of the world.

Notes :— Samadhi or mental abstraction is liable to several distractions. As such how can bliss absolute be enjoyed in that state? This verse clears the doubt

उद्बोधितोऽपि—The mother tries to wake up the sleeping child to take his food by tempting him with mimicry of the cries of crows, kites, fowl and so forth. Yet the child cannot be awakened from his sleep though he takes the morsels of food from the mother. So also the Yogi who enjoys the Brahmin bliss within cannot be weaned out of it by the temptations of worldly pleasures like music dance and the like. As feats of jugglery though unreal appear to the spectator as real, he looks upon the world as a feat of magic. He is not moved thereby from the enjoyment of bliss absolute within Sage Vidyaranya declares, 'when a Yogi finds rest in the Supreme Immaculate Brahma, he exults in that alone, though engaged in worldly activities outwardly.' This has been affirmed by scriptures as well when they declare that he neither angry nor moved as a tree and the like is cut thereby asserting his steadfastedness, being beyond the range of Gunas and in bliss absolute always.

दृश्ये स्फुटीभवति नेक्ष्यत एव भूमा
भूम्नि स्फुटीभवति नेक्ष्यत एव दृश्यम् ।
द्वीपान्तरे स्फुरति भूमिरियं न दृश्या
भूमण्डले स्फुरति तच्च तथा न दृश्यम् ॥ ३१

ननु ब्रह्मानन्दः प्रापञ्चिक विषयानन्दश्चोभावप्यनुभूयेतामात्मानुसन्धानवता भवता को दोष इत्याशङ्कामशेषमुपशमयितुमुपदिशति दृश्य इति ॥

दृश्ये अव्यक्तादिस्थूलान्ते समष्टिव्यष्ट्यात्मके जगति स्फुटीभवति अनाद्यविद्यावासनया सम्यक् व्यक्ते सति भूमा सर्वदृश्यविलयनिलयमखण्डानन्दैकरसमद्वितीयं परं ब्रह्म । यत्र नान्यत् पश्यति नान्यच्छृणोति नान्यद्विजानाति

स भूमा यो वै भूमा तदमृतमित्यादि श्रुतेः ॥ नेक्ष्यत एव, न, दृश्यत एव तथैव भूम्नि उक्तलक्षणे ब्रह्मणि स्फुटीभवति निरन्तरकृतश्रवणादिना सम्यक् प्रकाशिते सति दृश्यं उक्तलक्षणं जगच्च नेक्ष्यत एव न दृश्यत एव ॥ ब्रह्मानन्द-विषयानन्दयोस्तेजस्तिमिरवत् परस्परविरोधात् उभयमपि सुखमेकस्यैककाल एवानुभवितुमशक्यमिति भावः ॥ नन्वेवं सति आलोकयन्नपि बहिर्जगदिन्द्र-जालम् इत्यादि पूर्वोक्तविरोधस्स्यादिति चेन्न । तस्य ब्रह्मविदतिः जगदिन्द्र-जालमालोकयन्नपि निरन्तरं परब्रह्मानन्दमेवानुभवति । किमु वक्तव्यमनालोक-यन् निरन्तरं परब्रह्मानन्दमेवानुभवतीति कैमुतिकन्यायेन निरन्तरपरब्रह्मान-न्दानुभूतौ तात्पर्यात् विरोधानुपपत्तेः ॥ ननु अन्तस्त्यागो बहिःसङ्गी चान्त-र्बोधो बहिर्जलः । अन्तरेको बहिर्नाना लोके विचर राघव ॥ अप्रवेश्य चिदा-त्मानं पृथक् पश्यन्नहंकृतिः । इच्छंस्तु कोटिवस्तूनि न बोधो ग्रन्थिभेदतः ॥ न बुद्धिभेदं जनयेदज्ञानां कर्मसङ्गिनाम् । जोषयेत् सर्वकर्माणि विद्वान् युक्तः समाचरन् ॥ कर्मणैव हि संसिद्धिमास्थिता जनकादयः । लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसि ॥ इत्यादिवचनैर्विचार्यमाणे ब्रह्मानन्दविषयानन्दयो-र्विरोधाभावात् उभयमपि सुखमेकस्य युगपदनुभोक्तुं शक्यमेवेति चेन्न । तेषां वचसामारूढविषयत्वादधिकारिकविषयत्वाच्च । तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायात् बहून् शब्दान् वाचो विग्लापनं हि तत् ॥ तमेवैकं विजानीथ आत्मानमन्या वाचो विमुञ्चथ ॥ इति निदिध्यासोर्विषय-निषेधश्रवणाच्च । तर्हि मूढारूढाधिकारिकाणां वैलक्षण्यकथा न युक्ता कर्मित्वा-विशेषादिति चेन्न । प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः । अहङ्कार-विमूढात्मा कर्ताहमिति मन्यते ॥ तत्त्ववित्तु महाबाहो गुणकर्मविभागयोः । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ कर्मण्यकर्म यः पश्येत् । नैव किञ्चित् करोमीति युक्तो मन्येत तत्त्ववित् इत्यादि भगवद्वचनात् ॥ आरूढाधि-कारिकाणां अज्ञदृष्ट्या कर्मित्वेऽपि तज्ज्ञदृष्ट्या निरभिमानत्वेन अकर्मित्वात् मूढस्य तु देहाभिमानपुरस्सरं कर्तृत्वाभिमानत्वेन कर्मित्वाच्च वैलक्षण्योपपत्तेः । एतेन उभाभ्यामेव पक्षाभ्यां खे यथा पक्षिणां गतिः । तथैव कर्मज्ञानाभ्यां प्राप्यते शाश्वतं पदम् ॥ इत्यादि ज्ञानकर्मोभयमिश्रितानुष्ठानद्योतकप्रमाणं समस्तं निरस्तम् । विषयाभिलाषिणामात्मज्ञानं तत्फलं च दुर्लभमिति सूचितं

च भवति ॥ अत्र दृष्टान्तमाह द्वीपान्तर इत्यादीना द्वीपान्तरे अन्यान्तरीपे स्फुरति परिदृश्यमाने सतीत्यर्थः । शिष्टं विस्पष्टम् ॥

When the visible (universal phenomenon) becomes manifest the Supreme is not seen, and when the Supreme becomes manifest, the visible is not seen when another island shines (to you) this earth is not seen, likewise when this earth shines, that island also is not seen.

Notes :— If it is asked what harm there is for the spiritual meditator to enjoy both the spiritual bliss and worldly pleasure at the same time, the answer is given in this verse.

The ignorant perceives this world as real and he cannot, as such, realise the Supreme (Bhooma) wherein all this visible gets merged. Bhooma is that Supreme bliss wherein nothing else is seen, nor heard nor felt nor known. Brahma dawns within one on incessant hearing of Guru's spiritual advice and one's own deep meditation over it. When that Supreme realised he sees nothing, this world or any other except the Supreme bliss in which he exults. For spiritual bliss and worldly pleasure, like light and darkness cannot be enjoyed at the same time. If it is so, how is it stated in the earlier sloka that the knower of reality sees the world outside as a feat of magic ? The answer is that has reference to the fact that the knower of reality though he sees the outer world as magic, he is incessantly given up to the enjoyment of spiritual bliss. How much more then should one be immersed in that bliss when one does not see the outer world at all and so there is no contradiction with the earlier verse. Then what about the other texts to the

contrary? For it is said, "With detachment inward and attachment outward, with knowledge within and dullness outside, with oneness within and diversity outside, one should move in the world." Further "There is no harm in wishing many things if it does not affect the Brahma within" one should take pleasure in the action of the ignorant, one should take to action looking into the welfare of the world and so on. In the light of these texts one can it appears that one can enjoy both the blisses, worldly and spiritual, at the same time. This objection is refutable. The above texts have reference only to those who are qualified not for all. For there are texts which declare 'Know the Brahma alone and meditate on that Brahma. Reject every other word.' Thus the spiritual aspirant is warded off from all worldly pleasures. If so, then there can be no distinction between the ignorant and the spiritual knower, for both take to Karma (action). But this objection also cannot stand. For it is said by the Lord that actions are prompted by the moods of Prakriti or nature. The ignorant in his egotism thinks he is the doer, but not the wise knower of truth. He sees no action of his in his action nor does he think that he does anything. Though the knower of truth is, to the ignorant, doing action, he is not so to the wise. He takes to action without any egotistic taint while the ignorant does it in his pride of body and egotism. That is the difference between them. But this is refuted the theory that both Karma and Jnana are necessary to reach the eternal goal like the two wings for a bird to fly. In short those that are after worldly pleasures can never have the knowledge of self and its fruits. In illustration is the instance of a man who cannot see his own earth if his attention is directed to another region and vice versa.

बोधे शनैरुपचयं प्रतिपद्यमाने
विच्छिद्यते हृदि तदा विमलं भ्रमोऽपि ।
चन्द्रे कलाभिरनुवासरमेधमाने
मन्दीभवत्यपि यथैव महान्धकारः ॥ ३२

सर्वेन्द्रियोपरमेत्यारभ्य तथा न दृश्यमित्यन्तेन ग्रन्थेन मुमुक्षूणां समाधिं तज्जनितानन्दानुभूतिं विवेकयविवेकिनोर्ब्रह्मजगतोश्च वैलक्षण्यं चान्यच्चोपदिश्य संप्रत्यनवरताभ्यासेन आत्मज्ञाने प्रचीयमाने भ्रमतत्कार्यनिवृत्तिद्वारा अप्रतिबन्धात्मानन्दप्राप्तिं प्रतिपादयति बोध इति ॥

बोधे गुरुमुखतश्चिरनिरन्तरकृतश्रवणमननाभ्यां समुदितात्मज्ञाने शनैरुपचयप्रतिपद्यमाने चिरमनवरतकृत विजातीयप्रत्ययानन्तरित सजातीयप्रत्ययावृत्तिलक्षणानुसन्धानेन क्रमाद्वृद्धिमुपगम्यमाने सति तदा एव तस्मिन् क्षण एव हृदि हरत्याहरति विषयानिति ह्रियते विषयैरिति वा हृत् तस्मिन् हृदये वासनामये भ्रमः मा विनश्यत्वयं भोगो वर्धतामुत्तरोत्तरं मा विघ्नाः प्रतिबध्नन्तु धन्योऽस्म्यस्मादिति भ्रमः इति वचनात् एते पुत्रमित्रकलत्रादिविषयनिकराः नितान्तरमणीयाः सम्यगन्तरायरहितं निरन्तरमुपर्युपरि परिपूरणीया एतन्निरन्तरानुभूत्या अहं कृतार्थः स्यामित्यादि मिथ्यामतिः अपि शब्दात् तत्कार्यभूतप्रवृत्तिनिवृत्यादिकं च विमलं निश्शेषविनष्टं मलं अज्ञानतत्कार्यं यथा भवति तथा विच्छिद्यते विभिद्यते स्वयमेव विनश्यत्यदृश्यतां प्राप्नोतीत्यर्थः ॥ यावद्यावत् बोधाभिवृद्धिस्तावत्तावद्वासनानिवृत्तिः । यावद्यावद्वासनानिवृत्तिस्तावत्तावदानन्दस्फूर्तिः निरंकुशा भवेदिति भावः ॥ तदुक्तमाचार्यैः—यथा यथा प्रत्यगवस्थितं मनस्तथा तथा मुञ्चति बाह्यवासनाम् । निश्शेषमोक्षे सति वासनानामात्मानुभूतिः प्रतिबन्धशून्या ॥ इति ॥

नन्वात्मज्ञाने प्रचीयमाने भ्रमो नश्यतीति यदुक्तं तदनुपपन्नम् । सन्यस्य श्रवणं कुर्यादितिन्यायेन श्रवणात् पूर्वमेव पुत्रादि परिभ्रमपरित्यागादिति चेत् सत्यं श्रवणात् पूर्वमेव पुत्रादिपरिभ्रमं त्यजति । तथाऽपि तद्वासनायाः निश्शेषपरित्यागायोगात् । तन्निवृत्यै श्रवणमननोत्तरकालिकनिदिध्यासनं उत्पन्नसम्यक्-

ज्ञानमपेक्षते । तस्मान्न कोऽपि विरोधः । न चैवं प्रति अवच्छिन्न इवाज्ञाना-त्तन्नाशे सति केवलः । स्वयं प्रकाशते ह्यात्मा मेघापायेंशुमानिव । इत्यादि वचनविरोध इति वाच्यम् । तत्र स्वरूपज्ञानविषयत्वादत्र वृत्तिज्ञानविषय-त्वाच्च ॥ अत्र दृष्टान्तमाह चन्द्र इत्यादिना । अनुवासरं अनुदिनं एधमाने वर्धमाने मन्दीभवति विनश्यत्यदृश्यतां प्राप्नोतीत्यर्थः । एतेन अज्ञानमावृति-स्तद्वद्विक्षेपश्च परोक्षधीः अपरोक्षमतिश्शोकहतिस्तृप्तिर्निरंकुशेति जीवस्य सप्ता-वस्थास्सूचिता भवन्ति । सुगममन्यत् ॥

As the knowledge of the Atman increases gradually all delusions also are entirely cut off from the mind, just as intense darkness gradually becomes reduced as the moon increases daily with her digits.

Notes :— Having described in the previous verses (26 to 31) the nature of the Samadhi of the spiritual aspirant, and his experience of bliss thereof and also the peculiarities of the wise and the ignorant, Brahma and the universe and so forth, herein is described the nature of that unalloyed bliss which he experiences as the knowledge of the Atman grows in him removing all delusions from his mind.

Bodha here means the knowledge of the Atman gained from Guru and the disciple's own meditation. That knowledge grows as ideas opposed to it are warded off and those in consonance with it are incessantly meditated upon हृत् is what draws the worldly objects of pleasure unto it or what is drawn away by such objects. भ्रमः is delusion arising from a fond desire for worldly enjoyment विमलं completely deprived of all impurities (Mala). With the increase of knowledge there is the reduction of desires and as desires lessen there dawns the fulness of bliss,

This has been declared by the Acharya too. The more the mind is directed to the inward soul, the less the influence of external desires and forces and when such desires are completely dispelled, there dawns the experience of the Atman.

Now it is not quite correct to say that with the increase of the knowledge of Atman, delusion would disappear. For it is declared that one should renounce everything before one betakes oneself to a spiritual Guru, and as such one would have dispelled all his delusions before the attainment of Atmic knowledge. This objection is some what true, but not entirely correct. One may sever all one's worldly ties, such as son, wife and so forth but not be completely rid of the resultant attachments to them. For that is possible only after hearing the spiritual advice from the Guru, one's own thinking over it and most important one's own profound meditation which requires clear knowledge without the least taint of any delusion. Delusion is the effect of ignorance and only when the cloud of ignoranae is dispelled entirely out of the mind there would be seen therein the sun of Atma as the one immaculate In illustration is the moon with her daily increasing digits and the daily intense darkness becoming less and less consequently. Herein are hinted the seven states of the soul, viz., ignorance, gloom, confusion, Indirect knowledge, Direct cognition, destruction of sorrow and contentment absolute.

ब्रह्मानुभूतिरसनिर्भरिते मुनीन्द्रे
कर्मानुबन्धविषयो विमुखीभवन्ति ।
सिद्धोपदर्शितरसायनपानतृप्ते
किन्तु व्यपाकविषया विधयः कपन्ते ॥ २२

ननु अहरहस्सन्ध्यामुपासीत उदिते सूर्ये प्रातर्जुहोति । यावज्जीवमग्निहोत्रं जुहोति । श्रौतं चापि तथा स्मार्तं कर्मालंव्य वसेत् द्विजः तद्विहीनः पतत्येव ह्यालंबरहितान्धवदित्यादि श्रुतिस्मृतिशतैरात्मज्ञानिनः सर्वकर्मपरित्यागो न युक्तः । किंतु विधिबलाद्यत् किञ्चिच्छ्रौतं स्मार्तं वा कर्मानुष्ठेयमेवेत्याशङ्कामपनुदति ब्रह्मेति ॥

ब्रह्मानुभूतिरसनिर्भरिते ब्रह्म सत्यज्ञानादिलक्षणं तस्य अनुभूतिः समाधिपरिपाकदशायां या सर्वमिदमहं च ब्रह्मैवेति सर्वात्मत्वानुभूतिः तस्यां यो रसः परमानन्दः तेन निर्भरितो अतिशयितः परिपूर्ण इति यावत् तस्मिन् मुनीन्द्रे मुनिषु मननशीलेषु योगिषु इन्द्रः श्रेष्ठो मुनीन्द्रः योगीन्द्रः तस्मिन् योगीन्द्रे कर्मानुबन्धविधयः अहरहस्सन्ध्यामुपासीत । श्रौतं चापि तथा स्मार्तं कर्मालंव्य वसेत् द्विजः इत्यादीनि कर्मसंबाधिश्रुतिस्मृतिवाक्यानि विमुखीभवन्ति पराङ्मुखास्सन्ति यस्मात् कर्मतत्फलतद्विधीनां मिथ्यात्वबन्धकत्वादि बोधवन्तं सर्वदा सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य चाविक्रियात्मविज्ञानवन्तं महान्तं कर्मसु प्रवर्तयितुं विधयो न शक्नुवन्ति तस्मात् ज्ञानिनः कर्तव्यं नास्तीति भावः ॥ ननु ज्ञानिनोऽपि शरीरशुद्ध्यै कर्मकर्तव्यमेवेति चेन्न । कलेबरं मूलपुरीषभाजनं अत्यन्तमलिनो देहः । देहस्संशोध्यमानोऽपि पञ्चगव्यकुशांबुभिः । घृष्यमाण इवाङ्गारो निर्मलत्वं न गच्छति ॥ इत्यादि वचनात् अस्थिमांसादिमयस्य मलभाण्डस्यात्यन्तमलिनस्य देहस्य कर्मणा शुद्ध्यसंभवात् ॥ ननु चित्तस्य शुद्धये कर्मेतिवचनात् चित्तशुद्ध्यै कर्म कर्तव्यमेवेति चेन्न । तस्य चित्तप्रसादासादितसाधनसाध्यश्रवणादिविस्फुरित ब्रह्मानन्दरसरसिकत्वेन चित्तशुद्ध्यपेक्षानुपपत्तेः ॥ ननु आचामेद्धृतयज्ञमेखिलदकैराजानुकं क्षालयेन्मन्त्रं सुष्ठुवदेद्विवस्वदुदयादर्वाग्जलं विक्षिपेत् । शुद्धाचैस्सघृतैस्तथाचमनवत् प्राणाहुतिश्चाचरेत् कुर्यादेवमतन्द्रितः प्रतिदिनं ब्राह्मण्यमिच्छेद्यदि ॥ इति स्मरणात् ब्राह्मण्यसिद्ध्यै स्नानसन्ध्यावन्दनादिकं कर्म कर्तव्यमेवेति चेन्न । क्षत्रियादीनामपि स्नानादिकर्मवत्त्वेन ब्राह्मण्यप्रसङ्गात् । शिखाज्ञानमयी यस्य उपवीतं च यन्मयम् । ब्राह्मण्यं सकलं तस्य इति ब्रह्मविदो विदुः ॥ ब्रह्मवित् ब्राह्मणः स्मृतः इत्यादि श्रुतिस्मृतिषु ब्रह्मविद एव ब्राह्मणत्वप्रतिपादनात् ॥ नन्वात्म-

ज्ञानिनोऽपि प्रतिबन्धनिवृत्तिद्वारा आत्मज्ञानाभिवृद्धये कर्म कर्तव्यमिति चेन्न। कर्मणां ज्ञानप्रतिबन्धकत्वेन तन्निवृत्तिद्वारा आत्मज्ञानाभिवृद्धिहेतुत्वानुपपत्तेः॥ नन्वारूढस्यापि लोकसंग्रहणार्थं कर्म कर्तव्यमेव। लोकसंग्रहमेवापि संपश्यन् कर्तुमर्हसीति भगवद्वचनादिति चेन्न। तस्य वचसः आधिकारिकविषयत्वात् अस्य लोकसंग्रहकर्तृत्वाभावाच्च॥ ननु ईश्वरप्रीत्यै कर्म कर्तव्यमेवेति चेन्न। स्वरूपानुसन्धानस्य स्वयाथार्थ्यविज्ञानकारणत्वेन ततोऽधिकतरं प्रीतिकरत्वात्॥ ननु लोकक्रियमाणनिन्दानिवारणाय कर्म कर्तव्यमेवेति चेद्भवान् प्रष्टव्यः किं दुर्जनक्रियमाणनिन्दानिवारणाय कर्म कर्तव्यम् उत सज्जनक्रियमाणनिन्दानिवारणाय। नाद्यः। तत्त्वविदस्तुल्यनिन्दास्तुतित्वेन तन्निवारण प्रवृत्त्यनुपपत्तेः। निन्दायास्तत्स्वभावत्वेन तन्निवृत्त्यनुपपत्तेश्च। न द्वितीयः। सज्जनस्य रागादिदोषरहितत्वेन समदर्शित्वेन च निन्दानुपपत्तेः॥ ननु भिक्षाटनं जपश्शौचं स्नानं ध्यानं सुरार्चनं कर्तव्यानि षडेतानि यतीनां नृपदण्डवत्। इति वचनात् स्नानजपादिकं कर्तव्यमेवेति चेन्न। तस्य वचनस्यारुरुक्षुविषयत्वेन आरूढविषयत्वानुपपत्तेः॥ ननु अपूजकः कथं पूज्यो भवेत् तत्पूजयेत् गुरून् इति वचनेन आरूढस्यापि पूज्यत्वसिद्ध्यै गुरुविग्रहाराधनादिकं कर्तव्यमेवेति चेन्न। तस्य देहाभिमानरहितत्वेन तत्प्रयुक्तपूज्यत्वापेक्षाभावात्। पाषाणलोहमणिमृण्मयविग्रहेषु पूजा पुनर्जननभोगकरी मुमुक्षोः तस्माद्यतिः स्वहृदयार्चनमेव कुर्यात् बाह्यार्चनं परिहरेदपुनर्भवाय इति मुमुक्षोर्यतेर्वासनानुदयार्थं विग्रहाराधननिरसनपुरस्सरं निदिध्यासनस्यैव कर्तव्यत्वश्रवणात्। जिज्ञासायां संप्रवृत्तो नाद्रियेत् कर्मचोदनामिति जिज्ञासोरपि कर्म विधिनिराकरणस्मरणाच्च॥ ननु शरीरयात्रापि ते न प्रसिद्ध्येदकर्मणः इति भगवद्वचनात् शरीरयात्रार्थमपि कर्म लौकिकं वैदिकं वा कर्तव्यमेवेति चेन्न। शरीरयात्रायाः प्रारब्धाधीनत्वेन लौकिकवैदिककर्माभावेपि शरीरयात्रायाः निर्वाह्यत्वात् आरूढस्य यदृच्छालाभसन्तुष्टत्वात् तृणीकृतशरीरत्वाच्च॥ ननु ज्ञानिनः वेदोक्तकर्माभावेऽपि ज्ञानं कुतो मनसि संभवतीह तावत् प्राणोपजीवति मनो म्रियते न यावत् प्राणो मनो द्वयमिदं विलयं नयेद्यो मोक्षं स गच्छति नरो न कथंचिदन्यः इति वचनात् प्राणमनोविलयविज्ञानद्वारा मुक्तिप्राप्तये प्राणायामादिकमवश्यं कर्तव्यमिति चेन्न। दुग्धांबुवत्संमिलितौ सदैव तुल्यक्रियौ मानसमारुतौ च। एकस्य नाशादपरस्यनाशः एकप्रवृत्तेरपरप्रवृत्तिः॥ तत्रापि साध्यः

पवनस्य नाश षडङ्गयोगादि निषेवणेन । मनोविनाशस्तु गुरुप्रसादान्निमेषमात्रेण सुसाध्य एव ॥ इति वचनादस्य विज्ञानिनः मनोवृत्तिविलयद्वारा विलीनप्राणवृत्तित्वात् मनोवृत्तिलयस्य गुर्वनुग्रहक्षणसुसाध्यत्वेन षडङ्गयोगादि प्रयत्नसाध्यप्राणलयापेक्षाभावाच्च ॥ तर्हि हठयोगशास्त्रवैयर्थ्यप्रसङ्गः । तद्गुरुशिष्यसंप्रदायविच्छित्तिश्च स्यादिति चेन्न ॥ परिपक्वचित्तानां सद्गुर्वनुग्रहवतां तथात्वेऽपि सद्गुर्वनुग्रहरहितानामपरिपक्वचित्तानां हठयोगेनात्यन्तोपयोगात् वैयर्थ्यप्रसङ्गाप्रसक्तेः । तद्गुरुशिष्यसंप्रदायविच्छित्त्यनुपपत्तेश्च ॥ ननु अपरिपक्वचित्तानामुपयोगोऽस्ति हठयोगेन न परिपक्वचित्तानामित्यत्र किं प्रमाणमिति चेत् एभिरङ्गैः समायुक्तो राजयोग उदाहृतः । किञ्चित् पक्वकषायाणां हठयोगेन संयुतः परिपक्वमनो येषां केवलोऽयं च सिद्धिदः । गुरुदैवतभक्तानां सर्वेषां सुलभो जवात् । इति भगवत्पादाचार्यवचनमेवेति ब्रूमः ॥ तर्हि कर्मविधेर्वैयर्थ्यं स्यादिति चेन्न । आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते ॥ इति भगवद्वचनात् आरूढस्य तथात्वेपि आरुरुक्षोश्चित्तशुद्ध्यै कर्माङ्गीकारात् सार्थकत्वोपपत्तेः ॥ तस्मात् ब्रह्मविदः स्वरूपानुसन्धानामृतेन किमपि कर्म कर्तव्यमस्तीति सिद्धम् ॥ तदुक्तं भगवता—यस्त्वात्मरतिरेवस्यादात्मतृप्तश्च मानवः । आत्मन्येव च सन्तुष्टस्तस्य कार्यं न विद्यते ॥ ज्ञानामृतेन तृप्तस्य कृतकृत्यस्य योगिनः । नैवास्ति किंचित् कर्तव्यमस्तिचेन्न स तत्त्ववित् ॥ इति ॥ अत्र दृष्टान्तमाह । सिद्धोपदर्शितरसायनतृप्त इति । सिद्धेन कल्पयन्त्रमन्त्रौषधादिसिद्धेन योगिना उपदर्शितस्य उपदिष्टस्य रसायनस्य कल्पविशेषस्य पानेन निरन्तरसेवया तृप्ते सिद्धे पुरुषे व्यपाकविषयाः पथ्यापथ्यगोचरा विधयः लवणाम्लसहक्षारतांबूलादिविवर्जितः सङ्गमं च दिवास्वापमतिवादं च सन्त्यजेत् । शाल्यन्नं गोपयोयुक्तं लघ्वाशी सुखजीवनः । शुण्ठीजीरोदकं पेयं वातशीतातपं त्यजेत् ॥ इत्यादि वाक्यानि क्रमन्ते किं नु नेत्यर्थः ॥ सिद्धयाद्युपदिष्टसिद्धौषधसेवासिद्धं पुरुषं पथ्यादिविषयविधयः पथ्यग्रहणापथ्यत्यागयोः प्रवर्तयितुं न शक्नुवन्तीति भावः । यद्वा व्यपाकविषयाः औषधविपाकगोचराः विधयः सुरदं पिङ्गरक्ताभं दृष्ट्वा यत्नेन चाहरेत् पलमात्रं समादाय मातुलुङ्गफलोदकम् । आर्द्रकस्य रसं तुल्यं धातोर्गुणचतुष्टयं मेलयित्वा च दीपाग्नौ स्वल्पं स्वल्पं तु पाचयेत् इत्यादिरूपाः क्रमन्ते किं नु न क्रमन्त इत्यर्थः । यद्वत् सिद्धोपदिष्टसिद्धौषधसिद्धशरीरं

रुपुषं औषधपाकविषयः तत्पाककर्मणि सर्वथा प्रवर्तयितुं न शक्नुवन्ति । तद्वत् तत्वविदुपदिष्टतत्वानुसन्धानसिद्धानन्दं मुनीन्द्रं कर्मविधयः कर्मणि सर्वथा प्रवर्तयितुं न शक्नुवन्ति ॥ अतो न सर्वथा सर्वात्मविदां सर्वदा समाधिं विना न किमपि कर्म कर्तव्यमिति सिद्धम् ॥

The injunctions as to religious practices fall away from the Lordly sage who exults in the experience of Brahmic bliss. Do the injunctions as to medicines salutary and unsalutary influence the man who is contented with taking the elixir advised by a realised sage?

Notes:— It is informed by the scriptures that one should not fail to perform the enjoined religious practices of Sandhya worship and the like lest one should fall away from the goal of life. This is discussed in this sloka. ब्रह्मानुभूति the religious experience that one and all the world around are but Brahma, the Supreme. कर्मानुबन्धविधयः—The injunctions as to the obligatory performances of religious practices like Sandhya worship and the like. विमुखीभवन्ति—Turn away from; have no influence to produce any effect on the lordly sage. To the lordly sage actions, their fruits and the injunctions about them are all unreal and leading to bondage. He is ever given to see all in himself inclusive as Brahma. Therefore injunctions do never influence him. As such he has nothing to with Karma. The following objections are raised to the above and are refuted.

1. Even a Jnani should take to action at least for the purification of his body. But the sage refutes this. The body being the repository of urine, excreta and the like is by nature impure. It can never be purified howsoever it may be cleaned. It is ever impure as charcoal.

2. Karma is to be performed for the purification of the mind. This also is refuted. Only when one has gained purity of mind one is able to enjoy bliss absolute. The sage having that experience of bliss is already pure in mind and he need not resort to Karma to attain purity of mind.

3. One should perform Karma to reach the state of a Brahmin (ब्रह्मण्य). Such are the daily observances of Sandhya worship, recitation of Mantras and the like. This also cannot hold water regarding the realised. If those Karmas like daily bath, Sandhya worship etc. are the true steps to Brahmanya, why does a Kshatriya who also does these Karmas ever remain a Kshatriya and does not attain the stage of a Brahmin. On the other hand, the scriptures declare that the knower of Brahma alone is a Brahmin and one cannot become one by any other means such as birth and so forth.

4. It is argued that even for a Jnani, for the development of his Atmic Knowledge without impediments the path of action or religious practices should be resorted to. This is also refuted since such Karma itself is an impediment to the acquisition of Jnana. Hence the removal of impediments by Karma cannot conduce to the acquisition of Jnana.

5. The Lord has said that even the realised should take up to Karma for the welfare of the world. Not at all. The above text refers only to those who are qualified and a realised sage has not the feeting that he is the agent for or the giver of the welfare of the world.

6 Another argument is that at least for Gods' grace he should resort to Karma. This is refuted also. The sage by his incessant meditation on Atman realises his own reality and finds greater pleasure in exulting in that knowledge rather than in the grace of God.

7. At least for warding off the blame imputable to him by the world for the nonperformance of enjoined Karma, the realised should perform Karma. This also is refutable. "What is the world referred to here? Is it the wicked or the virtuous? If it is the wicked world of people that blame him the realised knower is indifferent to blame and praise of others. Hence he feels no impulse to avoid it. Further the wicked are by nature given to cast blame on others. Therefore there cannot be any use of any attempt to check it. If the world has reference to the virtuous good, they will not at all blame others since they are bereft of passions of love hatred and the like and are even minded towards all.

8. It is declared that one should take to caney bath, recitation and the like as unto a king's command. Not so. The text is applicable only to spiritual aspirants and not to the realised

9. It is said that one cannot be worthy of worship, if one does not oneself worship others like Gurus and so forth and also the images or idols of God? This is also refutable. The knower of truth is bereft of pride of the physical body. As such he is in need of no worship offered to that physical body. Worship of idols is resorted for and leads to further birth and enjoyments therein. Even the spiritual aspirant is warded off from it. Hence the ascetic should propitiate only his mind by incessant meditation.

10. It is declared by the Lord that even the upkeep of the body is not possible without doing Karma and hence one should resort to it. Not so. Life is kept up by the resultant impressions (Prarabdas of past Karma and it goes on without any Karma, Vedic or secular. Further the realised is satisfied with what comes to him by chance and he cares not for the body.

11. How will Jnana dawn within one in the absence of the performance of Karmas laid down by Vedas? For salvation, both the Prana (Vital breath) and the mind have got to be dissolved. This can be achieved only by the practice of Pranayama (regulated breath). This is refutable. Prana and the mind exist together as milk and water mixed. Dissolution of the one leads to that of the other. The dissolution of Prana alone can be had by taking to the practice of six-fold Yoga while that of the mind can be easily achieved through the grace of Guru. Since Prana can be dissolved with the dissolution of the mind and the latter can be had through Guru's grace, one need not take to the difficult process of Yoga practice to get the Prana dissolved. Then the Sastra of Hatayoga becomes meaningless as well as Disciple—Guru system advocated therein. Not so. For mature intellects, Guru's grace gives everything; but for immature aspirants Hatayoga is highly useful and so there is no harm done to the Guru Sishya system enjoined therein. Authority for this position are the declarations of the Bhagavatpadacharya himself. If so, are not the texts enjoining religious practices in vain? No. The Lord has declared that the Yogic initiate has to take to Karma while the aspirant high in the scale has to practice calmness. Karma leads to purity of mind. Hence the knower of Atman has only to practise incessant meditation on the Atman and not to take to any action at all. This has been declared by the Lord Himself. If a knower of Atman feels that he should take to any action, he is really no knower of truth at all. In illustration thereof is the latter part of the verse. व्यपाकविषय:—The topic as to what is beneficial and what is not, the patient is prohibited from certain things as salt, sleeping during day etc. while undergoing treatment and is enjoined to do certain things. The

expression may also be taken to mean the prêparation of medicines with the right proportionate parts of its several ingredients. As the modes of preparing medicines or the conditions to be observed in taking medicine do not influence one who takes the elixir of a realised Yogi, so also injunctions as to religious practices do not influence the Yogi exulting in the blissful meditation of truth advised by a realised knower of truth. Hence the knower of truth has to practise always only Samadhi (religious concentration of mind) and not any other Karma.

सर्वात्मतामुपगतोऽपि मुनिस्समाधिं
पूर्वानुवृत्तमयते समयापनुत्यै ।
पर्यासर्वविभवः क्षितिपोऽपि काल-
निर्यापणाय जुषते चतुरङ्गलीलाम् ॥ ३४

ननु सर्वात्मभावापन्नानां सर्वथा कर्म न कर्तव्यं चेत् तर्हि किमर्थं समाध्यनुष्ठानं तस्यापि कर्मान्तर्भूतत्वात् तदपि त्यज्यतामित्याशङ्कामपहर्तुमिदमाह सर्वात्मतामिति ॥

सर्वात्मतां सार्वात्म्यं ब्रह्मतादात्म्यमित्यर्थः । सर्वस्यापि ब्रह्मविवर्तत्वात् सर्वं ह्येतत् ब्रह्म । सर्वं खल्विदं ब्रह्मेत्यादिश्रुतेश्च तामुपगतोऽपि संप्राप्तोऽपि मुनिः मनुते सच्चिदानन्दलक्षणं परं ब्रह्मात्मत्वेन जानात इति मुनिः ब्रह्मविद्यतिः पूर्वानुवृत्तं पूर्वं गुरूपदेशमनुसृत्ययोऽनुष्ठितः स पूर्वानुवृत्तः पूर्वानुष्ठितः तं समाधिं सम्यगाधीयते एकाग्रीक्रियते चित्तं अनेनेति समाधिः असंप्रज्ञाताख्यः सर्वार्थैकाग्रतयोः क्षयोदयौ चित्तस्य परिणामः समाधिरिति पतञ्जलिसूत्रात् । मनसो वृत्तिशून्यस्य निर्विकारात्मना स्थितिः । असंप्रज्ञातनामासौ समाधिर्योगिनां प्रियः ॥ स्वानुभूतिरसावेशात् दृश्यशब्दावुपेक्ष्य तु । निर्विकल्पसमाधिः स्यान्निर्वातस्थलदीपवत् ॥ इत्यादि वचनाच्च ॥ सूत्रस्यायमर्थः रजोगुणेन चाञ्चल्यमानं मनः क्रमेण सर्वान् पदार्थान् परिगृह्णाति । रजोगुण-

निवारणाय क्रियमाण प्रयत्नविशेषेण दिने दिने योगिनः सर्वार्थिता क्षीयते एकाग्रता चोदेति तादृशश्चित्तस्य परिणामः समाधिः निर्विकल्पकसमाधिरित्यर्थः तं समयापनुत्यै कालक्षेपणाय श्रयते समाश्रयते। एतैस्समाधिभि षड्भि-र्नयेत् कालं निरन्तरम् इत्याचार्यवचनानुसारेण सद्गुरुवरसमुदित निर्विकल्पक-समाधिमेव करोतीत्यर्थः॥ अत्र दृष्टान्तमाह पर्याप्तेत्यादिना। पर्याप्ताः संप्राप्ताः सर्वे विभवाः इहपरनिखिलसुखसाधनविशेषा यस्य तथोक्तोऽपि क्षितिपः क्षितिं चतुस्सागरपर्यन्तां सद्वीपां पाति रक्षतीति क्षितिपः सार्वभौमः। चतुरङ्गानि करितुरगरथादीनि तैः या लीला परस्परयुद्धादिलक्षणा तां कालनिर्यापणाय समयनिक्षेपणाय जुषते समाश्रयते हि॥ यथा लोके राजा निश्शेषशत्रुनिब-र्हणद्वारा साम्राज्यसुखमनुभवितुं उपात्तां चतुरङ्गलीलां तत् सुखाशनानन्तरमपि समयनिर्यापणायैव करोति। न तु मुख्यप्रयोजनाय अवश्यं कर्तव्यत्वबुद्ध्या। तथा तत्त्वविदपि निश्शेष नानावासनानाशद्वारा सर्वात्म्यसुखमनुभवितुमुपात्तं साङ्गसमाधिं तत्सुखाशनानन्तरमपि समयनियनायैव समनुष्ठीयते। न तु मुख्यप्रयोजनायावश्यकर्तव्यत्वबुद्ध्या इति भावः। लोकप्रसिद्धिद्योतकोऽपि शब्दः। एतेन दद्यान्नावसरं किञ्चित् कामादीनां मनागपि। आसुप्तेरामृतेः कालं नयेद्वेदान्तचिन्तया। इति न्यायेन सद्गुरुवरकरुणाकटाक्षमारुतसमु-ज्वलित समाध्यग्निनिर्दग्धाखिल प्रकटविकटवासनारूपपटलेनापि यतिना समा-धावनवरतमनुष्ठीयमाने किमु वक्तव्यमनाद्यविद्यावासनापटलजटिलेनासम्यक् ज्ञानिना यतिना लयविक्षेपकषायरसास्वादरूपविरोधिनिरोधपुरस्सरं समाधि-रवश्यमनवरतमनुष्ठातव्य इति सूचितं भवति॥

The ascetic (sage) who has attained the state of seeing all as Brahma resorts yet to Samadhi (religious concentration of mind) enjoyed by him earlier merely for whiling away time. Indeed an emperor who has enough of all prosperity resorts yet to the game of dice for passing away time.

Notes :— If it is true that a sage who has attained the state of seeing all as Brahma is in need of no Karma,

यथैकत्वं प्रपश्यति ॥ सभयादभयप्राप्तस्तदर्थं यतते च यः । स पुनः सभयं गन्तुं स्वतन्त्रश्चेन्नहीच्छति ॥ आरब्धकर्मनानात्वात् बुद्धानामन्यथान्यथा । वर्तनं तेन शास्त्रार्थे भ्रमितव्यं न पण्डितैः ॥ इत्यादि श्रुतिस्मृत्यादिशतेभ्यः ॥ ननु एवं सति विदुषोयतेर्यथेष्टाचरणप्रसङ्ग इति चेन्न । एतेषां श्रुत्यादीनामपि ज्ञानिस्तुतिपरत्वेन तत्कर्तव्यमित्यत्र तात्पर्याभावात् । तदुक्तमाचार्यैः अधर्मात् जायतेऽज्ञानं यथेष्टाचरणं ततः । धर्मकार्ये कथं तत्स्यात् यत्राधर्मो विनश्यति ॥ इति ॥ सुरेश्वराचार्यैश्च बुद्धाद्वैतस्वतत्वस्य यथेष्टाचरणं यदि । शूनां तत्वदृशां चैव को भेदोऽशुचिभक्षणे ॥ इत्येतेन पूर्वविद्यमानाद्वेषत्वादि शुभवासनालङ्कारवत्वेनात्मानुसन्धानवतोर्यते. यथेष्टाचरणं सर्वथा नास्त्येव तथापि प्रारब्धानुसारेण आहारविहारादिषु प्रवर्तमानस्यापि विदेहमुक्तिः प्रतिबध्यत इत्यज्ञशङ्का निश्शेषं निरस्ता । तथैव खलूक्तं भगवतापि सर्वभूतस्थितं यो मां भजत्येकत्वमास्थितः । सर्वथा वर्तमानोऽपि स योगी मयि वर्तते ॥ यदृच्छालाभसन्तुष्टो द्वन्द्वातीतो विमत्सरः । समः सिद्धावसिद्धौ च कृत्वापि न निबध्यते ॥ निराशीर्यतचित्तात्मा त्यक्तसर्वपरिग्रहः । शारीरं केवलं कर्म कुर्वन्नाप्नोति किल्बिषम् ॥ इत्यत्र दृष्टान्तमाह साम्राज्यमित्यादिना । यथारुचि यथेष्टं शिष्टं विस्पष्टम् ॥

The Lord of a sage given to incessant meditation of truth though actions such as he wills is not bound by them even as a king having attained the position of an emperor and acting as it pleases him cannot be fettered by his subjects.

Notes :— Having pointed out that the spiritual aspirant should be given to incessant meditation of reality, it is explained herein that he is not bound by any action which he resorts to in obedience to his Prarabda or resultant impressions of his past births, such as eating and the like. तत्वं means the Supreme Brahma. अनुचिन्तनं is the incessant meditation as everything being Brahman. स्वच्छन्दतः

(As it pleases him) every action, good or bad, virtuous or vicious. If the spiritual aspirant of an ascetic taking to any action is not bound by it, how much more should one, not taking to any action at all be! He is not at all bound by any action good or bad, even matricide, patricide and the like. As the Lord says he is not tainted by any action; he neither kills nor is killed, for he sees but one in all and has no perception of a duality. He, who from fear, seeks refuge in the fearless and who always tries to be fearless will never turn back to the fearful when he is free. But on account of their Prarabda such persons are seen to resort to diverse actions. The learned should not get confounded at that. If the above fact is true it may be argued that a wise ascetic can take to any action he likes. But this argument cannot stand. The texts referring to such wanton acts of the realised are there only in praise of Jnanis and not for making them resort to such actions. It is said by the Acharya that ignorance arises from nonvirtue or Adharma and thence follow wanton actions For how will the Jnani in whom all nonvirtues are destroyed take to wanton this acts in the matter of virtue? Further has been asked by Acharya Sureswara: if the realised take to wanton acts what difference is there between the realised and the dog? The gist is that the realised will never take to actions that do not conform to virtue. Further it has been declared by the Lord Himself that the realised though acting is always steadfast in Him. Even minded as he is both in gain and loss, he is not bound by the actions he resorts to. Bereft of desires, self-controlled, renounced of all possessions, he does not incur any sin by taking to mere physical acts. In illustration is the king who has become an Emperor and whose wanton actions, his subjects cannot control.

प्रारब्धजामधिकसंपदमापदं वा
भुञ्जान एव पुरुषः परिशुद्धिमेति ।
किं वाऽऽहितुण्डिकगृहीततनुर्भुजङ्ग-
स्तत्क्लृप्तदण्डनविधिं परिहर्तुमीष्टे ॥ ३७

ननु चिरमनवरतकृतसमाधिसमुज्वलितात्मज्ञानाग्निनाज्ञानतत्कार्यतूलपटलेषु निर्दग्धेषु सत्सु तदन्तःपातिनः प्रारब्धस्यापि निर्दग्धत्वाल्लब्धसाराणां नराणां निस्सारप्रारब्धानुसंसारकथनं कथमित्याकांक्षायां तस्य तावदेव चिरं यावन्नविमोक्ष्येथ संपत्स्य इति । ज्ञानोदयात् पुराऽऽरब्धं कर्म ज्ञानान्न नश्यति । अदत्वा स्वफलं लक्ष्यमुद्दिश्योत्सृष्टबाणवत् ॥ प्रारब्धंत्विह भुंज्यतामथ परब्रह्मात्मना स्थीयतां इत्यादिश्रुत्याचार्यवचनानुसारेण तज्जन्यशुभाशुभफलानुभवानन्तरमेव विदेहमुक्तिरिसिध्यति न तु तत्पूर्वमित्याह प्रारब्धजामिति ।। पुरि शरीरे शयनात् पुरुषो जीवः । यद्वा प्रारब्धागतशीतोष्णसुखदुःखादिसहनपूर्वकं पुरुषार्थसाधनसमाधिनिष्ठत्वात् पुरुषो ब्रह्मविद्यतिः । यद्वा अव्यक्तात्तु परः पुरुष इतिश्रवणात् पुरुषः प्रकृतिविकृतिविलक्षणं ब्रह्म तद्भावापन्नत्वात् ब्रह्मनिष्ठोऽपि पुरुष इत्युच्यते । यद्वा पुरुषार्थसंपन्नस्यैव पुरुषत्वयुक्तत्वान्मुक्तेरेव पुरुषार्थत्वाच्च । पुरुषो जीवन्मुक्तो ब्रह्मविद्यतिः ॥

प्रारब्धजां पुराऽऽरब्धं प्रारब्धं ज्ञानोदयात् प्रागुत्पन्नं शरीरमित्यर्थः । यद्वा स्वेच्छाऽनिच्छापरेच्छादि प्रारब्धं त्रिविधं स्मृतमितिस्मरणात् प्रारब्धात् स्वेच्छादिरूपाज्जायत इति प्रारब्धजा तां अधिकसम्पदं नरैश्वर्यसुरैश्वर्याद्यनेकैश्वर्यसुखं आपदं आध्यात्मिकाद्यनेकविपदं दुःखं वा भुञ्जानः समनुभूयमान एव सन् परिशुद्धिं प्रारब्धस्यापि निश्शेषनाशात् परितोऽत्यन्तं वा शुद्धिः परिशुद्धिर्विदेहमुक्तिः तां एति प्राप्नोति । निरन्तरसमाधिस्थोऽपि ब्रह्मविद्यतिः प्रारब्धविलयनानन्तरमेव निरन्तरनित्यशुद्धमुक्तबुद्धस्वभावाखण्डानन्दैकरसपरब्रह्मात्मनावस्थानलक्षणविदेहमोक्षसुखमनुभवति । न तु तत्पूर्वम् । ध्यानसहस्रकोटिभिरपि व्यवहाराभावाभावादिति भावः । तदुक्तं विद्यारण्यमुनिभिः । प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते । कर्माक्षयत्वेऽसौ नैव शाम्येद्ध्यानसहस्रतः ॥ इति । अतः सूचितं सञ्चितागामिकर्मणि सम्यक्ज्ञानवतो न

भवत इति ॥ अत्र दृष्टान्तमाह किमित्यादिना। आहितुण्डिकगृहीततनुः आहितुण्डिकेन व्यालग्राहिणा गृहीता प्रहृता तनुः मूर्तिः यस्य स तथोक्तो भुजङ्गः सर्पः तत्कल्पदण्डनविधिं तेनाहितुण्डिकेन कल्पस्य नियमितस्य दण्डनस्य दमनस्य विधिं विधानं ताडनाकर्षणादि कर्म परिहर्तुं निवारयितुं ईष्टे किं वा नेष्ट इत्यर्थः ॥ तीव्रविषदन्तायुधोऽपि व्यालग्राहिगृहीतस्सर्पस्तत्कर-मोक्षानन्तरमेव स्वैरं सुखमनुभवति। न तु तत्पूर्वम्। स्वस्य पटाटोपशतैरपि तद्दण्डनविधानाभावाभावदिति भावः ॥

Only by enjoying great prosperity or suffering great adversity born of his Prarabdakarma, a man attains complete purity. Is the serpent whose body is caught by the snake catcher able to ward off his punishment ?

Notes :— Since the realised on account of his incessant meditation and steadfast Samadhi has burnt away all his ignorance and its effects how can he be tied down by his Prarabdakarma which being included in that must also have been burnt completely ? This is answered in this verse. Prarabdakarma which has begun to take effect even before the dawn of knowledge is not destroyed by the acquisition of Jnana, even as an arrow discharged cannot be prevented from hitting the target aimed at. Hence one can attain final emancipation only after reaping the fruits of one's good and bad deeds of the past and not before. पुरुषः means (1) the individual soul, Jiva, that rests in the body (पुरि) or (2) 'one realised of Brahma' as he is intent on Samadhi, a means to attain the object of life (पुरुषार्थे) or (3) one who has attained the state of Brahma (पुरुष) who is beyond Prakriti (अव्यक्त) as the scripture says or (4) the knower of Brahma, one liberated while alive (जीवन्मुक्तः) for Mukti is the Purushartha. प्रारब्ध means body which has been born before the dawn

why should he resort to Samadhi which is but another aspect of Karma. Herein is the answer to the above.

सर्वात्मता—To see all as Brahma or Atman. समाधिः—Religious concentration of mind whereby it is made one pointed. It is the state where the mind remains inactive and without any modification. This is known as Asamprajnata Samadhi which is the favoured practice of Yogis. It is the state where in the mind remains steady as a lighted lamp in a place where there is no wind. According to the great Yogi, Patanjali, it is the transformation of the mind wherein its many-pointedness is reduced to one-pointedness. To explain: overpowered by the quality of Rajas (activity) the mind is always unsteady and tends to grasp at all objects. To get rid of that Rajas, the Yogi by his daily practice controls the all grasping nature of the mind and makes it one-pointed towards the Atman. Thus having realised the knowledge of Atman through Samadhi and tasted its sweetness, he resorts to it always to pass away his time. In illustration thereof is the case of an emperor, who having achieved all his objects by conquering his enemies with the aid of his army—infantry, cavalry, elephants and chariots—and having nothing more to gain continues in the indulgence of that pleasure to pass his time by resorting to the game of dice in which the factors are the same as those of the army, viz., elephants and the like. It is enjoined that an ascetic should consume all his resultant impressions or Vasanas in the fire of Samadhi kindled by the wind of Guru's grace and devote himself to the incessant meditation of the Atman. If it be so even in the case of an ascetic, how much more is it incumbent on one who is wallowing in ignorance, a slave of his Vasanas, overcome by mental inactivity, confusion, worldly attachment and the like?

आत्मज्ञमस्तमितसर्वविधिप्रवृत्ति-
मानन्दयन्ति निगमाभिमता निषेधाः ।
व्यापारमात्रविमुखस्य महालसस्य
माशब्दकव्यवहृतानि मनोहराणि ॥ ३५

एवं निश्शेषवासनानिवृत्तिहेतोस्समाधेरवश्यकर्तव्यत्वं सूचयित्वाधुना कर्मनिषेधकश्रुतिवाक्यान्यात्मज्ञानिनमानन्दयन्तीत्याह । पुनरपि मुमुक्षोर्यतेर्वेदोक्तनिखिलकर्मपरित्यागजन्यनिरयभयमतिदूरतस्त्यक्त्वा चिरमनवरतमनुदिनमनुसन्धानमेवावश्यं कर्तव्यमिति सूचयितुं आत्मज्ञमिति ॥

निगमाभिमताः श्रुतिसंमताः श्रुतिप्रतिपादिताः इत्यर्थः । निषेधाः वेदानिमं लोकममुं च परित्यज्यात्मानमन्विच्छेत् । स्वाध्यायं च सर्वकर्माणि सन्न्यस्य । त्यजधर्ममधर्मं च । शौचमाचमनं स्नानं न तु चोदनयाऽऽचरेदित्यादि सर्वकर्मनिषेधवाक्यानि । अस्तमिते नष्टे विधिप्रवृत्ती शास्त्रतदुक्तकर्माणि यस्य सः अस्तमितसर्वविधिप्रवृत्तिः सर्वकर्मतद्विध्योर्मिथ्यात्वदृष्ट्या विनष्टसर्वविधितदुक्तकर्मा तं आत्मज्ञं ब्रह्मात्मैकत्वविज्ञानवन्तं आनन्दयन्ति सन्तोषयन्ति । तेषां तदन्तरायत्वेन निरन्तरानुसन्धानानवकाशप्रदत्वादिति भावः । अत्र दृष्टान्तः । व्यापारमात्रविमुखस्य व्यापारमात्रे इतरप्रवृत्तिमात्रे नत्वाहारादौ विमुखः पराङ्मुखः तस्य महालसस्य अत्यन्तमन्दस्य महातन्द्रावत इति यावत् माशब्दकव्यवहृतानि माशब्दकः मा इति शब्दः पदं स्वार्थे क प्रत्ययः तेन व्यवहृतानि लपितानि वचनानि मनोहराणि हृद्यानि भवन्ति तेषां स्वेष्टावकाशप्रदत्वादिति भावः । अयमभिप्रायः । यथा लोके व्यापारमात्र विमुखः पुरुषः अहरहराहारं विना न कोऽपीतरव्यापारः कर्तव्य इति मातृभाषितेन प्रहर्षति । तथा अनुसन्धानविरोधि निखिलकर्मविमुखस्तत्वज्ञानी यतिरनुदिनमनवरतमनुसन्धानं विना नान्यत् किमपि कर्मकर्तव्यमित्यर्थवच्छ्रुतिभाषितेन प्रहर्षतीति । एतेन मुमुक्षुभिर्यतिभिःश्रुतितदुक्त समस्तकर्मत्याग-

जन्यदुर्गतिभीतिमतिदूरतस्त्यक्त्वान्वहमहमेवेदं सर्वमित्यनवरतमनुसन्धानमेव कर्तव्यमिति सूचितं भवति ॥

The prohibitory injunctions enjoined by the scriptures do delight the knower of Atman in whom are lost all the sastras and the enjoined actions. To the highly indolent who is averse but to activity, expressions of prohibition are charming.

Notes :— Having explained that Samadhi is most essential to get rid of all the Vasanas or impressions completely from the mind and to corroborate the same herein is described the attitude of the knower of truth towards all scriptural injunctions of a prohibitory nature regarding Karma or religious practice.

निगमाभिमता निषेधाः—The prohibitory injunctions laid down by the scriptures. There are many such, e. g , one should enquire after the Atman, giving up the Vedas and this—worldly considerations; give up all Vedic studies and enjoined actions therein; give up both virtue and nonvirtue (Adharma); should not take to ablutions such as sipping water, bath and the like merely because they are enjoined, and so forth. अस्तमिते—Sastras and the injunctions therein fail to elicit any response from the knower of truth, for he sees everything, the injunctions and religious practice as false and not real. To him all these are but impediments to incessant meditation of and absorption into the Atman. In illustration, is the highly indolent man. All words and talk prohibiting all kinds of action except eating are highly pleasing to him even as the good advice of a mother. For such words of prohibition give him an impulse to continue his wanton life. So

also the knower of truth is highly pleased with the scriptures as with a mother when they prohibit action of any kind that would stand in the way of his incessant meditation. Giving up all fears of hell and the like if one fails to observe the Karma enjoined by the scriptures, he should devote himself entirely to incessant meditation of Brahma embracing all.

तत्वानुचिन्तनपरो मुनिसार्वभौमः
स्वच्छन्दतो व्यवहरन्नपि नानुयोज्यः ।
साम्राज्यमेत्य हि यथारुचि वर्तमानो
राजा प्रजाभिरनुयोक्तुमशक्य एव ॥ ३६

एवं मुमुक्षोर्यतेः श्रुतितदुक्त सर्वकर्मपरित्यागपूर्वकमनुसन्धानमेव कर्तव्यमिति सूचयित्वा संप्रति स निदिध्यासुः प्रारब्धानुसारेण स्वैरं सर्वाणि कर्माणि कुर्वन्नपि तैरनुबद्धुमसाध्य इत्याह । यतेराहारादिषु प्रवृत्तस्यापि विदेहमुक्तिः प्रतिबध्यत इत्यज्ञशङ्कामशेषं निरसितुं तत्वेति ॥

तत्वं याथार्थ्यं अबाधितस्वरूपमखण्डसत्यज्ञानानन्दात्मकमद्वितीयं परं ब्रह्म तस्य अनुचिन्तने गुरूपदेशानुरूपेणानुसन्धाने परः तत्परः सर्वमिदमहं च ब्रह्मैवेति ब्रह्मानुसन्धानसक्त इति यावत् मुनिरेव सार्वभौमः मुनिसार्वभौमः योगिचक्रवर्ती स्वच्छन्दतः स्वैरतो व्यवहरन्नपि संसरन्नपि प्रारब्धानुसारेण सर्वकर्माणि पुण्यपापरूपाणि कुर्वन्नपीत्यर्थः नानुयोज्यः न तैः कर्मभिः अनुयोक्तुं शक्यः । किमु वक्तव्यमव्यवहरन् अनवरतमनुदिनमनुसन्धानपरो मुनिः सर्वकर्मभिरनुबद्धुमसाध्य इतीति भावः । न लिप्यते कर्म शुभाशुभैश्च न मातृवधेन न पितृवधेन । न मां कर्माणि लिम्पन्ति न मे कर्मफले स्पृहा । इति मां योऽभिजानाति कर्मभिर्न स बद्ध्यते ॥ तस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वापि स इमां लोकान् न हन्ति न निबद्ध्यते ॥ हयमेधशतसहस्राण्यथ कुरुते ब्रह्मघातलक्षाणि परमार्थविन्न पुण्यैर्न च पापैर्लिप्यते मनुजः ॥ अश्वमेधसहस्राणि ब्रह्महत्यशतानि च । कुर्वन्नपि न लिप्येत

of Jnana or (2) that which is born of Prarabda of the three kinds of one's own wish (स्वेच्छा) or nonwish (अनिच्छा) or the wish of another (परेच्छा). अधिकसम्पदं such as lordship over men or of Gods. विपदं such as sorrows of the mind or caused by animals or by vismajor. परिशुद्धिः complete purity or freedom from future births. Only on the extinction of Prarabda one can enjoy the Brahmic Bliss, pure and full and not before. As the sage Vidyaranya says 'only on the extinction of Prarabdakarma, does activity cease. Without the cessation of Karma (activity) one cannot have calmness whatever be the amount of meditation, thereby suggesting that Agami and Sanchita Karmas do not affect the fully realised. In illustration thereof is the case of a serpent in the clutches of the snake-catcher. Though endowed with venomous fangs, the serpent is helpless at the hands of the snake-catcher and is the victim of his punishment. It enjoys its freedom only when it is out of his hands. So also the realised becomes completely free only on his being freed from the clutches of his Prarabda Karma and not earlier though he be given to incessant meditation of the Supreme Brahma.

पूर्वोत्तरार्जितशुभाशुभकर्मभिस्त्व-
संपद्विपश्च न भवेत् परमार्थदृष्टेः ।
जात्योपरस्य धनवर्षजलाभिषेके-
रत्योष्मणा च नहि सस्यविवृद्धिहानी ॥ ३८

एवं सम्यक्ज्ञानवतोऽपि प्रारब्धानुभवानन्तरमेव विदेहमुक्तिमुख-मिति स्फुटमुक्त्वा संप्रति तत्सूचितसञ्चितागामिकर्मफलाभावं प्रस्फुटं प्रतिपादयति पूर्वोत्तरेति ॥

एवं ज्ञानोदयात् प्राक् उत्तरं ऊर्ध्वं च आर्जितैः त्रिविधकरणकृतैः शुभाशुभकर्मभिः पुण्यपापकर्मभिः स्वसंपत् पुण्यकर्मफलभूतनरैश्वर्यसुरैश्वर्यादिसुखं विपत् पापकर्मफलभूताध्यात्मिकादिदुःखं च आगामिनोऽप्युपलक्षणमेतत् आगाम्यनिष्टमिष्टमिश्ररूपाणि कर्मफलानि तत्कारणरागादिः तत्कारणाभिमानादिश्च परमार्थदृष्टेः परमार्थः प्रमाभूतं सत्यज्ञानानन्दाद्वयं परं ब्रह्म तस्य दृष्टिः ज्ञानं यस्य सः। यद्वा महतः परमव्यक्तमव्यक्तात् पुरुषः पर इति श्रवणात् परमश्चासावर्थश्चेति परमार्थः सर्वोत्कृष्टं वस्तु परिपूर्णसच्चिदानन्दरूपं परं ब्रह्म तस्य दृष्टिः सर्वमिदमहं च ब्रह्मैवेति सम्यक्ज्ञानं यस्य सः यद्वा दृष्टिं ज्ञानमयीं कृत्वा पश्येत् ब्रह्ममयं जगत् सा दृष्टिः परमोदारा न नासाग्रावलोकिनीत्याचार्यवचनात्। नासाग्रावलोकिन्यादिदृग्व्यपेक्षयोत्कृष्टा अर्थदृष्टिः गुरुवरपुरतः परिशोधिततत्वं पदलक्ष्याखण्डसच्चिदानन्दाद्वितीयपरब्रह्माकाराकारितान्तःकरणवृत्तिश्चिरमनवरतकृतसमाधिनिवारितापारदुर्वारदुर्वासनातिमिरनिकरा यस्य स परमार्थदृष्टिः सम्यक् परब्रह्मविज्ञानवान् योगी तस्य न भवेत्॥ तदुक्तं विद्यारण्यमुनिभिः। यथा पुष्करपर्णेऽस्मिन्नपामश्लेषणं तथा। वेदनादूर्ध्वमागामिकर्मणोऽश्लेषणं बुधे॥ इषीकातृणतूलस्य वह्निदाहः क्षणाद्यथा। तथा सञ्चितकर्मास्य दग्धं भवति वेदनात्॥ इति॥ भगवतापि–यथैधांसि समिद्धोऽग्निः भस्मसात् कुरुतेऽर्जुन। ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा॥ यस्य नाहंकृतोभावो बुद्धिर्यस्य न लिप्यते। हत्वापि स इमान् लोकान् न हन्ति न निबध्यते॥ इति श्रुतिभिश्च यथा पुष्करपलाश आपो न श्लिष्यन्त एवमेवं विदि पापं कर्म न श्लिष्यत इति॥ तद्यथैषीकातूलमग्नौ प्रोतं प्रदूयेतैवं हास्य सर्वे पाप्मानः प्रदूयन्त इति॥ अत्र दृष्टान्तमाह जात्योपरस्येत्यादिना। जात्या स्वभावेनैव यस्मिन् ऊपः क्षारमृत् स ऊपरः क्षारमृण्मयदेशविशेषः तस्य सस्यानां व्रीह्यादीनां विशेषेण वृद्धिश्च हानिश्च सस्यविवृद्धिहानी सस्यवृद्धिक्षयौ लोकप्रसिद्धिद्योतकोहि शब्दः विस्पष्टः शिष्टपदार्थः॥ अयं भावः ब्रह्मविदां प्रारब्धमनुभूतिं विना न विनश्यति। सुरनरतिर्यगादियोनिशतसहस्रकोटिजनिहेतुभूतानि सञ्चितागामिकर्माणि तु सूर्योदयमात्रेण तिमिरतत्कार्यनिकरवदात्मज्ञानोदयमात्रेण निश्शेषं विनश्यति॥ ये स्वदेहमपि विस्मृत्य नित्यमत्यन्ततन्मयतया संस्थितास्तेषां प्रारब्धमपि विनश्यतीति॥ तदुक्तमाचार्यैः प्रारब्धं बलवत्तरं खलु विदां भोगेन तस्य क्षयः सम्यक्ज्ञान-

हुताशनेन विलयः प्राक्सञ्चितागामिनाम् । ब्रह्मात्मैक्यमवेक्ष्य तन्मयतया ये सर्वदा संस्थितास्तेषां तत्त्रितयं नहि क्वचिदपि ब्रह्मैव ते निर्गुणम् ॥ इति । एतेन जीवन्मुक्तानां पुनरावृत्तिराहित्यं सूचितं भवति ॥

To the realised of Brahma there is neither prosperity nor adversity arising from the deeds good and bad done before and after the acquisition of Jnana. In a soil naturally saline, there is never either abundance or failure of crops due to the downpour of rains or excessive heat.

Notes :— Having described that even the realised could enjoy complete emancipation only after exhausting his Prarabda Karma herein is explained that he is not affected by his Agami (to take place) and Sanchita (stored up) Karma which generally shape one's future births.

आगामि are the effects of deeds, liked and disliked, born of love, hatred and so forth which in turn arise from the notion of pride, self respect and so on. परमार्थदृष्टिः one with the knowledge (Dhrishti) of Brahma or one who sees everything as Brahma, the most exalted object or one whose eye is the knowledge of Brahma, a realised ascetic. To such a realised ascetic there is no bondage. As the sage Vidyaranya says—'As water does not wet the lotus leaf on which it stands, so also one's Agami and Sanchita Karmas do not cling to one after the dawn of Jnana. Those Karmas are destroyed for him as fire burns up grass and reeds'. As the Lord says, the fire of knowledge burns down all his Karmas. All his sins, as the scripture says are destroyed. In illustration thereof is the saline soil where neither down pour nor excessive heat brings forth any change to the crops therein, for no plant could thrive in such a soil. As the Acharya says—' Prarabda is indeed

very powerful and even the Jnani can exhaust it only after enjoying it. By his complete Jnana even his Agami and Sanchita Karmas are burnt down. He who identifies himself completely with Brahma who is seen as the only one everywhere, is not affected by any of the three Karmas of Prarabda and the like. He sees only the attributeless Brahma'. The liberated while alive (Jivan-mukta) has no rebirth.

प्रारब्धकर्मपरिपाकवशंवदो न
क्लिश्नाति निश्चितपरावधिरात्मवेदी ।
ग्रामान्तमार्गपरिमाणविदध्वनीनो
मध्येपथं न हि विषीदति दुःखितोऽपि ॥ ३९

नन्वेवमात्मविदः प्रारब्धमवश्यमनुभोक्तव्यं चेत्तर्हि तरति शोकमात्मविदित्यादि श्रुतेरप्रामाण्यप्रसङ्गात् प्रेक्षावत् प्रवृत्त्यभावः सद्गुरुशिष्यसंप्रदायविच्छित्तिरनिर्मोक्षप्रसङ्गश्चेत्यादयो दोषा बहवः संभवेयुरित्याशङ्कामशेषामशेषमुपशमयितुमुपदिशति प्रारब्धकर्मेति ॥

विदेहमोक्षसुखं प्रारब्धकर्मपरिपाकवशम् । पुराऽऽरब्धं प्रारब्धं शरीरं स्वेच्छादिकं वा तदेव कर्म कर्मफलं तस्य यः परिपाकः विपाकश्चरमविकार इत्यर्थः तस्य वशं अधीनमिति वदो वक्ता निश्चितपरावधिः निश्चिता परावधिः आरब्धपरमावसानं येन स तथोक्तः एतदेतावत्पर्यन्तमेव तिष्ठति नेतः परमिति दृढनिश्चयवानित्यर्थः अत एव आत्मवेदी आत्मा सत्यज्ञानानन्दानन्ताद्वयं परं ब्रह्म ते वेदितुं अहमर्थत्वेन ज्ञातुं शीलमस्यास्तीत्यात्मवेदी ब्रह्मविद्यतिः न क्लिश्नाति न शोचति ॥ यद्वा वैषयिक सुखदुःखादिकं सर्वं प्रारब्धकर्मपरिपाकवशं प्रारब्धानां प्राग्जन्मकृतानां कर्मणां काम्यप्रतिषिद्धरूपाणां यः परिपाकः फलोन्मुखं शरीरोत्पत्तिः तस्य वशमधीनमिति वदो वक्ता निश्चितपरावधिः निश्चिता अवधारिता परावधिः परमावधिश्चरमावसानं येन सः विषयसुख-

दुःखाद्याश्रयभूतस्यैतस्य शरीरस्यैतावत्पर्यन्तमेव वर्तित्वं नेतः परमिति दृढनिश्चयवानित्यर्थः अत एवात्मवेदी आत्मानमेव प्रत्यगभिन्न सच्चिदानन्दरूपं न त्वनात्मानमनृतजडदुःखरूपं वेदितुमहंप्रत्ययास्पदत्वेन विज्ञातुं शीलमस्यास्तीत्यात्मवेदी ब्रह्मविद्यतिः न क्लिश्नाति न शोचति । आध्यात्मिकादि परिपीडितोऽपीति शेषः । वैषयिकसुखदुःखादेस्सर्वस्यापि प्रारब्धाधीनत्वात् स्वस्यैतदेतावन्तं कालमेवतिष्ठति नेतःपरमित्यवधारितप्रारब्धपरावधिकत्वेन धैर्याच्चेति भावः । तस्मात् सिद्धमसिद्धवत् सिद्धस्य न प्रारब्धानुभूतिरिति । तदुक्तं विद्यारण्यमुनिभिः–ज्ञानिनोऽज्ञानिनश्चात्र समे प्रारब्धकर्मणी । न क्लेशो ज्ञानिनो धैर्यान्मूढः क्लिश्यत्यधैर्यतः ॥ इत्यत्र दृष्टान्तमाह ग्रामेत्यादिना । ग्रामान्तमार्गस्य संवसथपर्यन्तपथस्य परिमाणं प्रमाणं वेत्ति ज्ञायत इति ग्रामान्तमार्गपरिमाणवित् इतो ग्रामपर्यन्तमेतावन्मार्गमात्रमस्ति नातोऽधिकमिति परिज्ञानवानित्यर्थः अत एव अध्वनीतो अध्वगः पुरुषः मध्येपथं मार्गमध्य इत्यर्थः । हि शब्दः सर्वाध्वगप्रसिद्धिद्योतकः । सुगममन्यत् ॥

The knower of Atman who is of the view that the final emancipation without rebirth is dependent on the complete fruition (extinction) of Prarabdakarma and is consequently sure of the ultimate limit does not bewail. The traveller who knows the distance and the route to his village though troubled midway is not afflicted on that score.

Notes :— If it is true that the realised also has of necessity to reap fully his Prarabda Karma, then the text that the known of Atman transcends all grief and sorrow becomes meaningless, cuts at the root of action, the institution of Guru cum Sishya and of liberation too. This sloka is intended to refute such arguments and doubts.

The word वशं dependent may be taken to refer either to final emancipation without rebirth or worldly pleasures

and pains. In the former case, final liberation is dependent on the complete fruition of one's Prarabda Karma and the knower of Atman is sure that the Prarabda lasts only so long and no further. In the latter sense, he knows that the worldly happiness and misery relate to the body alone and not to the Atman as the body is the fruition of one's Karma in past births and they last only as long as the body lasts and no further. As he is aware that all worldly pleasures and pain are dependent on Prarabda and is aware also of the limit of his Prarabda, he puts up with all troubles boldly in the hope of final emancipation ultimately. Hence the experience of Prarabda in the case of the realised and the non-realised is not the same. As the sage Vidyaranya says—"Regarding the working of Prarabda Karma, both the Jnani and the ignorant are equal, but the Jnani does not quail before it as he faces it boldly unlike the ignorant who is cowed down by it and is consequently afflicted." In illustration thereof is the case of a traveller who knows the distance to his village and is not cowed down in his journey to the destination though subjected to hardships on the way as he is sure that the distance is only so far and no farther.

अन्तर्बहिश्च परमार्थतयानुपश्यन्
न क्लिश्यति व्यसनमुत्कटमप्युपेतः ।
धीरः किलाहमुखे विजयैकदृष्टिः
प्रत्यर्थिभिः प्रमथितोऽपि न विक्लवस्स्यात् ॥ ४०

ननु सुप्रबुद्धोऽप्याध्यात्मिकाद्यत्यन्तसन्तापसङ्घातहेतुसमेतश्चेत् परितपस्येव ॥ यत्र यत्र शरीरपरिग्रहस्तत्र तत्र दुःखमितिव्याप्तेर्विद्यमानत्वात् विज्ञानोदयमात्रेण शरीरपरित्यागयोगाच्च ॥ पुनः कथं प्रबुद्धानां प्रारब्धानुभवाभाव इत्याशंक्य सिंहावलोकनन्यायेन प्रोक्तमेव प्रकारान्तरेण प्रतिपादयति ॥

प्रारूढानां प्रारब्धानुभवाभाव दृढीकरणार्थमारुरुक्षूणां सन्ततनिरन्तरश्रवण-मननर्निदिध्यासनसमाधिप्रवृत्तौ धैर्यसिद्धये च अन्तरिति ॥ स्वस्मिन्नारोपितस्य सर्वप्रपञ्चस्य अन्तर्बहिश्च सर्वत्र परमार्थतया परमश्चासावर्थश्चेति परमार्थस्तद्भाव-स्तत्ता परमार्थता परमात्मता तया सत्यज्ञानानन्दानन्ताद्वयब्रह्मत्वेनानुपश्यन् अन्तर्बहिश्चतः सर्वं व्याप्य नारायणस्थित इत्यादिश्रुतिमनुसृत्य चिन्तयन् धीरो विद्वान् ब्रह्मविद्यतिः उत्कटं अत्युत्कृष्टं व्यसनं आध्यात्मिकादि दुःखकारणं जरो-रोगादिरूपं उपेतः अपि उपगतोऽपि न क्लिश्यति न शोचति ॥ यद्वा अव्यक्तस्य महतोऽप्यन्तरत्वादन्तश्शब्देन कारणाव्यक्तं गृह्यते। बहिश्शब्देन कार्यमहदादि गृह्यते। तथा चाव्यक्तादिस्थूलान्तं कारणकार्यसमष्टिव्यष्ट्यात्मक-मखिलजगदित्यर्थः ॥ यद्वा आत्मा सर्वान्तर इति श्रवणात् बहिरन्तश्शब्दाभ्यां क्षेत्रक्षेत्रज्ञौ गृह्यते। तत्र क्षेत्रं साभासाहङ्कारं सविकारमज्ञानतत्कार्यरूपम्। क्षेत्रज्ञः कूटस्थासङ्गचिद्रूपः तथा च बहिरन्तश्च क्षेत्रं क्षेत्रज्ञं च परमार्थतया परब्रह्मत्वेनानुपश्यन्। विश्वं भूतं भुवनं चित्रं बहुधा जातं जायमानं च यत् सर्वो ह्येष रुद्रः सर्वं ह्येतत् ब्रह्म सर्वं खल्विदं ब्रह्म अयमात्मा ब्रह्म इत्यादि श्रुत्यनुसारेण। क्षेत्रज्ञं चापि मां विद्धि मत्तः परतरं नान्यत्। सर्वधर्मान् परित्यज्य मामेकं शरणं व्रजेदित्यादि भगवद्वचनानुसारेण सद्गुरूपदेशानुरूपेण च चिन्तयन् धीरः परितापहेतुपराक्रान्तोऽपि समाधौ सुस्थिरतरचित्तः परब्रह्म-विद्यतिरुत्कटमत्यन्तदुस्सहं व्यसनं संसारिकमाध्यात्मिकादिपरितापहेतुमुपेतोऽ-प्युपगतोऽपि न क्लिश्यति ॥ स्वस्य परमार्थैकदृष्टित्वाद्धीरत्वाच्चेति भावः ॥ यद्वा क्षेत्रस्यारोपितस्य ब्रह्मसत्ताव्यतिरिक्तसत्ताभावात् क्षेत्रज्ञस्यापि कूटस्थासङ्ग-चिद्रूपस्य ब्रह्माभिन्नत्वाच्च सर्वमिदमहं च ब्रह्मैवेति सर्वदा परिपूर्णात्मानुसन्धानं प्रकुर्वन् तत्वविद्यतिरत्यन्तसन्तापसङ्घातहेतूपेतोऽपि न परितप्यत्येव ॥ इच्छा-द्वेषस्सुखं दुःखं सङ्घातश्चेतनाधृतिः। एतत् क्षेत्रं समासेन सविकारमुपाहृतम् ॥ तत्ववित्तु महाबाहो गुणकर्मविभागयोः। गुणा गुणेषु वर्तन्त इति मत्वा न सज्जते ॥ इत्यादि वचनेन सुखदुःखदोः क्षेत्रधर्मत्वात्तत्वविद्यतेस्तत्तादात्म्या-भावाच्चेति भावः ॥ ततस्तत्वविदो मुनेरनवरतमनुदिनमनुसन्धानवतः प्रारब्ध-सद्भावकथा न स्वमार्थसंबन्धकथनवन्मिथ्येति सिद्धम् ॥ तदुक्तमाचार्यैः—उपा-धितादात्म्यविहीनकेवलब्रह्मात्मनैवात्मनि तिष्ठतो मुनेः प्रारब्धसद्भावकथा न

युक्ता । स्वप्नार्थसंबन्धकथेव जाग्रत इति श्रुतिभिश्चोक्तं विमुक्तश्च विमुच्यते अत्र ब्रह्म समश्नुते ब्रह्मवेद ब्रह्मैव भवतीति ॥ ननु तस्य प्राणोत्क्रमणकाले दुःखं स्यादेवेति चेन्न । न तस्यप्राणा उत्क्रामन्तीति तस्य प्राणोत्क्रमणाभावश्रवणात् समाधिविस्मृतदेहत्वाच्च ॥ नन्वेवं सति तस्य तावदेव चिरं यावन्न विमोक्ष्येथ संपत्स्य इत्यादिश्रुतेः प्रारब्धजामधिकसम्पदमापदं वा भुञ्जान एव पुरुषः परिशुद्धिमेतीति पूर्वोक्तस्यापि व्याहतिः स्यादिति चेन्न । श्रुतेरज्ञजनसमाधानार्थकत्वात् पूर्वोक्तस्य श्रुत्यानुसारित्वाच्च । तदुक्तमाचार्यैः—ज्ञानेनाज्ञानकार्यस्य समूलस्य लयो यदि तिष्ठत्ययं कथं देह इति शङ्कावतो जडान् समाधातुं बाह्यदृष्ट्या प्रारब्धं वदति श्रुतिरिति ॥ अत्र दृष्टान्तमाह धीर इत्यादिना । आहमुखे रणमुखे विजय एव एकदृष्टिः मुख्यमतिः यस्य स विजयैकदृष्टिः परविजयैकविचारवान् धीरः सुस्थिरः स्वराज्यविनाशहेतौ संप्राप्ते निष्कम्पशौर्यादिगुणशाली क्षत्रियः प्रत्यर्थिभिः शत्रुभिः प्रमथितोऽपि प्रकर्षेणास्त्रशस्त्रादिभिः परिमृदितोऽपि संच्छिन्नमर्मापीति यावत् न विक्लवः स्यात् किल न विह्वलो भवेत् । किलेति संभावनायाम् । तस्य विजयैकदृष्टित्वाद्धीरत्वाच्चेति भावः । यद्वा प्रमथनव्यथायाः शरीरधर्मत्वाद्यशश्शरीरिणः क्षत्रियस्य तदवस्थावत्त्वाभावाच्चेति भावः ॥

He who sees always everything both in and out as of the nature of the Supreme Brahma is not afflicted though beset (set on) with dire calamities. The hero with an eye solely on victory is never depressed in the battle front though crushed by the opponents.

Notes :— Even the most enlightened is afflicted if he is in the midst of situations that would bring suffering, for it is said as long as one keeps a body, so long he is exposed to misery. Further mere dawn of knowledge does not bring in the renunciation of body. Then how can it be said that the enlightened is free from the experience of Prarabda ? To dispel such a doubt is the scope of this

verse with a view to strengthening the most enlightened that he is not subject to the experience of Prarabda and to encouraging the spiritual aspirant in the process of Samadhi and so forth.

अन्तर्बहिश्च—Both in and out of this worldly phenomenon superimposed on oneself. It may be explained in other ways as well (1) अन्तः may denote the causal unmanifest (अव्यक्त) and बहिः the effect, Mahat (महत्). Hence that which embraces both the collective and individual aspects, the entire universe. (2) Since the Atman is said to be within all, the expression बहिरन्तः may also be taken to denote the body and the soul (क्षेत्र and क्षेत्रज्ञ). Kshetra is the product of ignorance, liable to modification with the sense of egotism while Kshetrajna is the individual soul and hence meditating on the body and soul as being of the nature of Parabrahma. The scriptures also declare to the effect that everything is Brahma including the individual soul. Further the Lord has declared, "Know Me as Kshetrajna the individual soul, there is none else other than Me. Hence the realised ascetic steadfast in Samadhi is not afflicted at all though beset with causes tending to misery, on account of his seeing everything as Brahma and unflinching courage, or. (3) The superimposed Kshetra has no existence except in that of Brahma and Kshetrajna the soul is not different from Brahma. Hence the realised ascetic given up to the incessant meditation of Atman, the full and absolute, is not affected though in the midst of causes that tend to misery. What is known as Kshetra is an aggregate of love, hatred, happiness and misery, consciousness, fortitude or steadfastness with the liability to modifications. The realised ascetic is aware that qualities are due to the qualities of Prakrit and not of the Jiva

and that happiness and the like are but the aspects of Kshetra with which he does not identify himself. Hence to speak of Prarabda to him who is ever intent on incessant meditation is as unreal as the visions in dream to the awakened. This has been testified to by the Acharya himself and by the scriptures too when they declare the liberated is released, he enjoys Brahma here and the realiser of Brahma is verily Brahma too. Indeed it may be argued that he may be subject to misery or pain at the time of the exit of his soul from his body. The answer is 'no' since the scripture says that to him there is no exit of his Pranas and as he is oblivious of his body or corporal existence being in Samadhi. Then can the texts 'to the realised Jnani his bodily existence is only so far as he does not discard his worldly bondages and attain identity with Brahma' and the earlier one viz. sloka 35 where it is said that he attains Brahma only after reaping the fruits of his Prarabda Karma hold water. There is no room for such a doubt too. The former text dispels the doubt of the ignorant and brings steadiness and the latter (sloka 35 *intra)* only conforms to the scriptures. As explained by the Acharya himself, 'If Jnana could completely efface ignorance and all its effects, how can the body exist ? It is to dispel such a doubt of the ignorant, the scripture refers to Prarabda superficially. This has been illustrated by the example of the unflinching hero. In the battle front the hero has an eye only to his victory and the defeat of his foe and is not desperate on the violent onslaughts of the latter or the hero does not mind the onslaught which is against his body of which he cares not in the fight, being solely intent on living eternally in the body of future fame of which alone a true hero is really mindful.

प्रापञ्चिकस्तु विभवः परमाद्भुतोऽपि
धीरं न रञ्जयति दृष्टतदीयतत्त्वम् ।
स्त्रीत्रेषभूषिततनुः पुरुषो विलासै-
स्तज्ज्ञं युवानमपि मोहयितुं हि नालम् ॥ ४१

ननु तदुक्तमनात्मतादात्म्यराहित्येनात्मानुसन्धानमनवरतं कृतवतः प्रारब्धानुभूतिर्नास्तीति तत्सत्यमेव तथापि । बलवानिन्द्रियग्रामो विद्वांसमपि कर्षति । नारीकटाक्षवदनादधि पुंसि धैर्यम् ॥ यततोह्यपि कौन्तेय पुरुषस्य विपश्चितः । इन्द्रियाणि प्रमाथीनि हरन्ति प्रसभं मनः ॥ न हि कश्चित् क्षणमपि जातु तिष्ठत्यकर्मकृत् । कार्यते ह्यवशः कर्म सर्वः प्रकृतिजैर्गुणैः ॥ सदृशं चेष्टते स्वस्याः प्रकृतेर्ज्ञानवानपि । प्रकृतिं यान्ति भूतानि निग्रहः किं करिष्यति ॥ मनोहराणां योग्यानां युवतीनां च वाससाम् । वित्तस्यापि च सान्निध्याच्चलेच्चित्तं सतामपि ॥ इत्यादि वचनैर्विचार्यमाणे स्रक्चन्दनवनितादिविषयचित्तविचित्रचरितानां श्रवणमात्रेण समाधिविच्छित्तिर्भवति । ततोऽनात्मातादात्म्यापत्तिस्ततो विषयचिन्ता । ततो ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते । सङ्गात् सञ्जायते कामः कामात् क्रोधोऽभिजायते ॥ क्रोधाद्भवति संमोहः संमोहात् स्मृतिविभ्रमः । स्मृतिभ्रंशात् बुद्धिनाशो बुद्धिनाशात् प्रणश्यति ॥ इतिन्यायेनाधोधः पतनमेव विदुषामपि प्रारब्धानुभूतिरस्त्येवेत्याशङ्कां अशेषमुपशमयितुमिदमुपदिशति प्रापञ्चिक इति ॥

प्रापञ्चिकः प्रपञ्चसंबन्धी तु विभवः तुच्छवस्तु स्रक्चन्दनवनितादिरूपः अथवा तु शब्दः प्रापञ्चिकविभवस्य तद्विलक्षण सच्चिदानन्दलक्षण विभववैलक्षण्यलक्षकः परमाद्भुतोऽपि नितान्ताश्चर्यकरोऽपि माधुर्यालापरूपसौन्दर्यादिभिरज्ञजनरञ्जनकरोऽपीत्यर्थः । दृष्टतदीयतत्त्व दृष्टमसद्रूपेण ज्ञातं तदीयं प्रापञ्चिकविभवसंबन्धितत्त्वं स्वरूपं येन तम् । यद्वा दृष्टानि सर्वस्यारोपितत्वेनासत्यत्वात्सर्वमिदमहं च ब्रह्मैवेति सर्वस्य स्वस्य च सच्चिदानन्दानन्ताद्वयब्रह्मरूपेण ज्ञातानि तदीयानि प्रापञ्चिकानि तत्त्वानि समष्टिव्यष्टिस्थूलसूक्ष्मकारणात्मकानि येन तं तथोक्तं धीरं धियं एति विषयेभ्यो निगृह्णतीति धीरः यद्वा धियमीरयति विषयेभ्यो निवृत्याखण्डानन्दैकरसे परे ब्रह्मण्येव नियोज-

यतीति धीरः तदेव खलु धीरत्वं यदानन्दास्वादासक्त्या समस्तेन्द्रियाणि सम्यग्नियम्य ब्रह्मचिन्तायां प्रवर्तनम् । तदुक्तं विद्यारण्यमुनिभिः धीरत्वमक्षप्राबल्येऽप्यानन्दास्वादवाञ्छया तिरस्कृत्याखिलाक्षाणि तच्चिन्तायां प्रवर्तनमिति ॥ तं समस्तेन्द्रियनिरोधपुरस्सरं निरन्तरपरब्रह्मचिन्तापरं यतिवरं न रञ्जयति । न विषयरागिणं करोतीत्यर्थः । अयं भावः यतः स्रक्चन्दनललितवनितगीतालिङ्गनसल्लापादिर्वीणावेणुमृदङ्गादिः सूपापूपघृतान्नादिरन्यश्च प्रापञ्चिकविभवः स्वमिथ्यात्ववेदिनमतिधीरं पुरुषं मोहयितुं न शक्नोति । ततस्तद्द्वारा योगिनः प्रारब्धानुभूतिर्नास्तीति । एतेन बहिः प्रवृत्तिनिवृत्तसर्वेन्द्रियाणामेव पुरुषाणां अमृतत्वमात्मन्येव परप्रेमास्पदत्वं च सूचितं भवति ॥ अत्र दृष्टान्तमाह स्त्रीवेषभूषिततनुरित्यादिना । तज्ज्ञं पुरुषज्ञम् । शिष्टं विस्पष्टम् ॥

The power of worldly objects though extremely wonderful does not delight the steadfast who has known their real nature. The man dressed in the garb of a woman is indeed unable with his amorous graces to infatuate even a youth who knows his true nature.

Notes :— If it is true that a man given upto the incessant meditation of Brahma without identifying himself with what is not Atman does not experience any Prarabda Karma, what about the many texts declaring the potency of those worldly objects that would dislocate him from his Samadhi It is said the senses are so powerful as to attract even the knower. A man remains steadfast only till he sees the glances of a woman. None can remain without action. Helpless, he is forced to action. Beings act under the impulse of Prakriti or nature. Of what avail then the control of senses? Beautiful objects and wealth can upset the minds of even the learned. In the light of the above texts there are many obstacles to steadfast Samadhi leading ultimately to one's ruin. Hence

even the learned knower is liable to the experience of Prarabda. The present verse is intended to dispel such a plansible doubt.

दृष्ट तदीयतत्वं who has known the real nature of worldly objects as unreal or who has known everything as Brahma and the diverse worldly objects as unreal and superimposed धीर is one who controls the senses from going out to the worldly objects or one who turns away the intellect from worldly objects and directs it to Brahma of bliss absolute. So it has been declared by the Sage Vidyaranya that though the senses are powerful, the desire to enjoy the bliss absolute is so keen in the ascetic that he gets beyond the influence of senses and remains steadfast in meditation. As such the Yogi has not the experience of Prarabda. He sees in the Atman alone all his joy and bliss. To illustrate this is the case of a man dressed, as a woman. He is not able with all his amorous graces of his assumed part of a woman to influence the mind of even a young man who knows the fact of his being only a man in a woman's garb.

अन्तर्निरन्तरनिगूढनिजात्मतत्वो
न प्रागिव व्यसनितां विषयेषु धत्ते ।
भाग्यात् कुतश्चिदपि लब्धनिधिर्मनस्वी
किं पूर्ववत् कृपणतामुररीकरोति ॥ ४२

ननु प्रापञ्चिकविषयेषु धीरस्य प्रवृत्त्यभावेऽप्यन्येषां सर्वेषां तेष्वेव प्रवृत्तिदर्शनादत्रैव परप्रेमास्पदत्वं नत्वात्मनीत्याशङ्कामशेषमुपशमयितुमुपदिशति अन्तरिति ॥

अन्तर्बुद्धिगुहायामेव निरन्तरं अनवरतमविच्छिन्नं निगूढं सम्यगास्थितं निजात्मतत्वं यथार्थात्मस्वरूपमखण्डसच्चिदानन्दैकरसलक्षणं यस्य सः सर्वं द

सर्वमिदमहं च ब्रह्मैवेत्यनुसन्धानवानित्यर्थः । यद्वा श्रीदेशिकेशोपदेशवशतः सुकृतसमाधिपरिपाकदशायां या ब्रह्माकाराकारितान्तःकरणवृत्तिस्तस्यां निरन्तरमनवच्छिन्नं निगूढं सम्यगाविर्भूतं निजात्मतत्त्वं यथार्थस्वरूपमखण्डानन्दैकरसलक्षणं यस्य सः निरन्तरवृत्त्या नितरां निरन्तरपरब्रह्मानन्दैकरसरसिक इत्यर्थः । एवंभूतो ब्रह्मविद्यतिर्विषयेषु मृष्टान्नभोजनस्रक्चन्दनवनितादिषु वैधेयमनोहरेषु व्यसनितां कामितां प्रागिव ज्ञानोत्पत्तेः सर्वमिव न धत्ते ॥ पूर्ववद्विषयाभिलाषितां न प्राप्नोतीत्यर्थः ॥ अत्र दृष्टान्तमाह । भाग्यादैववशात् कुतश्चिदपि देशाल्लब्धनिधिः लब्धः प्राप्तः निधिश्शेवधिर्यस्य सः तथोक्तः मनस्वी धीमान् पुरुषः पूर्ववत् निधिप्राप्तेः प्रागिव कृपणतां दरिद्रतां उररीकरोति किं नेत्यर्थः । मन्दमतीनां लब्धनिधित्वेऽपि लुब्धत्वदर्शनान्मनस्वीयुक्तम् ॥ अयं भावः लोके यथा सुधीर्दरिद्रो विधिवशान्निधिं लब्ध्वा पूर्ववच्छिद्रपटाच्छादनोच्छिष्टभोजनादि तुच्छविषयाभिलाषिनां न प्राप्नोति । तथा सुधीः सद्गुरुवरकरुणावशान्निरतिशयपरब्रह्मानन्दमहानिधिं लब्ध्वा पूर्ववत् पुत्रमित्रकलत्रादिक्षुद्रविषयाभिलाषितां न प्राप्नोतीति । यद्वा विषयेषु चित्तप्रसाद पितृलोक देवलोक प्राप्तिहेतुभूतनित्यनैमित्तिकप्रायश्चित्तोपासनादिषु यमनियमशमदमसन्यासादि साधनसम्पत्तिपुरस्सर सद्गुरूपसत्तिसाध्यश्रवणादिषु वा प्रागिव ब्रह्मानन्दानुभूतेः पूर्वमिव व्यसनितां क्लेशितां परिश्रमितां न धत्ते न प्राप्नोतीत्यर्थः । यस्माद्धीमान् प्रसन्नदेशिकेशोपदेशातिशयवशान्निरस्ताशेषविशेषमनवधिनिरतिशयानन्दशेवधिमनुभूय पूर्ववन्नित्यनैमित्तिकादि श्रवणादिपर्यन्तेषु विषयेष्वभिलाषितां न प्राप्नोति तस्मादात्मन्येवामृतरूपे परप्रेमविषयत्वं न तु विषयेषु विषयरूपेष्विति भावः ॥ नन्वात्मज्ञानोत्पत्तेः पूर्वं सर्वविषयेष्वन्येषु च परप्रेमास्पदत्वस्य सत्वात् कथमात्मन्येव परप्रेमास्पदत्वमुच्यते इति चेन्न । स्वातिरिक्तविषयप्रेम्णोऽप्यात्मार्थत्वात् । तदुक्तं विद्यारण्यमुनिभिः तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनीति । श्रुत्या च आत्मनस्तु कामाय सर्वं प्रियं भवतीति । तस्मात् सर्वथा कालत्रयेऽपि परमानन्दरूपे परमात्मन्येव परमप्रेमास्पदत्वं नान्यत्रेति सिद्धम् । अन्यत् सर्वं पूर्वसमानम् ॥

One who has incessantly imbedded within him the truth about the Atman does not cling

fast to worldly objects of pleasure as before. Does a wise man who has luckly come by a treasure trove from some place cling to his miserliness as before ?

Notes :— Though the wise abstain from actions conducive to worldly pleasures, others are seen to cling to them as the source of extreme joy. How can it then be said that the source of extreme joy is in the Atman? This doubt is solved in this verse.

निजात्मतत्वं–the real nature of Atman of Sat, Chit and Ananda as embracing everything. The first line may be explained as follows :—One who incessantly experiences the bliss absolute of Brahma in his mind transformed into the nature of Brahma with the aid of the preceptor's advice and his own steadfast Samadhi fully matured. Such a spiritually developed soul does not cling to worldly objects of pleasure which attract the foolish and the ignorant as he was attracted to them before the dawn of that spiritual knowledge. In illustration is the wise but poor man who comes by a treasure trove by luck. Such a man does not after he gets the trove cling to his erst while miserliness in eating, clothing and the like. The expression मनस्वी (a wise man) is significant as noting the contrast of a dull man in that position. The dull even though they get a treasure will not give up their natural niggardliness. To explain the spiritually wise aspirant having come by the treasure of Brahmic bliss by chance with the aid of spiritual advice does not as before become attached to the worldly possessions such as son, wife and friends or does not exert himself in his erstwhile spiritual efforts and religious practices. He finds his great happiness in the Atman and not any-

where else. Since he has his greatest happiness in worldly objects of pleasure and the like before the down of knowledge, how can it be said that after that he finds it in the Atman alone ? The answer is that his happiness in objects other than the Atman is of the nature of its being for the Atman. As observed by the Sage Vidyaranya his attachment or devotion to other objects is only for the sake of Atman and not for anything else. As the scriptures say everything is dear to him for the sake of his Atman. Hence his great devotion is always to the Supreme of the nature of bliss absolute and not anywhere else.

अध्यास्थितस्वमहिमानमलंक्रिया व-
दाध्यात्मिकाश्शुभगुणास्स्वयमाविशन्ति ।
स्वाधीनिते सुहृदि राजनि तस्य भृत्या
एतेऽपि च स्वयमुपेत्य तमाश्रयन्ते ॥ ४३

प्रारब्दकर्मपरिपाकवशमित्यारम्भोररीकरोतीत्यन्तेन ग्रन्थेन निरन्तरपरब्रह्मनिष्ठानां धीरत्वं प्रारब्धानुभवाभावमशेषविषयप्रवृत्त्यभावं विषयसुखस्य तुच्छत्वं तदिच्छतो यतेरपि दुःखित्वमात्मन्येव परमप्रेमास्पदत्वं च प्रतिपाद्य सम्प्रति परब्रह्मनिष्टमाहात्म्यं प्रतिपादयति सुषुप्तिवत् प्रारब्धानुभवाभावमात्रमद्वैतज्ञानफलं नान्यत् किमपीति बुद्ध्या यमाद्यष्टाङ्गयोगसाध्याणिमादिसिद्ध्यासक्तानामज्ञाताद्वैतसिद्धिमहत्वानामपि सुखार्थिनामद्वैतज्ञानसंपादन एव प्रवृत्तिसिद्ध्ये तज्ज्ञानिनां तन्निष्ठाप्ररोचनार्थं च अध्यास्थितस्वमहिमानमिति ॥

अध्यास्थितः अध्याश्रितः स्वस्य परमात्मनः महिम माहात्म्यं सर्वमिदमहं च ब्रह्मैवेति सर्वात्मत्वमहाविभूतिसहितेश्वरत्वं यस्य तं ब्रह्मनिष्ठं अलंक्रियावत् अलङ्कारा इव आध्यात्मिकाः आत्मानं बुद्ध्यादिस्थूलान्तं समष्टिव्यष्ट्यात्मकं सर्वं ब्रह्माण्डं रविरिव प्रकाशयितुमधिष्ठाय तिष्ठतीत्यात्मं प्रत्यगभिन्नं सच्चिदानन्दैकरसं परं ब्रह्म तत्संबन्धिनः आध्यात्मिकाः शुभगुणाः कल्याणगुणाः

स्वयमेवाश्नन्ति स्वप्रयत्नमन्तरा प्रविशन्ति ॥ अयं भावः यदा मुमुक्षोः सद्गुरुवरमुखतश्चिरमनवरतकृतवेदान्तश्रवणमननादिभिः सर्वमिदमहं च ब्रह्मैवेति सर्वात्मत्वमहाविभूतिसहितेश्वरत्वं सिद्ध्यति तदा यमनियमाद्यष्टाङ्गयोगाभ्यासाति क्लेशसाध्याणिमाद्यष्टैश्वर्यादिकमव्याहतं च घृतकुसुमसुगन्धवत् स्वत एवानायासेन सिध्यतीति ॥ तत्प्रकाशितमाचार्यैरशेषवेदान्तनितान्तमथनजनितनवनीतनिक्षेपदक्षिणामूर्तिस्तवकलशफलप्रतिपादनावसरे सर्वात्मत्वमितिस्फुटीकृतमिदं यस्मादमुष्मिंस्तवेतेतास्य श्रवणात्तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात् । सर्वात्मत्वमहाविभूतिं स्यादीश्वरत्वं स्वतस्सिध्येत्तत्पुनरष्टधापरिणतं चैश्वर्यमव्याहतमिति ॥ ब्रह्मविदाप्नोति परं सर्वान् कामान् सहेत्यादिश्रुतिभिश्च ॥ अत्र दृष्टान्तमाह स्वाधीनत इत्यादिना ॥ सुहृदि शोभनहृदये धर्मशीले कस्मिंश्चित् राजनि नृपतौ स्वाधीनिते स्ववशं प्राप्ते सति तस्य राज्ञः भृत्याः प्रधानप्रभृतयः एते दृश्यमाना जना अपि स्वयमेवोपेत्य उपगम्य तं वशीकृतराजकमाश्रयन्ते च भजन्त्येव ॥ चकारौविधारणार्थः ॥ एतेनात्मविदणिमादिसिद्धिजालानामुत्कृष्टत्वेऽपि सर्वात्मत्वसिद्ध्यपेक्षयातीव निकृष्टत्वात्तानि यदृच्छाप्राप्तान्यपि नेच्छतीति सूचितं भवति ॥

Auspicious merits of spirituality spontaneously come of their own accord to one (indulging in the greatness of the Supreme) steadfast in Brahma like decoration to one when he has won over the good hearted king and his servants and all the subjects resort to him of their own accord.

Notes :— Having described in the previous verses (39 to 42) the nature of the ascetic of intense steadfastness in Brahma, his non-experience of Prarabda, cessation of activity on the score of the worldly objects of pleasure and his insignificant outlook regarding them, misery of the ascetic who is hankering after them and his loving attachment for the Âtman alone, herein is described the greatness of the steadfastness in the Supreme Brahma

to emphasise the idea that the fruit of Advaitic Knowledge lies in the cessation of all experience of Prarabda and that even one hankering after the occult powers of anima (getting reduced to the size of an atom) and the like should strive after that Advaitic Knowlege and with a view to stimulating those already enlightened in their steadfastness in Brahma.

अध्यास्थित given upto or steadfast in स्वस्य of the Paramatma or Supreme Brahma, seeing everything as Brahma
आध्यात्मिका:—Relating to Brahma or Atma. Atma is that which exists pervading the entire universe from the subtle intellect to the gross universe and of the nature of Sat, Chit and Ananda (existence, energy and bliss absolute). The gist of the first part of the verse is as follows :- When the spiritual aspirant constantly listening to the spiritual advice of the Guru, incessantly meditating over it and gradually experiencing everything as Brahma, attains power unto God (Iswarathwam), then he comes by of all occult powers easily without the efforts of Yama and the like disciplinary processes with which they are ordinarily achieved. This has been beautifully explained by the Acharya in his Dakshinamoorthy Stotra, the quintessence of all Vedanta, in describing the fruits that are reaped by one who is intensely given up to the recitation and meditation of that stotra. Likewise the scriptures also assert that the knower of Brabma realises Brahma with all desires and occult powers. In illustration thereof, as usual, is the latter half of the verse. When one wins over the king, all the latter's ministers, servants and subjects are won over too. Hence though occult powers like Anima and so forth are superior, they are only inferior in comparison to one's realisation that everything is Brahma and nothing else. Such a realised soul has no attraction for occult powers even if he comes by them by chance.

अज्ञानमेव न कुतो जगतः प्रसङ्गो
जीवेशदेशिकविकल्पकथाऽपि दूरे ।
एकान्तनिर्मलचिदेकरसस्वरूपं
ब्रह्मैव केवलमहं परिपूर्णमस्मि ॥ ४४

एवं ब्रह्मनिष्ठमाहात्म्यं प्रतिपाद्य संप्रति लोकाश्च भान्ति परमे मयि मोहजन्याः स्वप्नेन्द्रजालमरुनीरसमा विचित्राः । व्युत्थानकाल इह न खुरलं विशुद्धप्रत्यक्सुखाब्धिपरमामृतचित्तवृत्तौ ॥ मत्तः परं न खलु विश्वमथापि भाति मध्ये च पूर्वमपरं नरशृङ्गतुल्यम् । मायोत्थशास्त्रगुरुवाक्यसमुत्थबोध-भानुप्रभाविलसिते क गतं न जाने ॥ निरतिशयसुखाब्धिस्वप्रकाशे परेऽस्मिन् कथमिदमविवेकादुत्थितं सर्पफणीव । क नु गतमधुना तद्देशिको वा श्रुतिर्वा परमविमलबाधेऽभ्युत्थितेऽहं न जाने ॥ इत्येतत्सर्वं याभास । माया या न विद्यते सा अविद्या इति व्युत्पत्तिं च हृदये निधायैतावत्पर्यन्तमाश्रितानां द्वैताश्रितानामद्वैतोपपत्त्यर्थमुपात्तसमस्ताज्ञानतत्कार्यप्रसङ्गमशेषं निषिद्ध्य विशिष्योत्तमशिष्यार्थमद्वैतार्थस्थितिप्रकारमेव प्रकाशयन् प्रकरणमुपसंहरति अज्ञानमिति ॥ यत्सर्वप्रपञ्चपरिणामिकारणत्वेन प्रतिपादितं मायासंज्ञितं तदज्ञानमेव नास्ति । पुनर्जगतः तत्कार्यभूत समस्त समष्टिव्यष्टिविष्टपस्य ब्रह्माण्डपिण्डाण्ड-मण्डललक्षणस्य सलिङ्गस्य प्रसङ्गः प्रसक्तिः कुतः न कुतोऽपीत्यर्थः ॥ ननु यदुक्तमज्ञानमेव नास्ति कुतो जगतः प्रसङ्ग इति तदयुक्तमेव । अज्ञानकार्यस्य प्रपञ्चस्य प्रत्यक्षेणानुभूयमानत्वात् अहं अज्ञ इति सर्वानुभूतेश्चेति वदन् वादी प्रष्टव्य प्रपञ्चकारणं यदज्ञानं तत् सद्वा किमसद्वा सदसत् । आद्ये अज्ञानसत् ब्रह्मसतो भिन्नं किमभिन्नं वा भिन्नाभिन्नं वेति नाद्यः । एको रुद्रो न द्वितीयाय तस्थुः । एकं सद्विप्रा बहुधा वदन्तीत्यादि सदेकत्वप्रतिपादकविरोधात् ॥ न द्वितीयः अज्ञानस्यानृत जडदुःखात्मकत्वेन ब्रह्मणोऽप्यनृतजडदुःखरूपत्वप्रसङ्गात् । सत्यं ज्ञानमनन्तं ब्रह्मेत्यादि श्रुतिविरोधप्रसङ्गाच्च । न तृतीयः भिन्नाभिन्नयोस्तेजस्तिमिरवत् परस्परविरोधित्वेनैकाधिकरणत्वानुपपत्तेः पारिशेष्याद-सदेवाज्ञानमित्यवगन्तव्यम् ॥ ननु अज्ञानस्य असच्छब्दवाच्यत्वे प्रतिपादिते तच्च न सन्नासदित्यादिश्रुत्युक्तानिर्वचनीयत्वहानिः श्रुतेर्मृषावादित्वेनाप्रामाण्य-

प्रसङ्गश्च स्यादिति चेन्न। विचाराभावे सत्यनिर्वचनीयत्वात् विचार्यमाणे शशिविषाणनरविषाणादिवन्नाममात्रावशेषत्वेन केवलब्रह्मात्म्यैक्यज्ञानवह्निर्बाध्यत्वात् श्रुतेः सृष्टिक्रमविचारोपयोगित्वेनाप्रामाण्यप्रसङ्गाप्रसक्तेश्च। तर्हि सृष्ट्याद्याभावप्रसङ्गः प्रत्यक्षविरोधश्च स्यादिति चेन्न। स्वप्ने प्रत्यक्षेणानुभूत शत्रुनिग्रह राज्यलाभ प्रजापरिपालनादिकं प्रबुद्धस्यादर्शनात् प्रत्यक्षेण व्यवह्रियमाणस्य घटस्य विचार्यमाणे मृद्व्यतिरिक्तत्वेनादर्शनात्। न च मत्स्थानि भूतानि मत्तः परतरं नान्यदित्यादि भगवद्वचनात्। यदि सत्यं भवेद्विश्वं सुषुप्तावुपलभ्यताम्। यन्नोपलभ्यते किञ्चिदतोऽसत् स्वप्नवन्मृषेत्याद्याचार्यवचनाच्च। तर्हि आत्मन आकाशस्संभूत.। यतो वा इमानि भूतानि जायन्ते। प्रजापतिः प्रजा असृजत इत्यादिश्रुतेः तमःप्रधान प्रकृतेस्तद्भोगायेश्वराज्ञया वियत् पवनतेजोंऽम्बुभुवो भूतानि जज्ञिरे। इत्यादि विद्यारण्यमुनिवचनस्य च मृषावादित्वेनाप्रामाण्यं स्यादिति चेन्न। प्रकृतिपरमाण्वोः प्रपञ्चोपादानहेतुतां वदतोः सांख्यतार्किकयोर्मतेन जनितामद्वैतहानिमात्मनोऽपनुत्यर्थमुपयोगित्वेन प्रामाण्योपपत्तेः। ननु अहमज्ञ इत्यनुभवविरोध इति चेत् भवान् प्रष्टव्यः भवन्निष्टमज्ञानं भवताज्ञातं वा न वा। अज्ञातं चेत् कथमहमज्ञ इत्यज्ञानानुभवस्तव भवति। ज्ञातं चेत् कथं तवाज्ञानित्वमुच्यताम्। ननु ब्रह्म न जानामीति ब्रह्मविषयमेव ममाज्ञानं नाज्ञानविषयमिति चेत् त्वं प्रष्टव्यः ब्रह्मविषयं यदज्ञानं तत्त्वयि ब्रह्मणि वा तिष्ठति वद त्वयि चेदन्योन्याश्रयदोषः ब्रह्मणि चेन्नित्यशुद्धस्वभावादिविरोधः। प्रकाशोऽर्कस्य तोयस्य शैत्यमग्नेर्यथोष्णता स्वभावः सच्चिदानन्दनित्यनिर्मलताऽऽत्मनः। अप्रकाशो यथाऽऽदित्ये नास्ति ज्योतिस्स्वभावतः नित्यबोधस्वरूपत्वान्नाज्ञानं तद्वदात्मनीत्यादिवचनविरोधश्च स्यात्। न चान्तःकरणनिष्ठमज्ञानमिति वाच्यम्। तत्राप्यन्योन्याश्रयदोषापत्तेः। तर्हि ज्ञानविस्फुरदनेकविधात्मभेदमज्ञानमाश्रितवतस्सुलभा न मुक्तिरित्यादि पूर्वोक्तेर्व्याहतिरिति चेन्न। तस्याप्यज्ञानतत्कार्यभ्रमनिवर्तकत्वात्॥ किं चाज्ञानाङ्गीकारे त्वद्वैतहानिः। एकमेवाद्वितीयं ब्रह्म। सर्वं खल्विदं ब्रह्म। नेह नानास्ति किञ्चन। एको रुद्रो न द्वितीयाय तस्थुः। एकस्तेनेदं पूर्णं पुरुषेण सर्वमित्याद्यद्वैतप्रतिपादकश्रुतिविरोधो दुःखनिवृत्त्यभावः शमदमसन्न्यासादि साधनसाध्यश्रवणादिश्रमनैष्फल्यं चेत्यादयो दोषा बहवः संभवेयुः।

तस्मादज्ञानतत्कार्यागामस्तित्वं ब्रह्मणोऽपि वक्तुमशक्यमेव। अत एव जीवेशदेशिकविकल्पकथापि अयं जीवः विश्वादिस्त्रिविधः व्यष्ट्यभिमानी किञ्चिज्ज्ञः। अयमीश्वरः वैश्वानरादिस्त्रिविधः समष्ट्यभिमानी सर्वज्ञः। अयं देशिकः आश्रितानामभयवचनपुरस्सरमुपदेष्टा इत्यादि विकल्पजल्पनं अपि शब्दात्तत्स्वरूप तत्कर्म तत्फलप्रतिपादक वेदशास्त्रेतिहासपुराणादि कदंबकमशेषवर्णाश्रम तद्धर्मतत्कर्म तत्फलप्रतिपादक वेदकदंबकमिह परगतिहेतुभूतकर्मकदंबकमकामानुष्ठान तज्जन्यचित्तशुद्धि तत्साध्यसाधनसंपत्ति तत्साध्यदेशिकेशोपदेशश्रवणमनननिदिध्यासनसमाधयः तत्सिद्धयश्च सांख्यराजहठादियोगास्तत्साधनानि तद्विधयस्तत्सिद्धयश्च पितृमातृसहोदरदारापत्य गृहारामक्षेत्र शत्रुमित्रप्रभृतिनिकराः स्नानाहारविहाराधिकार रौरवादिनरकादयो बन्धमोक्षौ चान्येनुक्तानिरुक्ता सर्वे विकल्पाः मत्तो नितरां दूरे वर्तन्ते। सन्ततं स्वस्थस्य मम न सन्तीत्यर्थः। ननु गुर्वीश्वरयोर्निषेधोऽनुपपन्न न गुरोरधिकं तत्वं अज्ञानग्रासकं ब्रह्मगुरुरित्यभिधीयते। गुरुर्ब्रह्मा गुरुर्विष्णु गुरुर्देवो महेश्वरः। गुरुस्साक्षात् परं ब्रह्म इति तयोः परब्रह्मत्वश्रवणादिति चेत् सत्यम्। गुर्वीश्वरयोः स्वरूपं ब्रह्मैव तस्य निषेध्यत्वाभावेऽपि तदुपाध्योरज्ञानकार्यान्तर्भूतत्वेन निषेध्यत्वोपपत्तेः। तस्मात् सुष्टूक्तं जीवेशदेशिकविकल्पकथापि दूर इति। तदुक्तमष्टावक्रमुनिभिः क्व प्रवृत्तिर्निवृत्तिर्वा क्व मुक्तिः क्व च बन्धनम्। कूटस्थनिर्विभागस्य स्वस्थस्य मम सर्वदा॥ क्वोपदेशः क्व शास्त्रं वा क्व शिष्यः क्व च वा गुरुः। क्व चास्ति पुरुषार्थो वा निर्विचारस्य मे सदा॥ श्रुतिभिश्च–चित्तं प्रपञ्चमित्याहुर्नास्तिनास्त्येव सर्वदा। प्रपञ्चं न चित्तादि नाहङ्कारो न जीवकः॥ मायाकार्यादिकं नास्ति माया नास्ति भयं न हि। समाधिद्वितयं नास्ति मातृमानादि नास्ति हि॥ अज्ञानं चापि नास्त्येव ह्यविवेकं कदाचन। अनुबन्धचतुष्का न संबन्धत्रयमेव न॥ न गङ्गा न गया सेतुर्न भूतं नान्यदस्ति हि। न भूमिर्न जलं नाग्निर्न वायुर्न च खं क्वचित्॥ न देवा न च दिक्पाला न वेदा न गुरुः क्वचित्–इति। अत एवाहं कूटस्थासङ्गचिद्रूपः प्रत्यगात्मा एकान्तनिर्मलमत्यन्तनिर्मलं निरशेषाज्ञानतत्कार्यमलरहितमिति यावत्। चिदेकरसस्वरूपं स्वयंप्रकाशप्रत्यगभिन्नानन्दस्वभावं परिपूर्णाकाशवत् परितः सर्वतः पूर्णं मायाभ्रान्तिविकल्पितदेशकालवस्तुपरिच्छेदरहितं अत एव केवलमद्वितीयं ब्रह्मैवास्मि अनृतजडदुःखलक्षणाज्ञानतत्कार्यविलक्षणमपूर्वमनपरमनन्तरमबाह्यं

नित्यशुद्धबुद्धमुक्तस्वभावमखण्डसच्चिदानन्दैकरसं परं ब्रह्मैवास्मि ॥ न तु मरीचिजलसदृशाज्ञानतत्कार्यदेहादिकं तदभिमानी चेति भावः । सर्वं खल्विदं ब्रह्म नेह नानाऽस्ति किञ्चन । ब्रह्म वेद ब्रह्मैव भवति । ब्रह्मैवेदममृतं पुरस्तात् ब्रह्म पश्चात् ब्रह्म दक्षिणतोश्चोत्तरेणाधश्चोर्ध्वं प्रसृतं ब्रह्मैवेदं विश्वमिदं वरिष्ठं नत्वा न चाहं नान्यद्वा सर्वं ब्रह्मैव केवलम् । ब्रह्मैव सर्वं नान्योऽस्ति तदहं तदहं तथा ॥ तदेवाहं तदेवाहं ब्रह्मैवाहं सनातनम् । ब्रह्मैवाहं न संसारी ब्रह्मैवाहं न मे मनः ॥ ब्रह्मैवाहं न मे बुद्धिर्ब्रह्मैवाहं न चेन्द्रियः । ब्रह्मैवाहं न देहोऽहं ब्रह्मैवाहं न गोचरः ॥ ब्रह्मैवाहं न जीवोऽहं ब्रह्मैवाहं न भेदभूरित्यादिश्रुतेः । नासतो विद्यते भावो नाभावो विद्यते सतः ॥ इत्यादि भगवद्वचनात् । न भूमिर्न तोयं न तेजो न वायुर्न खं नेन्द्रियं वा न तेषां समूहः अनैकान्तिकत्वात्सुमत्यैकसिद्धस्तदेकोवशिष्टः शिवः केवलोऽहमित्यारभ्य । अपि व्यापकत्वाद्धितत्वप्रयोगात् स्वतस्सिद्धभावामनन्यात्मकत्वात् जगत्तुच्छमेतत्समस्तं तदन्यात्तदेकोऽवशिष्टश्शिवः केवलोऽहमित्यन्तेनाचार्यवचनेन स्थूलं हि नो न हि कृशं न गतागतं हि आद्यन्तमध्यरहितं हि परापरं हि सत्यं वदामि खलु वै परमार्थ तत्वं ज्ञानामृतं समरसं गगनोपमोऽहमित्यादेरवधूतगीतायामवधूतवचनाच्च । एतेन यत एवमतिदयावता भगवता श्री सदाशिवब्रह्मयतीश्वरवरेणाज्ञानविस्फुरदनेकविधात्मभेदमित्यारभ्य परिपूर्णमस्मीत्यन्तेन ग्रन्थेन स्वानुभूतिरतिकृपयातिरतिरहस्यापि सुखार्थिभ्यः स्वशिष्यवरेभ्यः सम्यक् प्रकाशिता ॥ स्वस्य निष्कामानुष्ठानासाद्य श्रीचक्रराजेश्वरीप्रसादासादिताचार्यवर्य सुप्रसादासादितासायाद्वितीय परब्रह्मात्मनावस्थितश्च । तस्मात्तच्छिष्यवरैः सुखार्थिभिरस्माभिरपि निष्कामानुष्ठानासाद्य तत्प्रसादासाद्यमाचार्यवर्यमासाद्य तन्मुखतः श्रवणमननादिकं कृत्वानृतजडदुःखरूपाज्ञानतत्कार्यप्रसङ्गाशेषमशेषं निरस्य नित्यशुद्धबुद्धमुक्तस्वभाव सच्चिदानन्दानन्ताद्वयब्रह्मरूपेणैव सदा स्थातव्यमिति सिद्धम् । किं च सर्वं ब्रह्मेति नास्त्येव ब्रह्म इत्यपि नास्ति हि । चिदित्येवेति नास्त्येव चिदहं भाषणं न हि अहं ब्रह्मास्मि नास्त्येव नित्यशुद्धोऽस्मि न क्वचित् । वाचा यदुच्यते किञ्चित् मनसा मनुते क्वचित् । बुद्ध्या निश्चिनुते नास्ति चित्तेन ज्ञायते न हि ॥ यस्माद्वाचो निवर्तन्ते अप्राप्य मनसा सह ।' यन्मौनं योगिभिर्गम्यं तद्भवेत्

सर्वदा बुधः ॥ न चैकं तदन्यद्द्वितीयं उत स्यां न वा केवलत्वं न चाकेवलत्वं न शून्यं न चाशून्यमद्वैतकत्वात् कथं सर्ववेदान्तसिद्धं ब्रवीमि इत्यादि श्रुत्याऽऽचार्यवचनादस्यानिर्वचनीयत्वादचिन्त्यत्वादनुभवैकवेद्यत्वाच्च । इतः परं वक्तव्यं श्रोतव्यं मन्तव्यं च नास्तीति च सिद्धम् । सर्वमतिरमणीयम् । दक्षिणामूर्तिरूपेण योऽखण्डानन्दसद्गुरुः अवतीर्णोऽनुगृह्णाति तुष्यतां व्याख्यानया । तमोग्रस्तेन सूर्येण तमोग्रस्तमशेषतः इतः परं किमाश्चर्यमस्तीह भुवनत्रये ॥

अखण्डानन्दयोगीन्द्रकृपापीयूषवृष्टिभिः सदापूर्णचिदानन्दार्णवे मग्नोऽस्मि तन्मयः शुभमस्तु ॥

इति

श्रीमत्परमहंस परिव्राजकाखण्डानन्दाचार्यवर्य
चरणारविन्दमकरन्दबिन्दुपरिनन्दमान
श्रीकृष्णानन्दाश्रमिस्वामियतिवर विरचिताद्वैतरसमञ्जरीव्याख्या
सुविकासिन्याख्या सम्पूर्णा ॥

॥ श्रीरस्तु ॥

There is nothing at all as ignorance. Whence then the conclusion or association of the universe? Far remote even the distinctions as Jiva, God and preceptor I am verily Brahma, the absolute, full of the nature of the one essence of Chit (consciousness) extremely immaculate.

Notes :— Having described the greatness of one steadfast in Brahma, the author concludes the treatise with an illumination of the very mood of the realised Advaitin for the benefit of his disciples refuting completely all ignorance and its effects for the sake of instilling the Advaitic spirit in those given up to the notion of

duality, keeping in mind the derivative meaning of Maya and the several texts that speak of its illusiveness and the everlastingness of the Supreme Brahma. The scriptures declare that the worlds are born of delusion and like the objects seen in a dream, or produced by jugglery or the water in mirage are really unreal. They all vanish at the dawn of knowledge. Further they declare—'There is nothing other than Me' (Brahma). Yet the world that appears is as unreal as the horns of man when the light of knowledge born of Sastras and preceptors dawns none knows where it has gone. When the Brahma of bliss absolute dawns within how will ignorance have a place therein? All notions of preceptor, scriptures and the like do then completely vanish. The derivative meaning of Maya itself is या मा सा माया that which does not really exist.

Maya or ignorance from which is alleged that the entire worldly phenomenon is evolved has in fact no reality. Such being the case, there is no question of the existence of the universe too, since the latter is the effect of the former, the alleged cause. When there is no cause at all, how then can there be any effect? It may be argued that this statement is not correct since the worldly phenomenon is directly experienced by all as also the fact 'I am ignorant'. In answer to this objection, such an arguer should be asked whether that ignorance which is the cause of the worldly phenomenon is real, or unreal or both real and unreal. If the answer is 'real' then whether that reality of ignorance is different from the reality of Brahma or not different or both different and non-different. It cannot be the first, viz., different from that of Brahma, since the scriptures declare there is but one reality and not a second 'The one real is called as

many by the learned'. Then is it non-different from that of Brahma? The scriptures declare that ignorance and Brahma are different, one being of the nature of being false, inert and painful while the other is reality, knowledge and bliss. Nor can they be both different and non different, since these are contradictory like light and darkness existing simultaneously. For the same reason they cannot fall in the 3rd category of the first question viz., 'both real and unreal'. Having thus disposed of the first and the third categories there remains but the second, viz., 'unreal'. Hence ignorance has conclusively to be understood as unreal. If then ignorance is to be said to be unreal, the scriptural declaration that it is indescribable, being neither Sat nor Asat, cannot stand and that very text turning out to be a false assertion loses all its force as an authority. This argument again is refutable. In the absence of real thinking its indescribability may be apparent, but on due consideration it will be found to remain as such only in name like the horns of hare or man. Further it is expressed to be such only by those who have realised the identity of the absolute Brahma and Atman and by the scriptures as conducive to the consideration of the process of creation. Hence the scripture cannot lose its force as authority. If so, can it not then be argued that there is no creation too, which is opposed to actual experience. Not so. What is experienced in a dream has no reality to the man awake. What is actually seen as a pot turns out on consideration to be nothing different from earth. The Lord has declared that there is nothing else different from the Lord. The Acharya also declares to the same effect when he says if the world is real it must exist in the state of deep sleep also (Sushupti). As it has no existence in that state, it is unreal as in a dream. If this conclusion is accepted,

it strikes at the root of several texts, viz., 'the sky arose from Atman', 'Prajapati created all beings' and the declaration of the sage Vidyaranya that the elements of fire etc rose at God's bidding from the inert Prakriti for its enjoyment. The answer too is 'No'. The above texts are authorities in so far as they aid to refute the doctrines of Samkhyas and Tarkikas, that Prakrit and atoms are the cause of the universal phenomenon, which hit the Vedantic doctrine of Advaita (one alone without a second) and thus to establish the supremacy of Atman. If one raises the experience 'I am ignorant' as an objection he is to be asked whether his experience of ignorance is known to him or not. If it is not known to him how can he be said to have the experience 'I am ignorant'. If it is known to him how can he be said to be ignorant?

It may be argued 'I do not know Brahma and that my ignorance is only as regards Brahma and not ignorance'. In that case he is to be asked whether that ignorance is in him or in Brahma. If it is in him, then there is the defect of interdependence (अन्योन्याश्रयदोषः) which may be illustrated as follows: In definiting the nature of a cow and a buffalo, if it be said that the nature of a cow is different from that of a buffalo and that of a buffalo is different from that of cow, the knowledge of the nature of the cow is dependent on that of the nature of the buffalo and vice versa. If ignorance is in Brahma it is opposed to the nature of Brahma which as the scripture says is eternal, immaculate, and so forth. As light is to the Sun, coldness to water, heat to fire, so are Sat, Chit, Bliss and Purity natural to Brahma. As there is no darkness in Sun so is there no ignorance in Brahma. It cannot also be said that ignorance is in Antahkarana (mind). for that too is beset with the defect of inter-dependence. If so,

this statement stands opposed to the declaration in the earlier verse (2) that several different forms of Atma arising from ignorance are easy to be had to the ignorant but not Mukti or liberation In fact it is not so opposed, for that declaration is only to ward off the aspirant from the delusion of ignorance and its effects. Further if ignorance is accepted as a separate entity, it strikes at the root of nondualism and stands opposed to several texts, viz., "There is only one Rudra and not a second." "All this is filled by one Purusha" and so forth and also gives rise to several defects, viz., non-relief from misery, futility of the efforts of religious observances as calmness, self control, renunciation, hearing the Guru's advice and so on. In fine the reality or existence of ignorance and its effects cannot be established by anybody, even by Brahma. Hence the expression 'too remote then the differences as Jiva, God and preceptor' (जीवेशदेशिकविकल्पकथाऽपिदूरे). Jiva is the individual soul, proud of its individuality and possessed of superficial knowledge (किञ्चिज्ञः). It is of three kinds, viz., Viswa, Thaijasa and Prajna. Viswa (विश्वजीव) is that vital force which pervades the three bodies, gross, subtle and causal, of the individual, (तैजस) Thaijasa that of the two bodies subtle and causal and Prajna (प्राज्ञ) that of the causal alone. The ईश (Isa) referred to here is also of three kinds as Vaiswanara and so on. Isa prides over the aggregate of souls and is all-knowing. A Desika or preceptor is one who gives advice to those who resort to him with words of encouragement and protection The word अपि is used to denote everything else related to them as their nature, their work, the treatises of Veda, Sastras etc., treating of the fruits of their work, the four castes and order, the various systems of philosophy, the various relations as father, mother, etc., food and play, bondage and liberation and every

other distinction that prevails in the world. These distinctions are not there in the realised of Brahma who is steadfast in the Atman alone. It may be argued that to do away with the distinctions of Guru and God is not proper. Guru is Brahma, the one who consumes ignorance. He is said to be Vishnu, Siva and the visible Supreme Brahma. No doubt it is true that Guru and God are Brahma. They are not to be discarded. But even then as they are the products begotten of ignorance, such distinctions are to be denied. Hence the expression विकल्पकथाऽपिदूरे is significantly used. As declared by the sage Ashtavakra, the realised sage "Where is action, where is inactivity, where bondage, where liberation for me, who am always steadfast in the meditation of Brahma? Neither advice nor Sastras, nor disciple nor preceptor, nor any object of life to be attained is for me who am ever steadfast in Brahma without any other thought" The scriptures also declare to the same effect when they speak of those realised of Brahma. "There is no Chitta (mind) nor the worldly phenomenon Prapancha, nor egoism, nor Jiva, nor anything as the effect of Maya or ignorance, nor Maya and so on." He who is realised of Brahma knows no such distinctions. He is extremely immaculate and full of the nature of Brahma, self refulgent, blissful, full, ignorant of the distinctions brought about by Maya, ever free and so on, regardless of the body and the like, the effects of ignorance, as unreal as the water in a mirage. He experiences verily that he is Brahma and everything is Brahma too. To him there is nothing othar than Brahma. This has been testified by several scriptural texts as well. The Lord has also declared that there is no reality or existence for the non-existent nor any non-existence or unreality for the existent. The Acharya also gives expression to the same experience when he says there is

no water, no earth, nor anything else except I who am the one resulting entity, the Brahma The same experience is given expression to by Avadhuta in the Avadhuta Gita when he says, "I am neither stout nor lean, I have no coming, nor going I am devoid of beginning, end and the middle, I am verily the Supreme of the essence of knowledge, of even feeling and unattached like the Sky." Similarly that Lord of ascetics Sri Sadasiva Brahmam has in this brief treatise of but 44 verses well expounded the gist of the Vedantic truth out of compassion towards his disciples. For his disinterested actions he was blessed with the grace of Sri Chakra Rajeswari and was able to exult in that exquisite state of the realised of Brahma. Therefore it is the bounden duty of his disciples too to resort to disinterested actions and gain his grace thereby and by strictly following his spiritual advice walk in his footsteps and reach the ultimate goal of Brahmic realisation. As testified by the scriptures and the words of the Acharya the ultimate state of Vedantic realisation is indescribable, and beyond thought but realisable only in experience. More than this there is nothing to be spoken nor to be listened to nor to be thought over. May that Sadguru of infinite bliss who is incarnated as Dakshinamoorthy ever bless us.

THUS ENDS

The Commentary Suvikasini

of Sri Krishnanandasrami Swami, the illustrious ascetic

on

Advaitarasamanjari

of the illustrious Lord of ascetics, Sri Sadasiva Brahmam

12—7—'56.

[illegible] what [illegible] and
the [illegible] Sushila. The [illegible]
[illegible] in the Amrita [illegible]
[illegible] I am neither [illegible] I have
[illegible] other beings, and [illegible]
[illegible] I am verily the [illegible] of the essence of
[illegible] being and [illegible] like the sky
[illegible] that Lord of [illegible] Sadasiva [illegible]
[illegible]
[illegible] towards the
[illegible]
[illegible] Sri Chakra [illegible] was able to [illegible]
[illegible] state of the [illegible] There-
[illegible] to
[illegible] and [illegible] grace thereby and be
[illegible] following [illegible] walk in his foot-
[illegible] and reach the ultimate goal of [illegible] realisation
[illegible] by the [illegible] and the [illegible] of the
[illegible] the ultimate state of [illegible] realisation [illegible]
[illegible] and [illegible] though [illegible] but [illegible] the only
[illegible] More than [illegible] nothing to be [illegible]
[illegible] to be thought over [illegible]
[illegible]

[illegible]

[illegible]

[illegible] and [illegible]

[illegible]

[illegible]

[illegible]

[illegible]